उद्योतः—इत्यर्थः । **तदर्थेति** । एवं चार्थहेतुत्वस्य श्लोकोक्तस्य व्यतिरेकप्रदर्शनामिति भावः । **तृतीयेति** । द्विगुपूर्वपदक इत्यर्थः । **न चेति** । अकारांतोत्तरपदद्विगोः स्त्रीत्वादिति भावः । **इत्यादिवदिति** । ऽयवयवो गुण इतिवन्नवावयवो रस इति मध्यमपदलोपी समासः । रसपदेन उद्भूतावयवभेदस्तत्समुदायो विवक्षित इति भावः । **न चेति** । 'षड्रसा' इत्युक्त्येति भावः । **अयोगव्यवच्छेदीति** । तेन मधुरादिभिस्तस्या अपि हृद्यत्वमित्यपास्तम् । **व्यंग्य इति** । निर्माणव्यतिरेको विशेषणद्वारा स्फुटव्यंग्यः अयं तु गूढव्यंग्य इति भावः । नियतिनिरूप्यत्वं च नियतिव्यापकतादिनिरूप्यत्वेनेत्याह । **नियतेः शक्त्येति** । तृतीयार्थो नियतपदार्थैकदेशे नियमेऽन्वेति-नियतिनिरूप्यो यो नियमो जलकमलादावेव कमलसौरभादिरित्येवंरूपस्तदाश्रयस्वरूपेत्यर्थः । सुखादिजनकत्वेन सत्त्वादीनां तदात्मकत्वम् । मोहो भ्रमः । तत्प्रभृतीति निमित्तसंग्रहः । असमवायिकारणेऽपि सहकारित्वम् । **मधुरादिषड्रसेति** । रसशब्दश्लेषमहिम्ना तेषामेषां च रसानामभेदप्रतीत्या ब्रह्मनिर्मितिगतरसानां तत्रासत्त्वेऽपि नाधिक्यहानिः । न वा व्यतिरेकप्रदर्शनविरोधः । **मनोरमैवेति** । एतेन ब्रह्मनिर्मितिरपि मधुराद्यैर्हृद्येति परास्तम् । ह्लादैकेत्यनेन चालंकाराधीनाह्लादजनकत्वमुक्तमिति न पौनरुक्त्यम् ।

प्रभाः—रुचिरा चेत्येवं बहुव्रीहिगर्भ इत्यर्थः । नवरसैः रुचिरेति तृतीयातत्पुरुषत्यागेनोक्तकर्मधारयाङ्गीकारे बीजमाह—**वृत्ताविति** । न चेति चकारेण व्यतिरेकद्वित्वावगतेरित्यर्थः । **न चैवमिति** । नियतहृद्यत्वमात्रव्यतिरेककथने तैरिति व्यर्थम्, प्रत्युत विशिष्टव्यतिरेकबोधकतया विरुद्धार्थकमेवेत्यर्थः । तैरिति न करणे तृतीया । किं तूपलक्षणे । अतो न विशिष्टव्यतिरेके तात्पर्यमिति नोक्तदोष इत्याह—**तैरिति** । इतीति षष्ठ्यन्तम् । इत्यस्य तदर्थत्वादित्यर्थः । एवमपि तैरित्यस्य हेतुगर्भत्वादनुपयोग इत्यस्वरसादाह—**अस्तु वेति** । एवं द्विगुत्वे सति । त्रिगुणेति त्रिशब्दस्य त्र्यवयवकपरत्वेन द्विगुत्वाभावाद्यथारूपप्रसङ्गो नेत्यर्थः । **न चेति** । व्यतिरेकद्वयप्रदर्शकप्रकाशविरोधश्च नेत्यर्थः । कथं तत्राह—**नवेति** । विशेषणविशेष्ययोर्व्यतिरेकद्वयस्य प्रदर्शनं विशिष्टव्यतिरेके द्वयोरपि प्रयोजकत्वमस्तीति प्रदर्शयितुमित्यर्थः । उत्तमकाव्यत्वसिद्धये वाच्यातिशयव्यङ्ग्यं दर्शयति—**अत्रेति** । कविभारतीनिर्माणस्य सुखायात्मकचन्द्रादेर्ब्रह्मनिर्माणात्प्रसिद्धे चन्द्रादेर्व्यतिरेक आधिक्यम् । 'उपमानाद्यदन्यस्य व्यतिरेकः' इति दशमे व्यतिरेकालंकारतया वक्ष्यते । स च विशेषणैरेव स्फुट इति तद्द्वारा निर्मात्र्या भारत्या ब्रह्मापेक्षया व्यतिरेकालंकारो व्यङ्ग्यः । शिल्पोत्कर्षेण शिल्पिनोऽपि तत्प्रतीतेः । **शक्त्येति** । कारणतारूपयेत्यर्थः । अथवा व्याप्यव्यापकभावरूपयेत्यर्थः । नियतरूपा पद्मत्वव्यवश्यं सौरभविशेषः पद्मत्ववत्येव च स इति च नियमवती । भारतीनिर्मितौ तु नैवम् । कान्तामुखसंनिधौ पद्मे तदभाववर्णनात्, मुखेऽपि तद्वर्णनाच्चेति भावः । **विश्वस्येति** । एकस्या एव कामिन्याः कंचित्प्रति सुखात्मकसत्त्वसमुद्भूतत्वम्, सपत्नीं प्रति दुःखात्मकरजःसमुद्भूतत्वम्, स्वमलभमानं प्रति तमोरूपमोहसमुद्भूतत्वमिति रीत्या सर्वपदार्थानां सुखदुःखमोहात्मकत्वमिति सांख्यमतानुसारेणेदम् । भारतीनिर्मितौ तु रसाद्यभावेऽप्यलंकारकृताह्लाद एवेति भावः । अतएव नवरसरुचिरामित्यनेन न पौनरुक्त्यम् । ब्रह्मनिर्मितेरुपमान-

प्रत्यस्मि प्रणत इति लभ्यते ।

The sense of the word जयति implies 'homage'. Thus the sense that is arrived at (ultimately) is 'I bow down to her.'

प्रदीपः—सादृश्यवती च ब्रह्मणो निर्मितिरिति सुप्रसिद्धमेव । एतद्विलक्षणनियतिकृतानियमरहितत्वादिधर्मवत्त्वेन तु कविभारती निर्दिष्टेति व्यक्तो व्यतिरेकः । यदेतादृशधर्मशालिनी, अत एव जयत्युत्कर्षेण वर्तते, न तु वर्ततामित्यर्थः । तथा सत्युत्कर्षस्यासिद्धत्वेन नमस्काराक्षेपकत्वानुपपत्तेः ।

नन्वेतादृशे गुरुकर्मणि प्रेक्षावतामिष्टदेवतानतिरवश्यं दृश्यते युक्तिमती च । तदनेन स्तुतिमात्रमाचरता यत्र कृता तदवलेपादज्ञानाद्वा । उभयथाप्यनवधेयवचनता प्रसक्ता । अथ कृतैव, तत्किं स्तुतिवन्नोपनिबद्धा, विशेषाभावात्सैव वा किं नोपनिबद्धेति चेत्, उच्यते—न खलु नतिमात्रोपनिबन्धे स्तुतिर्निबद्धा भवति । स्तुतिनिबन्धे त्वर्थान्नतिरपि निबद्धैव । यतो जयत्यर्थेन वक्तुर्विषयस्य वैशिष्ट्यान्नमस्कार आक्षिप्यते । तेन तां प्रत्यस्मि प्रणत इति लभ्यते । यत्तु 'उत्तमकाव्यत्वसिद्धये व्यङ्ग्यं दर्शयति जयत्यर्थेन चेत्यादि' इति वृत्त्यवतारणं तदयुक्तम् । प्रणामरूपव्यङ्ग्यस्यानतिशयितत्वेन ध्वनित्वाप्रयोजकत्वात् । तदर्थं चातिशयिनो व्यतिरेकालंकारस्यैवोपन्यासौचित्यादिति । 'इहाभिधेयं ग्रन्थरूपमङ्गिनः काव्यस्य फलेन सफलमिति प्रेक्षावत्प्रवृत्त्यर्थं प्रतिपादयितुमाह—**काव्यमिति** ।

उद्योतः—**सादृश्यवती चेति** । उपमानोपमेययोरेव व्यतिरेकेऽपि न क्षतिरिति भावः । **ब्रह्मणोनिर्मितिरिति** । उत्कर्षप्रतियोग्यनुपादानेऽपि प्रसिद्धत्वादियमेव तद्रूपेति भावः । अत्र ब्रह्मनिर्मित्यपेक्षया भारतीनिर्मितौ यो व्यतिरेकस्तन्मूलको ब्रह्मापेक्षया भारत्यां व्यतिरेक इति लक्ष्यक्रमव्यंग्यध्वनिः । कविभारतीनिर्मितिर्निर्दिष्टेति पाठः । **व्यक्त इति** । विशेषणद्वारा स्फुटव्यंग्य इत्यर्थः । **एतादृशधर्मेति** । धर्मश्च निर्मितिरूपः । निर्मितिर्निर्माणम् । मुखपद्माद्युत्पत्त्यनुकूलो व्यापारः । आदधतीत्यस्यार्थः शालिनीति । शिल्पोत्कर्षे शिल्प्युत्कर्षस्यार्थसिद्धत्वादिति भावः । यद्वा निर्मितिरिति कर्मणि क्तिन् । **न तु वर्ततामिति** । वर्तमाननिर्देश एवोचितो न तु विधिनिर्देश इति भावः । **युक्तिमती चेति** । नतिमात्रनाश्यविघ्नस्य शंकितत्वेन तन्नाशार्थमवश्यापेक्षणीयेत्यर्थः । **नतिरपि निबद्धैवेति** । जयत्यर्थ उत्कर्षः । स च विशेषानुपादानात्सर्वप्रतियोगिको लभ्यत इति भारत्यां सर्वोत्कृष्टत्वज्ञाने तुल्यवित्तिवेद्यत्वन्यायेन प्रकारान्तरेण वा भारत्यपेक्षया सर्वस्यापकृष्टत्वज्ञाने सर्वांतःपातिनि स्वस्मिन्नप्याराध्यापेक्षयाऽपकृष्टत्वज्ञानं व्यंजनया वृत्तमेवेति भावः । तदेवाह—**यत** इति । **आक्षिप्यत इति** । व्यज्यत इत्यर्थः । वक्तृवैशिष्ट्यं च स्वापेक्षयापि भारत्युत्कृष्टत्वज्ञान उपयुक्तमिति बोध्यम् । ननु सर्वः प्रणत इति लाभेऽप्यहं प्रणत इति न लब्धं तथा प्रणतिरेव च सर्वैर्निबध्यतेऽत आह—**तेनेति** । व्यंजनेनेत्यर्थः । प्रणत इति कर्तरिक्तदर्शनेन धातोरकर्मकत्वात्तामिति प्रतियोगे द्वितीयेत्याशयेनाह—**तां प्रतीति** । **लभ्यत इति** । सर्वान्तर्गतोऽहमप्यपकृष्ट एवेत्यपि व्यंजनयैव लभ्यत इत्यर्थः । **व्यतिरेकालंकारस्यैवेति** । आन्तरालिकव्यंग्यमादायेदम् । तेन पार्यंतिकदेवताविषयकभावेनापि ध्वनित्वे न क्षतिः । **अभिधेयम्** । वक्ष्यमाणमित्यर्थः । तदाह—**ग्रन्थरूपमिति** । न

प्रभाः—सिद्धयर्थमाह—**सादृश्यवती चेति** । कविभारतीनिर्मितिरिति वक्तव्ये कविभारतीत्युक्तिर्भारतीकल्पितायाअनिर्वाच्याया निर्मितेर्भारत्यात्मकत्वमेवेत्यभिप्रायेण । काव्यरूपाया भारत्या उत्कर्षस्याशंसनीयतया तात्पर्यविषयत्वभ्रमनिरासायाह—**नन्विति** । वक्तुर्विषयस्य चेति । विषयः प्रतिपाद्यो देवतारूपः । वैशिष्ट्यमुपास्योपासकत्वरूपम् । आक्षिप्यते व्यज्यते । नन्वस्मदादीन्प्रति तद्व्यञ्जने वक्तुः किमायातमत आह—**तेनेति** । इति वक्तृगतं ज्ञानं श्रोतृभिर्व्यंजनया गम्यत इत्यर्थः ॥

(2)

The Mission of Poetry.

इहाभिधेयं सप्रयोजनमित्याहः–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥ २ ॥

कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचार-परिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजनमौलिभूतं समनन्तर-

---

(The author) states (in the following stanza) that the subject-matter of the work (इह) has a purpose to serve:—

Poetry leads to fame, the acquisition of wealth, a knowledge of the practical world, and the cessation of the inauspicious. It contributes to supreme bliss in no time, and gives advice just in the wise of the beloved wife. (2)

To the Poet and the Man of Taste, as it suits (यथायोगं), Poetry,—which is the work of the Poet, skilled in describing the marvellous, and which, since Word and Sense become subsidiary (in it) owing to its being concentrated on such processes as are subservient to (particular) sentiments, is disparate to sciences like the Veda in which, as in the case of a lord, Word is what matters most, and (disparate) to the legendary lore like the Purāṇas etc. which, as in the case of a friend, aims at Sense-Poetry brings fame like that of Kālidāsa, wealth as that earned by Dhā-

---

प्रदीपः—अत्र कृत्–विद्–युज्–शब्दा भावे क्विबन्ताः । **काव्यं लोकोत्तरवर्णनानिपुणस्वरूपस्य कवेर-साधारणं तादृग्वर्णनात्मकं कर्म ।** तत्कवेस्तावत्**कालिदासादीना**मिव यशः, **श्रीहर्षादे**रुपादानाद्धावका-

---

उद्योतः—चेहेत्यस्यासंगतिः । इह ग्रंथे इत्यर्थात् । अभिधेयं च तददोषावित्यारभ्य बोध्यम् । नन्व-भिधेयप्रयोजनेन नाभिधायकस्य प्रयोजनवत्त्वम् । वह्निरित्याद्यभिधानस्यातत्त्वादित्यत आह–**अंगिन इति** । **क्विबंता इति** । तादर्थ्ये चतुर्थी इत्यपि बोध्यम् । व्यवहार आचारः । शिवेतरत् दुरितम् । उपदेशयुजे उपदेशनिर्माणायेत्यर्थः । उपदेशश्च योग्यतावशात्सदुपदेश एव ग्राह्यः । **लोकोत्तरेति** । चमत्कारिबोधजनकेत्यर्थः । तादृग्बोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्वं च वक्ष्यमाणानुपहसनीय-काव्यलक्षणस्य लक्ष्यतावच्छेदकमित्यनेन दर्शयति । **वर्णना** । मुखादेः कमलत्वादिरूपेण कथनादि । यश इत्यादिकर्मणां करोतीत्यनेनान्वयः । **धावकः** कविः । स हि **श्रीहर्षनाम्ना रत्नावलीं** कृत्वा

प्रभाः—ननु प्रकृतग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थं सप्रयोजनत्वं वाच्यम्, न तु तदुपेक्ष्य काव्यप्रयोजनकथनं युक्तमित्याशङ्का-मपाकर्तुमाह––**इहेति** । अभिधेयं 'शक्तिर्निपुणता–' इत्यादि वक्ष्यमाणग्रन्थरूपम् । तथा चाङ्गस्य स्वतन्त्रफला-भावात्प्रधानफलकथनमङ्गभूतग्रन्थस्य फलवत्त्वबोधार्थमेवेति न निष्फलत्वं ग्रन्थस्य, न वा काव्यफलकथनस्येति भावः । यथाश्रुतेऽभिधेयस्य प्रयोजनमाहेति वाच्ये सप्रयोजनमित्याहेतीतिशब्दानर्थक्यमपि बोध्यम् । **क्विबन्ता इति** । तादर्थ्ये चतुर्थ्यः इत्यपि ज्ञेयम् । **लोकोत्तरेति** । चमत्कृतिजनकेत्यर्थः । मुखादेश्चन्द्राद्यात्मकत्वेन वर्णनायाश्च शब्दार्थाश्रयत्वात्तयोरपि तद्विविशिष्टतया कविकर्मत्वमविरुद्धमिति वक्ष्यमाणलक्षणासंगतिः । अस्य लक्ष्यतावच्छेदकत्वाच्च न तद्वैयर्थ्यमिति बोध्यम् । यश इत्यादेः करोतीत्यनेनान्वयः । श्रीहर्षाख्यस्य राज्ञो नाम्ना रत्नावलीनाटिकां कृत्वा

मेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म, तत् कान्तेव सरसतापादनेना-

---

vaka and others from S'rïharṣa etc., and a thorough knowledge of the manners as pertaining to the king and others. It wards off mishaps as that of Mayūra was warded off through the agency of the the Sun,and brings delight which is the crown of all purposes, which follows immediately

---

प्रदीपः—दीनामिव धनम्, **मयूरशर्मादीना**मिवानिष्टनिवारणं च करोति । सहृदयस्य तु काव्यश्रवणानन्तरमेव सकलप्रयोजनेभ्यूत्तमं स्थायिभावास्वादनसमुद्भूतं वेद्यान्तरसंपर्कशून्यं रसास्वादरूपमानन्दम्, राजादिगतपृथिवीपालनादिसमुचिताचारपरिज्ञानम्, रामादिवद्वर्तनमिष्टसाधनं न तु रावणादिवदित्युपदेशं च निर्मिमीते । काव्यास्वादनकाले कवेरपि सहृदयान्तःपातित्वाद्रसास्वादः । ननूपदेशार्थं नीतिशास्त्राण्येव सन्ति किं तत्र काव्येनेत्यत उक्तं **कान्तासंमिततयेति** । शब्दस्तावत्त्रिविधः—प्रभुसंमितः, सुहृत्संमितः, कान्तासंमितश्च । तत्राद्यः शब्दप्रधानो वेदादिः शासनाप्राधान्येन विधिलक्षणः । स हि प्रभुरिव 'त्वमेवं कुरु' इति समाज्ञापयति । ततश्च नियुक्तः संध्यावन्दनादौ

उद्योतः— बहुधनं लब्धवानिति प्रसिद्धम् । **मयूरशर्मा सूर्यशतकेन** कुष्ठान्निस्तीर्ण इति च प्रसिद्धम् । यशो द्रव्यं शिवेतरक्षतिश्चेत्येतत्त्रयं कवेः प्रयोजनत्वेनोक्तम् । यद्यपि काव्यज्ञपण्डितस्यापि यशः प्रसरति द्रव्यं च लभ्यते स्तोत्रपाठेन शिवेतरक्षतिश्च भवति तथापि कवेः पूर्वोक्तत्रयमेव न त्वन्यत्त्रयमित्याशयः । कवेरेव पूर्वोक्तप्रयोजनत्रयमिति तु न प्रदीपग्रन्थाभिप्रायः । कारिकास्थसद्यःपदं व्याचष्टे । **श्रवणानन्तरमेवेति** । न तु यागादिवद्देहांतरापेक्षेत्यर्थः । परपदार्थमाह—**सकलेति** । तत्र हेतुमाह—**स्थायिभावेति** । आस्वादनं च विभावादिभिस्तस्य संयोजनमित्यर्थः । तावन्मात्रापेक्षित्वादेव चाविलंब इति भावः । शब्दार्थविषयसम्बन्धव्यासंगाद्विलम्बः स्यादत आह—**वेद्यांतरेति** । स्वस्वविषयातिरिक्तवेद्यांतरेत्यर्थः । स्वस्यैव वेद्यवेदनोभयरूपत्वमिति स्पष्टं चतुर्थे । आनंदमित्यस्य निर्मिमीत इत्यनेनान्वयः । व्यवहारविद इत्यंशं व्याचष्टे—**राजादिगतेति** । दुष्टाचारनिवृत्तये **समुचितेति** । उपदेशयुज इति व्याचष्टे—**रामादिवदिति** । हितकर्तव्यत्वाहिताकर्तव्यत्वपरमेतत् । तेन रामकृतवालिवधसदृशस्याप्यकर्त्तव्यत्वं रावणकृतहरपूजादेश्च कर्त्तव्यत्वं बोध्यम् । नन्वेवं कवेः किं रसास्वादो नास्त्येव तत्राह—**काव्येति । शब्दप्रधान इति ।** तत्त्वं च समीहितार्थलाभायात्यज्यमानमुख्यार्थकत्वम् । उपदेशकविधेयांशस्य लक्षणादिनाऽन्यथानयनाऽभावादिति भावः । आदिना स्मृतिः । **शासना** । प्रवर्त्तना । **निष्फलेऽपीति** । अकरणप्रस-

---

प्रभाः—धावकाख्यकविर्बहुधनं लेभे इति प्रसिद्धम् । तथा मयूरकविः सूर्यशतकेन कुष्ठान्निस्तीर्ण इत्यपि । अनर्थः पापं तत्फलं च शिवेतरपदार्थः । सद्यःपरपदार्थावाह—**अनन्तरमेवेत्यादिः** । उत्तमत्वं च सुखस्य स्वतः पुमर्थत्वात् । अन्येषां तु सुखसाधनत्वादपकृष्टत्वम् । वक्ष्यमाणस्वरूपस्य रसस्य प्रागसिद्धत्वेनास्वादनरूपत्वेन च तदास्वादनासंभवात्तस्यैव चानन्दत्वेन तत्समुद्भूतत्वासंभवादाह—**स्थायीति** । तथा च रस्यत इति व्युत्पत्त्या रसपदं रत्यादिस्थायिभावपरमिति भावः । विभावादीनामप्यास्वादविषयत्वेऽपि प्राधान्यात्स्थायिमात्रोपादानम् । आस्वादनं चैषां मुहुर्मुहुर्विभावनम् । रसरूप आस्वादो रसास्वादः । संमितशब्दस्तुल्यपर्यायः । **शब्दस्तावदिति** । उपदेशकशब्द इत्यर्थः । **शब्दप्रधान इति** । विधिरूपशब्दबलादेव प्रवर्तक इति तदनुसारेणैव फलरूपार्थलाभः, न तु. फलवशेन तदन्यथात्वकल्पनेति शब्दप्राधान्यम् । तदाहुः—'न विधौ परः शब्दार्थः' इति । लाक्षणिकोऽर्थ इत्यर्थः । **शासनेति** ।

भिमुखीकृत्य, रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।

(3)

The Basic Grounds of Poetry.

एवमस्य प्रयोजनमुक्त्वा कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ ३ ॥

(upon the reading of Poetry), and in which (every) other consciousness vanishes. Inducing one by inspiring in him a (particular) sentiment, it gives advice that one should behave like Rāma and not like Rāvaṇa. That is why one should, by all means, strive after (creating or appreciating) it.

Having thus specified its (i. e. of Poetry) purpose, (the author) states its cause:—

An aptitude, an acuteness resulting from a close observation of the world, sciences, poetry, etc., and an application (to Poetry) under the guidance of those that know Poetry–these constitute the cause of its (i. e. of Poetry) origin. (3)

प्रदीपः—निष्फलेऽपि प्रवर्तते। द्वितीयस्त्वर्थतात्पर्यवान्सिद्धार्थरूपः पुराणेतिहासादिः । स हि सुहृदिव 'एवं कृते इदमिष्टं भवति, एवं च कृते इदमनिष्टम्' इत्येतावन्मात्रं बोधयति न त्वाज्ञापयति । तृतीयस्तु ताभ्यां विलक्षणो रसप्रधानः काव्यलक्षणः । तत्र हि रसाङ्गभूतो यो व्यापारो विभावादिसंयोजनात्मा व्यञ्जनारूपो वा तन्निष्पाद्यरसादिव्यक्तिनिष्पादकतया शब्दार्थयोर्द्वयोरपि गुणत्वाद्रसस्यैव प्राधान्यम् । स च कान्तासंमितत्वेनोपदेशं करोति । तेनैतदुक्तं भवति—ये सुकुमारमतयोऽतिसुखिस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्यास्तान्काव्यं कान्तेव सरसतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति । गुडजिह्विकया शिशूनिवौषधम् । यदाहुः—

उद्योतः—क्तप्रत्यवायपरिहारातिरिक्तफलरहितेऽपीत्यर्थः । **अर्थतात्पर्यवानिति** । नीत्यादेरुद्देश्यतया तदनुरोधेन शब्दस्य लक्षणाद्यपि तत्राश्रीयत इति भाव. । **सिद्धार्थेति** । अर्थवादरूप इत्यर्थः । **इतिहासः** । प्राचीनवृत्तवर्णनम् । आदिनाऽऽख्यानादिः । वैलक्षण्ये हेतुः–**रसेति** । **अंगभूतः** । उपायभूतः । रसादिव्यक्तिनिष्पादकत्वं च विभावादिसंयोजनफलकविभावाद्युपस्थापनद्वारा बोध्यम् । **संयोजनम्** । मेलनम् । तस्यापि स्वतोऽसंभवादाह–**व्यंजनारूपो वेति** । **गुणत्वादिति** । एवं च गुणीभूतशब्दार्थोभयकत्वमेव काव्ये वैलक्षण्यमिति भावः । **अभिमुखीकृत्येति** । स्वप्रतिपाद्यार्थबोधानुकूलयत्नाश्रयीकृत्येत्यर्थः । सरसतेत्यादिना कांतासादृश्यं दर्शितम् । **उपदेशम्** । रामादिवदिति प्रागुक्तम् । कांता यथा स्वाभिमुखीकृत्य स्वार्थे प्रवर्त्तयत्येवं काव्यमुपदेशरूपस्वार्थे प्रवर्त्तयतीति

प्रभाः—प्रवर्तनारूपशब्दभावनेत्यर्थः । **निष्फलेऽपीति** । स्वर्गादिफलरहितेऽपीत्यर्थः । प्रत्यवायपरिहारस्य तत्रापि फलत्वोपगमात् । अर्थस्तात्पर्यवानिष्टानिष्टार्थबोधनमात्रपरः। सिद्धो विधेयोर्थो यस्य तद्रूप इत्यर्थः । रसप्रधानो रसप्रतीत्युद्देशकः । विभावादीनां संयोजनं समूहालम्बनम् । अथवा प्रभुसंमिते शब्दप्राधान्याच्छक्यार्थपरत्वम् । पुराणादावर्थवादरूपतया लाक्षणिकार्थपरत्वम् । काव्ये तु रसरूपव्यङ्ग्यप्राधान्याद्व्यञ्जनैव रसाङ्गभूतव्यापारो ग्राह्य इत्याह—**व्यञ्जनारूपो वेति** । शब्दार्थयोर्व्यञ्जनास्वरूपनिष्पादकत्वाद्व्यञ्जनाफलोपकार्याङ्गत्वं तयोरित्याह—**तन्निष्पाद्येति**। कान्तासाम्यमाह—**सरसतेति** । कान्तारसो लौकिकशृङ्गारः । काव्ये त्वलौकिको मुख्यः । अभिमुखीकृत्य

शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य । शास्त्राणां छन्दोव्याकरणाभि-

(I) शक्ति, a peculiar emotional power (संस्कार) constituting the germ of Poetry, failing which Poetry would not come forth, or even if it were to come forth, would prove ridiculous—(II) wisdom (व्युत्पत्ति) following upon a study (विमर्शन) of लोक i. e. of tbe behaviour of the world consisting of the immovable and movable objects, of शास्त्र i.e. of the works that treat of (लक्षण)

प्रदीपः– ' स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते ।
प्रथमालीढमधवः पिबन्ति कटु भेषजम् ॥ '

यत एवंविशिष्टं काव्यम्, अतः सर्वथा तद्धेतुरुपादेयः ।

नन्वेवमप्यभिधेये किमायातम्, किं च हेतुमज्ञात्वा तदुपादानं कथं स्यादित्याकांक्षायां काव्यज्ञशिक्षारूपतया काव्याङ्गत्वं ग्रन्थस्य प्रतिपादयन्नेव कारणान्तरमप्याह—**शक्तिरिति** ।

शक्तिः कवित्वबीजभूतो देवताप्रसादादिजन्मा संस्कारविशेषः प्रतिभाव्यपदेश्यः । तस्याः कारणतायां किं मानमिति चेत्, निपुणतादिकारणान्तरसद्भावेऽप्यनुपहसनीयकाव्यप्रसरस्य कार्यस्य व्यतिरेकः । स च विशेष्यस्य काव्यप्रसरस्य विशेषणस्यानुपहसनीयत्वस्य वा व्यतिरेकात्सर्वत्रैवाविशिष्टः । न चैवं कारणान्तरं किंचिदायातु, न तु शक्तिरिति वाच्यम् । प्रसिद्धातिरेकिण्येव तद्धेतौ शक्तिव्यपदेशात् । **लोकः** स्थावरजङ्गमात्मकलोकस्य वृत्तम् ।

उद्योतः-भावः ।**एवंविशिष्टम्**। एतावदिष्टविशिष्टमित्यर्थः। साक्षात्काव्यविषयकयत्नासंभवादाह—**तद्धेतुरिति** ।तस्य काव्यस्येत्यर्थः। **अभिधेय इति**। प्रकृतग्रंथ इत्यर्थः। **किमायातमिति**। श्रोतॄणां प्रवृत्तिप्रयोजकं किमायातमित्यर्थः । **काव्यांगत्वम्**। हेतुत्वेनेत्यर्थः । **बीजेति** । जलादिकमिव व्युत्पत्त्यादिसहकार्यासाद्यव्रीह्यादिभिरंकुरस्येव कवित्वस्य तया जननात् बीजत्वम् । **संस्कारविशेषः**। देवताराधनादिजन्यं विलक्षणादृष्टम् । शक्नोति काव्यनिर्माणायाऽनयेति योगाच्छक्तिरित्युच्यते । तत्तद्रसादिवासना वा । **प्रतिभाव्यपदेश्यः** । प्रतिभापदव्यपदेश्यः । **अनुपहसनीयकाव्यप्रसरस्येति** । उपहसनीयं च दोषवैशिष्ट्यादिना । ननु वक्ष्यमाणलक्षणानुसारात्तस्य काव्यत्वमेव नेति

प्रभाः–आस्वादने सादरीकृत्य । कान्तोपदेशस्तु स्वसमीहितवसनालंकारादिसंपादनरूपः । काव्योपदेशस्तु रामादिवदिति प्रागेवोक्तः । कारिकातात्पर्यार्थमाह—**यत इति** ॥

अभिधेये प्रकृतग्रन्थे । संस्कारोऽदृष्टं तद्विशेषः । विशेषमेवाह—**प्रतिभेति** । काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा । तया कार्येण विशेषतो व्यवहार्यः । तद्धेतुभूत इति यावत् । **तस्या इति** । शक्तेरित्यर्थः । व्युत्पत्त्यभ्यासाभ्यामेव प्रतिभोत्पत्त्या काव्यसंभवादिति भावः । समाधत्ते—**निपुणतादीति** । तथा च निपुणतादिजन्यप्रतिभायामप्यनुपहसनीयत्वविशिष्टकाव्यानुत्पत्तेस्तदवच्छिन्ने शक्तेरेव हेतुत्वमित्यर्थः । एवं च शक्तिजन्यतावच्छेदकं प्रतिभागतं वैजात्यं विजातीयकाव्यजनकतावच्छेदकमिति न व्यभिचारः । **यां विनेति** । प्रकाशस्याप्यनुपहसनीयत्वविशिष्टकाव्ये शक्तेर्व्यतिरेकव्यभिचाराभावप्रतिपादने तात्पर्यमनेनोक्तम् । कारणान्तरं विजातीयव्युत्पत्तिरूपम् । **न तु शक्तिरिति** । उक्तादृष्टरूपेत्यर्थः । **प्रसिद्धेति** । तथा च तदेव शक्तिपदार्थोऽस्त्वित्यर्थः । शक्नोत्यनया काव्यं कर्तुमिति व्युत्पत्तेः । वस्तुतस्तदवच्छिन्ने उक्तादृष्टमेव हेतुरिति तन्निराकर्तुं शक्यमिति भावः । रसादिविषयकवासनाविशेषस्तु निपुणतैवेति न सा शक्तिपदार्थ इति ज्ञेयम् । केचित्तु यां विनेति ग्रन्थं शक्तिद्वयाभिप्रायेण व्याचक्षते—यां निर्माणशक्तिं विना काव्यं न प्रसरेन्न भवेत् । यां च बोद्धृशक्तिं विना निर्माणशक्त्या प्रसृतमप्युपहसनीयं स्यात् चमत्कृतेरसंपत्तेरिति । तदयुक्तम् । अस्येति प्रकृतकाव्यपरामर्शात्कारणशक्तेरेव वक्तव्यतया बोद्धृशक्तिकथनस्यासंगत-

धानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानाम् । काव्यानां च महाकविनिबन्धानाम् । आदिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः । काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्तास्तस्य

Metrics, Grammar, Lexicography of words, Arts, the Four Objectives (of human existence), Elephants, Horses, Swords etc., of काव्यs i. e. compositions by eminent poets, and of Legendary lore etc. as follows from the inclusion of the word आदि—(III) repeated effort at conceiving and composing Poetry under the guidance of those that know how to compose and appraise Poetry–these *three* cumulatively and not severally constitute the cause–not

प्रदीपः—योगादुपचाराद्वा । धर्मिमात्रपरामर्शस्य व्युत्पत्त्यनाधायकत्वात् । **शास्त्रं** छन्दःशास्त्रादि । **काव्यं** महाकविप्रणीतं रघुवंशादि । **आदिग्रहणादितिहासादि** । तेषां विमर्शनाद्व्युत्पत्तिर्**निपुणता** । **काव्यज्ञशिक्षा** काव्यं कर्तुं रसानुगुणतया प्रबन्धादौ घटयितुं च ये जानन्ति तदुपदेशः । तया करणे योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः । **इति**-शब्दो मिलितोपस्थापनाय । अन्यथा तद्वैयर्थ्यमेव स्यात् । तया च काव्यस्योद्भव उत्कृष्टोत्पत्तिः । तया कार्येण

उद्योतः—चेन्न । तददोषावित्यस्य लक्ष्यतावच्छेदकमप्येतदेवेत्यदोषात् । लोक्यत इति योगस्य धर्मिसाधारणत्वादाह—**उपचाराद्वेति** । तेन वृत्तानंत्यादनंतवर्णनानिर्वाहः । अन्यथा लोकानां नियतत्वेन पूर्वैरेव वर्णितत्वादाधुनिकवर्णना एकधर्मावच्छिन्नकार्यतानिरूपितकारणत्वविषयैव स्यात् । **इतिहासादीति** । आदिना व्याकरणकोशचतुःषष्टिकलाधर्मार्थकाममोक्षाणां प्रतिपादकस्य स्त्रीपुंलक्षणादीनां च संग्रहः । **विमर्शनात्** । मुहुर्मुहुस्तत्तत्पदअर्थरसादिगोचरानुसंधानात् । **व्युत्पत्तिः** । पूर्वोक्तानां तात्पर्यविषययथार्थगोचरो दृढतरः संस्कारः । **तदुपदेशे इति** । एतद्रूपतया च प्रकृतग्रंथोपयोग इति बोध्यम् । **तया** । शिक्षया । **मिलितोपेति** । पूर्वोक्तसमुदायपरामर्शकत्वेनेति भावः । अन्योन्यापेक्षत्वेन मिलितत्वम् । **उत्कृष्टोत्पत्तिः** । उपहासाकरणीभूतकाव्यस्योत्पत्तिः । इदमुपलक्षणं उत्कृष्टबोधस्यापि । अत एव घटयितुं च ये जानंतीति पूर्वोक्तस्य न वैयर्थ्यम् । शक्तिपदेन च करणशक्तिर्बोद्धृत्वशक्तिश्चोच्यते । वस्तुतो बोद्धृत्वशक्तिरपि वाक्यार्थज्ञानद्वारा दोषाभावादिवैशिष्ट्यप्रयोजकतया कवित्वस्यैव बीजम् । प्रकाशे समुल्लासे चेत्यस्य अनुपहसनीयत्वे चेत्यर्थः । तदुक्तमुत्कृष्टोत्पत्तिरिति । रसानुगुणतया योजयितुमुपदेशस्याप्यत्रैव कारणता उक्तरीत्या । **उपधानम्** । कारणत्वेन ज्ञानम् । मिलितस्य दंडचक्रादीनामिव कारणत्वं न तु तृणारणिमणीनामिवेति ध्वनयितुमेव हेतुरित्येकवचनम् । एकधर्मावच्छिन्नकार्यतानिरूपितकारणत्वबोधकत्वात् । मंत्राद्यधीनकाव्येऽपि निपुणतायाः पदतदर्थादिवासनारूपायाः पदतदर्थस्मारकतयास्त्येवोपयोगः । परंतु तत्र जन्मांतरीया सा । अभ्यासोऽपि अन्वयव्यतिरेकानुविधानसिद्धो जन्मांतरीयः कल्प्य इति भावः । मंत्राद्यनधीन-

प्रभाः—त्वात् शक्तिद्वयपरत्वे शब्दस्वारस्यभङ्गाच्च । समुल्लासे चेत्यनेनानुपहसनीयत्वस्यैव कथनादिति । योगाल्लोक्यत इति लोकव्युत्पत्तेः । रूढिप्राबल्यादाह—**उपचाराद्वेति** । उपचारो लक्षणा । **छन्दःशास्त्रादीति** । आदिना प्रकाशोक्तव्याकरणादिपरिग्रहः । **इतिहासादीति** । आदिना पुराणबृहत्कथादिसंग्रहः । विमर्शनात्पुनःपुनः श्रवणात् । व्युत्पत्तिस्तत्तदर्थरसादिगोचरः संस्कारः । **रसानुगुणतयेति** । यो रसः प्रक्रान्तस्तदानुगुण्येन वर्णनात्मकं काव्यं तत्प्रक्रमे निवेशनीयम्, न तद्विरोधि । अन्यथा रसव्याघातापत्तेरित्यर्थः । इदं च योजनाज्ञानं दोषाभावादिवैशिष्ट्यप्रयोजकतया काव्यहेतुः । **मिलितेति** । शक्त्यादिसमुदितेत्यर्थः । वैयर्थ्यमुपलक्षणम् । हेतुरित्येकवचनानुपपत्तेः । तथा च समुदायाभिप्रायमेकवचनम् । हेतुत्वं च फलोपधायकत्वरूपं त्रिष्वेकरूपमित्यभिप्राय इत्याह—**तयेत्यादि** । उपधानं

काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः ।

(4)

Definition of Poetry.

एवमस्य कारणमुक्त्वा स्वरूपमाह—

(सूत्र १) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ।

---

causes-in the matter of the उद्भव i. e. creation and excellence (समुल्लासे) of Poetry.

Having thus stated the cause of this (i. e. Poetry) the author states the nature thereof:—

It consists of Word and Sense, such as are free from defects, are possessed of excellences, and are, in rare cases, void of figures.

प्रदीपः-मिलितानामुपधानम् । दण्डचक्रादीनामिव घटेन । न तु मिलितत्वेन कारणतैवेति भ्रमः कार्यः । एवं कारणमुक्त्वा काव्यस्य लक्षणमाह--**तददोषाविति ।**

निर्दोषत्वादिविशेषणविशिष्टौ शब्दार्थौ काव्यमिति व्यवहर्तव्यौ । गुणस्य रसनिष्ठत्वेऽपि तद्व्यञ्जकपरं गुणपदम् । नन्वनलंकारेऽतिव्याप्तिः सालंकारत्वविशेषणानुपादानादिति न वाच्यम् । यतः क्वापीत्यनेनैतदुक्तम्—**यत्सर्वत्र सालंकारौ शब्दार्थौ काव्यम्, क्वचित्तु स्फुटालंकारविरहेऽपि न काव्यत्वहानिः ।** नञोऽल्पार्थत्वात् । अल्पत्वस्य चात्रास्फुटत्व एव विश्रामात् । नीरसेऽप्यस्फुटालंकारे काव्यत्वमिष्टमेवेति ऋजुः पन्थाः । वयं तु पश्यामः—

उद्योतः-शिशुकाव्ये शक्त्यंशेऽप्येवमेवेति दिक् । **कारणतैवेति** । कारणतैव मिलितत्वेनेति । **न भ्रमः** । मिलितत्वं कारणतावच्छेदकमिति न भ्रमः । **कार्य इति** । किं तु मिलितानां परस्परसहकृतानां फलोपधायकत्वमित्येवेति बोध्यम् । **लक्षणम्** । इतरभेदकम् । इष्टतावच्छेदकं च । तत्प्रकारकज्ञानस्य प्रवर्त्तकत्वादिति बोध्यम् । **शब्दार्थाविति** । अर्थाश्रयत्वाच्छब्दस्य प्रागुक्तिः । आस्वादव्यञ्जककत्वस्योभयत्राप्यविशेषात् । प्रागुक्तलक्ष्यतावच्छेदकत्वस्य व्यासज्यवृत्तित्वाच्च । काव्यं पठितं श्रुतं, काव्यं बुद्धमित्युभयविधव्यवहारदर्शनाच्चेति भावः । तत्काव्यमित्येकवचनेन काव्यत्वस्य व्यासज्यवृत्तितां ध्वनयति । काव्यं यशस इति सूत्रस्थकाव्यपदमनुवर्त्तते इति भावः । तत्पदार्थौ वा काव्यमिति । एकैकस्मिन् प्रयोगस्तु लक्षणयेति भावः । वस्तुतस्तु काव्यत्वं प्रत्येकपर्याप्तमेव । अत एवैको न द्वाविति वत् शब्दो न काव्यमित्यादिव्यवहारो नेति द्रष्टव्यम् । **तद्व्यंजकेति** । मूर्ध्नि वर्गान्त्यगा इत्यादिना वक्ष्यमाणवर्णघटनादीत्यर्थः । तेन नीरसेऽव्याप्तिरपि नेति बोध्यम् । **ऋजुः पंथा इति** । एवं हि सालंकारा-

---

प्रभाः-प्रयोजकत्वरूपः संवन्धः । दण्डेत्यादिदृष्टान्तेन तृणारण्यादिवद्वैकल्पिकहेतुत्वनिरासः । तेषामन्योन्यनिरपेक्षतया कार्योत्पत्तिप्रयोजकत्वेन समुदायस्य तथात्वविरहादिति । कारणतैव स्वरूपयोग्यतैव । मानाभावाद्दण्डादिष्वपि तथात्वापत्तेश्चेति भावः ॥

लक्षणमिति । लक्ष्यते इतरव्यावृत्ततया ज्ञायतेऽनेन लक्ष्यपदार्थ इति लक्षणम् । अनेन स्वं रूप्यतेऽनेनेति स्वरूपपदं प्रकाशस्थं व्याख्यातम् । तथा हि चमत्कृतिजनकीभूतं वर्णनं काव्यमित्युक्ते चमत्कृतिजनकतावच्छेदकरूपस्येष्टतावच्छेदकस्याज्ञानम् । तत्र प्रवृत्त्ययोगात् । तत्कथनं काव्यशिक्षारूपे ग्रन्थे क्रियत इत्यर्थः । प्रागुक्तस्य वर्णनात्मकलक्ष्यतावच्छेदकस्य शब्दार्थोभयाश्रितत्वात् । कविप्रौढोक्तिकल्पितत्वस्य चार्थ एव सद्भावात् । अर्थचित्रस्याभ्यर्हितत्वाच्च अर्थविशिष्टशब्दस्यैव तत्त्वानौचित्यादुभयोपादानम् । तत्र च 'नामरूपे' इत्यादौ वेदे, 'वागर्थाविव' इत्यादौ लौकिके शब्दप्राथम्यात् शब्दोद्भवत्वाच्चार्थस्य शब्दप्राथम्यम् । तत्र शब्दप्रयोजनावैचित्र्ये शब्दः काव्यम् । अर्थप्रयो-प्रयोगे

दोषगुणालंकारा वक्ष्यन्ते । क्वापीत्यनेनैतदाह—यत् सर्वत्र सालंकारौ क्वचित्तु स्फुटालंकार-विरहेऽपि न काव्यत्वहानिः । यथा—

The Defects, Excellences and Figures (characterising Poetry) will be described later. The words क्वापि are used to convey the idea that every-where they (i. e. Word and Sense) are possessed of Figures; but even if, in some cases, there are no obvious figures, it does not detract from the poetic nature of the composition. For instance,

प्रदीपः—नीरसे स्फुटालंकारविरहिणि न काव्यत्वम् । यतो **रसादिरलंकारश्च द्वयं चमत्कारहेतुः**। तथा च यत्र रसादीनामवस्थानं न तत्र स्फुटालंकारापेक्षा । अत एव **ध्वनिकारेणो**क्तम्–" अत एव रसानुगुणार्थविशेषानिबन्ध-नमलंकारविरहेऽपि च्छायातिशयं पुष्णाति । यथा—

' मुनिर्जयति योगीन्द्रो महात्मा कुम्भसंभवः ।
येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥ '

अत्र ह्यद्भुतरसानुगुणमेकचुलके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णाति । " इति । नीरसे तु यदि न स्फुटोऽलंकारः स्यात्तर्हि किंकृतश्चमत्कारः स्यात् । चमत्कारसारं च काव्यमित्यवश्यं स्फुटालंकारापेक्षा । अनलंकृती पुनः

उद्योतः-वित्येव वदेदित्यरुचिः। अरुच्यंतरमप्याह—**वयं त्विति । चमत्कारहेतुरिति ।** चमत्कारनिदान-स्यैव काव्यत्वादिति भावः । **स्वत एवेति** । अलंकारानिरपेक्षमित्यर्थः । छायातिशयं पुष्णातीत्यने-नान्वेति । ' अलंकारविरहेऽपि ' इति अस्यैवार्थकथनम् । क्वचित्तु अत एवेति पाठः । मत्स्यकच्छप-दर्शनं छायातिशयं पुष्णातीत्यंतो ध्वनिग्रंथः । छाया चमत्कारः । **रसान्यतरत्वमिति ।** रसान्य-तरशब्द अर्शआद्यजंतः । रसपदं च भावादीनामप्युपलक्षणम् । क्वचित्तु रसान्यतरवत्त्वमित्येव पाठः । **यथोदाहृते इति ।** न चात्र जयहेतोर्योगींद्रत्वादेरेकत्र चुलके मत्स्यकच्छपदर्शनहेतोर्मा-हात्म्यादेरुपादानात्काव्यलिंगमस्तीति वाच्यम् । तस्याद्भुतरसाननुगुणत्वात् । माहात्म्यानुपादानेऽपि तादृशदर्शनस्यैवाद्भुतरसव्यंजकत्वात् । योगींद्रो महात्मेति पदद्वयमद्भुतविरोध्येवेत्यपरे । एकचुलके मत्स्यकच्छपयोर्विरोधाभासस्तु सन्नपि न स्फुट इत्याहुः । **यदि त्विति ।** अत एव वृत्तौ क्वचित्स्फु-टालंकारविरहेऽपि न काव्यत्वहानिरित्यत्र स्फुटेत्युक्तम् । चमत्कारिबोधजनकत्वे सतीत्यपि पूरणी-यम् । अत एव ' अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः ' इत्यादौ न काव्यत्वं सत्यप्यनुमानालंकारे इत्याहुः । स्वाधीनपतिका काचिदसकृदुपभुक्तेष्वपि वरोपकरणादिषु उत्कटा-सक्त्या तेषामत्यंतोपादेयतां सूचयंती सखीमाह—**यः कौमारेति ।** अत्र तच्छब्दा उपभुक्तत्वार्थकाः । हिशब्दो यद्यप्यर्थकः । स च सर्वत्रान्वेति । अस्तिक्रियाध्याहारश्च । यः कौमारहरः वरः यद्यपि स एवास्ति, चैत्रक्षपा यद्यपि ता एव संतीत्यादिक्रमेणान्वयः । कौमारं बाल्यं परमरसिकतया तत्रापि

प्रभाः—जनावैचित्र्येऽर्थः। उभयवैचित्र्ये द्वयमपि । न तु काव्यत्वमुभयपर्याप्तम् । योजनारूपस्यालंकारादिवैशिष्ट्यरूपस्य वा व्यासज्यवृत्तित्वायोगात् । ' एको न द्वौ ' इतिवल्लोकवाक्यं न काव्यमिति व्यवहारापत्तेश्च । उभयवैचित्र्ये काव्यद्वयमिति व्यवहारः स्यादिति चेन्न । विजातीयैकचमत्कृतिजनकत्वेनैकत्वस्यैव व्यवहारात् । ' काव्यमुच्चैः पठ्यते, ' ' काव्यं श्रुतमर्थो न ज्ञातः ' इत्यादि व्यवहारश्च शब्दांशे नोपपन्न एव । अर्थमात्रवैचित्र्ये तु काव्यशब्दस्य शब्दमात्रपरतयो-पपन्नः । ' काव्यं बुद्धम् ' इत्यादिव्यवहारश्चार्थस्य काव्यत्वसाधको ज्ञेय इत्यलं विस्तरेण । **गुणस्येति** । जातावेक-वचनम् । ' ये रसस्याङ्गिनो धर्माः ' इत्यष्टमे रसनिष्ठत्वं गुणानां वक्ष्यते । **तद्व्यञ्जकेति** । ' मूर्ध्नि वर्गान्त्यगाः ' इत्यादि वक्ष्यमाणवर्णयोजनापरमित्यर्थः । अतो नासंभवः, नापि नीरसेऽव्याप्तिरिति भावः । **ऋजुरिति** । चमत्कृति-

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ १ ॥

(by शिलाभट्टारिका acc. to शार्ङ्धरपद्धति)

It is the same wooer as deprived me of (my) girlhood; the nights in Chaitra are the same; the strong breezes blowing over Kadamba-flowers and rendered fragrant by the blooming Mālatī-blossoms are the same; I am the same person; and yet, my heart grows impatient for playing the (same) game of dalliance, on the same bank of the Revā (Narmadā) beneath the same tree overgrown with cane. (1)

प्रदीपः-क्वापीत्यनेनाप्यस्फुटालंकारस्य क्वचिदेव काव्यत्वम्, यत्र रसादिः स्फुटः, न तु सर्वत्रेत्येतदेव प्रतिपाद्यते । तस्मात्सालंकारत्वमात्रं न विशेषणम् । किं तु स्फुटालंकाररसान्यतरत्वम् । न चैवमपि रसवत्यनलंकारे काव्यत्वप्रसङ्गो दोषाय इष्टापत्तेः । यथोदाहृते 'मुनिर्जयति' इत्यादौ । यदि तु श्रद्धाजाड्येन तत्रापि न काव्यत्वक्षमा, तदा अलंकारवत्त्वे सतीत्यपि पूरणीयमिति ।

स्फुटालंकारविरहे काव्यत्वं यथा--**यः कौमारेति ।**

उद्योतः-संभोगेच्छोत्पादनेन हृतवान् । कौमारं अभिनवयौवनमित्यर्थो न चारुः । निषिद्धलक्षणापत्तेः। व्रियते प्रियत्वेन स्वयमंगीक्रियत इति वरः । एतेनोभयानुरागः । स एव उपभुक्त एव । नानुपभुक्तत्वसंबंधवानित्यर्थः । उन्मीलिताः विकसितास्तेन यौवनलाभः । कलिकावस्थायामेव शैशवात् । मालती वासंतिकलता । न तु जातिः । चैत्रे तस्या असंभवात् । प्रौढा इत्युद्दीपनादिप्रागल्भ्यशालिनः । अतो मंदत्वेऽप्यविरोधः । कदंबो धूलीसमूहः । सर्वदिक्संचारित्वेन कदंबाकारा आनिला इति वायुविशेषणं वा । तेन चैत्रक्षपा इत्यनेनाविरोधः । वसंते सकलपुष्पाणि वर्ण्यंत इति कविसंप्रदाय इत्यपि कश्चित् । यत्तु भाद्रक्षपा इति पाठकल्पनं तन्निर्बीजम् । यत्तु तद्दूषणं वर्षासु नदीकच्छे रतस्यावर्णनादिति । तन्न । कच्छनिकुंजे तदनौचित्येऽपि तीरनिकुंजे तदनौचित्याभावात् । यथा मेघैर्मेदुरमित्यादाविति दीपिका । चोवधारणे । ते एवेत्यर्थः । अत्र प्रौढा युवान इति श्लिष्टविशेषणबलात् अनिलमालत्योर्नायकनायिकात्वप्रतीतिः। सुरभित्वेन चास्याः पद्मिनीत्वलाभः । चकारोऽप्यर्थोऽस्मीत्यहमर्थकाव्ययानंतरं योज्यः । अस्मीत्यस्य तिङन्तत्वे हि सैवेत्यस्य शाब्दोद्देश्यलाभो न स्यात् । तथा चाहमपि सैव । उत्कंठाहेत्ववस्थांतरं न प्राप्तेत्यर्थः । स एवेत्यादेरप्ययमेवार्थ इत्यन्ये । तथापि । तत्तदसकृदुपभुक्तसकलसामग्रीसत्त्वेऽपि । तत्रेत्युपभुक्त इत्यर्थकं सुरतेत्यादिसप्तम्यंतत्रयेऽप्यन्वेति । तेन सर्वेषामुपभुक्तत्वलाभः । तेन सुरतलीलाविधिरपि नान्यादृशो येन क्रीडास्थानैक्येऽप्युत्कंठा स्यादिति व्यज्यते । रेवायाः नर्मदायाः रोधस्तीरम् । वेतसी लता ।

प्रभाः-जनकत्वाभावात्काव्यत्वमयुक्तमित्यस्वरसोऽत्र सूचितः । 'अत एव' इत्यारभ्य 'मत्स्यकच्छपदर्शनं छायातिशयं पुष्णाति' इत्यन्तो ध्वनिग्रन्थः । छाया कान्तिः । चमत्कृतिरिति यावत् । **एतदेवेति** । अन्यथा हि सालंकारावित्येव ब्रूयादिति भावः । उदाहरणं वृत्तौ तदर्थश्चोदाहरणचन्द्रिकायामस्मत्कृतायां सविस्तरं द्रष्टव्यः । इवाद्यभावेनोपमाया असंभवः स्पष्ट इति रूपकादीनामित्युक्तम् । **अत्रास्मीति** । अन्यत्र 'यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः'

अत्र स्फुटो न कश्चिदलंकारः । रसस्य हि प्राधान्यान्नालंकारता ।

Here there is no *obvious* figure. The sentiment being principal cannot claim to be a figure (viz. Rasavat).

प्रदीपः-अत्र रूपकादीनामसंभव एव । अस्मीत्यस्य विभक्तिविपरिणामादस्तु दीपकमिति चेन्न । अस्मीत्यस्याहमर्थे-काव्ययत्वात् । 'अत्रास्मि करोमि सख्यः' इतिवत् । क्रियापदत्वेऽपि न दीपकत्वम् । तदन्वितानां सर्वेषां प्राकरणिकत्वात् । दीपकस्य तु प्राकरणिकाप्राकरणिकविषयत्वात् । सादृश्याप्रतीतेश्च न तुल्ययोगिता । समुच्चयोऽपि वक्ष्यमाणलक्षणो न संभवत्येव । अतादृशश्च न चारुत्वहेतुः । विशेषोक्तिविभावने विद्यमाने अपि न स्फुटे । कथमिति चेत्, इत्थम्—विशेषोक्तिस्तावत्कारणसत्त्वेऽपि कार्याभाववचनम् । अत्र चानुत्कण्ठाकारणं वरोपकरणयोरुपभुक्तता । तत्सत्त्वे यद्यप्यनुत्कण्ठाभाव उत्कण्ठारूपो निर्दिष्ट एव तथापि नानुत्कण्ठाभावत्वेन, किं तूत्कण्ठात्वेनैव । तस्मादस्फुटत्वमस्याः । यदि चेतोऽनुत्कण्ठितं नेत्यभिधीयेत तदा स्फुटत्वं भवेत् । एवं कारणाभावेऽपि कार्योत्पत्तिवचनं विभावना । अत्र चोत्कण्ठाकारणं वरोपकरणयोरतत्ता । तदभावश्च यद्यप्युक्त एव तथापि नातत्ताविरहत्वेन, किं तु तत्तारूपेणैव । अभावाभावस्य तत्त्वात् । अतोऽस्या अप्यस्फुटत्वमेव । न च स एवेत्येवकारेणातत्ताभावप्रतीतेरतत्ताभावत्वेन प्रतीतौ कथमस्फुटत्वमिति वाच्यम् । विशेषणसंगतेनैवकारेण विशेष्ये विशेषणायोगस्य व्यवच्छेदो हि प्रत्याय्यते, न तु विशेषणाभावाभाव एवाहत्य । पर्यवसानं तु तत्रेत्यस्फुटत्वमेव । एवं विशेष्यसंगतेनाप्येवकारेण विशेष्यभिन्ने विशेषणाभाव एव नाहत्य प्रत्याय्यते, किं तु विशेषणयोगाभाव इति द्रष्टव्यम् । अत एव 'शंखः पाण्डुर एव' इत्यादौ 'नापाण्डुरः' इति, 'पार्थ एव धनुर्धरः' इत्यादौ च 'नान्यो धनुर्धरः' इत्यादिः कदाचित्स्फुटत्वार्थं प्रयुज्यते । **दण्ड्य**प्याह—'त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येन केनचित्' इति । अन्यथा पुनरुक्तिस्तत्र स्यादिति । अनयोरस्फुटत्वे च संदेहरूपसंकरोऽप्यस्फुट इति विभावनीयम् । शृङ्गाररूपरसस्य स्फुटत्वाद्रसवदलंकारः स्फुट एवेति चेन्न । रसस्यात्र प्राधान्यात् । अप्राधान्य एव तस्यालंकारत्वोपगमात् ।

उद्योतः-विशालतया लतान्तराश्रयत्वेन सैव तरुस्तस्य तलमधोदेशस्तस्मिन् । सुरतहेतुर्यो व्यापारो गमनादिस्तत्संबंधिनी लीला वेषविन्यासादिः । आत्मनः प्रकृतिविशेषो बहुकालव्यवधानं वा तेषामत्यंतोपादेयत्वं वा रत्युत्कंठया विभावनीयमिति विरोधमूलविभावनालंकार इति दीपिका । तत्र प्रकृतिविशेष इत्यस्य इतरजनविलक्षणः प्रकृतिविशेष इत्यर्थः । एतेन प्रकृतिविशेष इत्ययुक्तं सा चैवास्मीत्यनेन परिहृतत्वादिति परास्तम् । (शार्दूलविक्रीडितं छन्दः) । **अतत्ता** । अनुपभुक्तता । **विशेषणायोगस्येति** । विशेषणसंबंधाभावस्येत्यर्थः । विशेषणशब्देनात्र विधेयमुच्यते । एवं विशेष्यशब्देनोद्देश्यम् । ननु स एव वर इति यथाश्रुते तत्त्वावच्छिन्नमुद्दिश्य वरत्वस्य विधेयत्वप्रतीतेर्विशेष्यसंगत एवायमेवकारः । तत्र चान्ययोगव्यवच्छेदोऽर्थ इति उपभुक्तभेदाभावस्य वरे प्रतीत्या स्यादेव विभावना । उपभुक्तत्वाभावस्येव उपभुक्तभेदस्याप्युत्कंठाकारणत्वादित्यत आह—**एवं विशेष्येति** । किं च नव्यमते सर्वत्रैवकारस्यान्यत्वव्यवच्छेद एवार्थः । धनुर्धरे पार्थान्यत्वव्यवच्छेदस्य शंखे पांडुरान्यत्वव्यवच्छेदस्य च प्रतीतेः । एवं च प्रकृतेऽपि वरे उपभुक्तान्यत्वव्यवच्छेदस्य उपभुक्ते च वरान्यत्वव्यवच्छेदस्य वा प्रतीतिः शाब्दीति तत्रोपभुक्तत्वप्रतीतेरार्थिकत्वेनास्फुटत्वम् । **त्वन्मुखेनैवेति** । अत्र सादृश्यस्य विधेयत्वेन तृतीयांतमुखपदार्थस्याप्युद्देश्यत्वमिति अभिमानः ।

प्रभाः-इति वक्ष्यमाणोदाहरणवदित्यर्थः । **सादृश्येति** । तद्गमकतयैव तस्याश्चमत्कारित्वेनालंकारत्वादित्यर्थः । **वक्ष्यमाणेति** । एकस्मिन्कार्येऽनेककारणोक्तिरित्येके । गुणक्रियायौगपद्यात्मा चापरो वक्ष्यते । स तु नात्रेत्यर्थः । अतत्तानुपभुक्तता । विशेषणायोगस्य विशेषणसंबन्धाभावस्य । **एवं विशेष्येति** । वस्तुतस्तु तत्तैवात्र विशेषणमिति प्रसङ्गाद्विशेष्यसंगतैवकारार्थप्रदर्शनं बोध्यम् । **संदेहेति** । वरोपकरणादेरत्यन्तरमणीयताया रसोद्बोधजनिकाया उभय-

Classification of Poetry.

तद्भेदान् क्रमेणाह—

(5)

(१) उत्तम काव्य called ध्वनि

(सूत्र २) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥ ४ ॥

The author states its (i. e. of Poetry) varieties in order:—

This (i. e. Poetry) is the best when the suggested sense eclipses the expressed sense ; it is styled Dhvani by the learned.

प्रदीपः–अर्वाचीनास्तु—" यथोक्तस्य काव्यलक्षणत्वे काव्यपदं निर्विषयं प्रविरलविषयं वा स्यात् । दोषाणां दुर्वारत्वात् । तस्मात् ' वाक्यं रसात्मकं काव्यम् ' इति तल्लक्षणम् । तथा च दुष्टेऽपि रसावगमे काव्यत्वमस्त्येव । परं त्वपकर्षमात्रम् । तदुक्तम्—

उद्योतः-नव्यमते तु सम्यगेव। वस्तुतस्तु प्रमाणांतरेण प्राप्तस्य वस्तुनः पुनः शब्देन प्रतिपादनं प्रयोजनांतराभावादन्यव्यवच्छेदं गमयतीति न वाच्यवृत्त्या कथमप्यनुपभुक्तव्यवच्छेदप्रतीतिः । एवकारोऽप्येतदर्थद्योतक एव । न तु तत्समभिव्याहारेऽपि शाब्दबोधे तद्भानम् । तत्समभिव्याहारेण स्फुटं मनसा बुध्यमानत्वमपि द्योतकत्वमिति मंजूषायां परिसंख्यालंकारनिरूपणे च विस्तरः । न चेदृशमस्फुटत्वमकिंचित्करम् । फलाभावत्वकारणाभावत्वाभ्यां प्रतीतेः कल्प्यतया पुरःस्फूर्तिकत्वाभावेन चमत्कारानाधायकत्वात् इति भावः । किं च विप्रलंभे नायकादेर्गुणस्मरणस्यैवोद्दीपकत्वं न तु विशेषोक्त्यादिपर्यवसितवरोपकरणादेरुपभुक्तत्वेनाकिंचित्करत्वस्येति रसाननुगुणत्वमप्येतयोर्बोध्यम्। सदृशदर्शनाप्रयोज्यत्वात्स एव हीत्यादेः प्रत्यभिज्ञाशरीरत्वाच्च न स्मरणालंकारः । यतः सुरभयोऽतः प्रौढाः स्वकार्यसमर्था इति काव्यलिंगमप्यस्फुटम् । अशाब्दत्वात् । रेफवृत्त्यनुप्रासस्यापि विप्रलंभीयमाधुर्यगुणाननुगुणाभ्यां सविसर्गतया गुरुभ्यां रेफाभ्यां घटितत्वादचमत्कारित्वमिति बोध्यम्। **शृंगारेति** । विप्रलंभेत्यर्थः । **अप्राधान्ये इति** । इतररसोपपादकत्वे इत्यर्थः। पार्यंतिकास्वादहेतुश्चात्र विप्रलंभः । स्वाधीनपतिकाया अपि गुरुसांनिध्यादिना क्रीडास्थानाप्राप्त्या खंजनमिथुनस्य निधिस्थानाप्राप्त्येव सुरतप्रतिबंधे तत्संभवात् । अत एव चात्र विधेयाविमर्शादयो न दोषाः । दुःखितकविनिबद्धोक्तौ दुःखातिशयव्यंजकत्वेन गुणत्वात् इति दिक् । **दोषाणां दुर्वारत्वादिति** । अयं भावः । अदोषत्वं यत्किंचिद्दोषाभाववत्त्वं यावद्दोषाभाववत्त्वं वा । नाद्यः । अव्यावर्तकत्वात् ।

प्रभाः–थापि सिद्धिरिति भावः। **रसवदलंकार इति**। वस्त्वलंकाररसरूपस्य त्रिविधस्यापि व्यङ्ग्यस्य वाच्योपस्कारकतयालंकारत्वमेवेति भामहोद्भटप्रभृतिचिरंतनालंकारिकमतेनेयं शङ्का । अर्वाचीना इत्यस्वरससूचनम् । तद्बीजं तु—वस्त्वलंकारप्रधानेषु काव्येषूक्तलक्षणस्याव्याप्तिः । न चेष्टापत्तिः । महाकविसंप्रदायभङ्गप्रसङ्गात् । लक्ष्यानुसारेण हि लक्षणव्यवस्था, न तु वैपरीत्येन । वर्णितानि च महाकविभिर्जलप्रवाहवेगादीनि कपिबालादिचरितानि चेति । यत्तु दोषरहितं काव्यं दुर्लभमिति ' न्यक्कारो ह्ययं ' इत्यादौ, ' तथाभूतां दृष्ट्वा ' इत्यादौ काव्यत्वं सर्वानुभवसिद्धं नोपपद्यत इति तत्रोच्यते—दोषत्वं ह्युद्देश्यप्रतीतिप्रतिबन्धकत्वम् । तच्चानुभवबलात्तत्तद्व्यङ्ग्यवाच्यवैचित्र्यप्रतीतिविरहविशिष्टदोषस्य तद्भानस्य चेति ' न्यक्कारः ' इत्यादौ विशिष्टाभावसंभवान्न काव्यत्वक्षतिः । यस्य च न व्यङ्ग्यवैचित्र्यप्रतीतिस्तं प्रति दुष्टत्वाभिप्रायेण तदुदाहरणम् । अत एव ' वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित् ' इति वक्ष्यते । तथा अप्रतीतत्वं

इदमिति काव्यम्, बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। अतस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य। यथा—

इदं i. e. Poetry. The learned Grammarians gave the style of Dhvani to Word, inasmuch as it is suggestive of the suggested thing viz. Sphoṭa, (the Revealer). Hence others also following their view (gave the style

प्रदीपः- ' कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥ ' इति ।

एवं चालंकारादिसत्त्वे उत्कर्षमात्रम् । नीरसे तु चित्रादौ काव्यव्यवहारो गौणः " इत्याहुः ।

अथास्य भेदांस्तल्लक्षणानि चाह—**इदमिति** । इदं काव्यं वाच्यादतिशयिन्यधिकचमत्कारकारिणि व्यङ्ग्ये उत्तमम् । पटादिभिः पदैः स्फोटरूपं शब्दब्रह्म व्यज्यते । तस्मादभिव्यक्तादर्थप्रत्ययः । तादृशस्य स्फोटव्यञ्जकस्य पटादिशब्दस्य ध्वनिरिति संज्ञेति वैयाकरणानां सिद्धान्तसरणिः । अतः प्रधानीभूतव्यङ्ग्यव्यञ्जकत्वसाधर्म्याद्गुणीभूतवाच्यं

उद्योतः-नांत्यः। काव्यत्वस्य प्रविरलविषयत्वापत्तेः। इदं काव्यं दुष्टमिति व्यवहारानापत्तेश्चेति । **कीटादीति** । अत एव तथाभूतामित्यादेर्न्यूनपदत्वदोषेण वक्ष्यमाणदोषवतोऽपि काकुसहकृतार्थव्यंग्यध्वनित्वं वक्ष्यमाणं संगच्छते । अन्यथा स्वलक्षणलक्षितकाव्यस्यैव ध्वन्यादिभेदवत्त्वेन तदसंगतिः स्पष्टैव । **इत्याहुरिति** । अत्रारुचिबीजं तु लक्षणे दोषपदं स्फुटदोषपरम् । स्फुटत्वं च रसोद्बोधविरोधित्वम् । एवं च तथाभूतामित्यादौ प्रतिपदजीवातुव्यंग्यवैचित्र्यप्रतीत्यादोषज्ञानतिरोधानाद्रसोद्बोधस्य सत्त्वेन काव्यत्वं तद्विशेषध्वनित्वं चाव्याहतमेव । यस्य तु व्यंग्यवैचित्र्यप्रतीतिविरहस्तं प्रति दुष्टत्वमेवेति दोषोदाहरणमप्यविरुद्धम् । एकस्यैव सामाजिकभेदेन काव्यत्वमकाव्यत्वं चेष्टमेव । यथाऽप्रतीतस्य तत्तच्छास्त्रज्ञं प्रत्यदुष्टत्वेन काव्यत्वमितरं प्रति अकाव्यत्वं तद्वत् । वक्ष्यति हि 'वक्त्राद्यौचित्यवशात् दोषोऽपि क्वचिद्गुणः ' इति । कीटादीत्यस्याप्ययमर्थः । यथा प्रतिभातिशयेन दोषतिरोधानान्न रत्नस्वरूपभंगः । तथा काव्येऽपि व्यंग्यवैचित्र्येणेति । वस्तुतस्तु अनुपहसनीयकाव्यत्वरूपलक्ष्यतावच्छेदकाक्रांतस्य हीदं लक्षणम् । दोषवत्युपहसनीयत्वस्य दुर्वारत्वात् । तथाभूतामित्यादेर्दुष्टस्यापि तादृशव्यंग्योदाहरणत्वे न क्षतिः । न हि तत्र ध्वन्युदाहरणप्रस्तावोऽस्ति । सामान्यकाव्यलक्षणं तु अदोषाघटितमेव । अत एव दुष्टं काव्यमित्यादेरुपपत्तिरित्याहुः । **भेदामिति** । भेदो विभागः । अत्रौत्तमत्वादिना तत्समानियतध्वनित्वादिना च विभागः । शेषं लक्षणम् । ननु निःशेषेत्यादौ वक्ष्यमाणदूतीसंभोगरूपव्यंग्यस्य पार्यंतिकविप्रलंभरूपव्यंग्यापेक्षया गुणीभावादाह—**वाच्यादिति** । शक्तिलक्षणाभ्यां बोधविषयादित्यर्थः । वाच्यार्थापेक्षयांतरालिकव्यंग्योत्कर्षानुत्कर्षाभ्यां ध्वनिगुणीभूतव्यंग्यत्वव्यवस्थेति भावः । **पटादिभिः पदैरिति** । क्रमोपलभ्यमानतद्घटकैर्वर्णैरित्यर्थः । **स्फोटरूपमिति** । अखंडमेकं वाचकमित्यर्थः । अयं भावः । एकस्मात्पदादयमर्थो बुद्ध इति व्यवहारात् एकमखंडं मध्यमावस्थं वाचकम् । पराख्यस्य ब्रह्मणो नाभौ पश्यंत्याख्यो

प्रभाः-तच्छास्त्रज्ञं प्रत्यदोषः, अन्यं प्रति तु दोष इति 'कीटानुविद्ध-' इत्यस्यापि रसादिवैचित्र्ये दुष्टस्यापि काव्यत्वम् । विशिष्टदोषविरहादिति तात्पर्यमिति दिक् ॥

अथेति । सामान्ये ज्ञाते विशेषजिज्ञासोदयादिति भावः । प्रकाशे भेदपदं भावकरणव्युत्पत्तिभ्यां विभागविशेषलक्षणोभयपरं व्याख्यातम् । उत्तमस्य ध्वनिसंज्ञायां हेतुमाह—**पटादिभिरिति** । पटशब्देन पूर्वपूर्ववर्ण-

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ २ ॥

(अमरुशतक, १०५.)

of Dhvani) to the pair of Word and Sense such as are capable of suggesting a sense eclipsing the Expressed sense. For instance,

The sloping ends of your breasts have the sandal on them completely wiped out; the lower lip has the rouge washed off; the eyes are without collyrium in their farthest portions; and here your slender body is in horripilation. O go-between, who are a liar, and by whom the kinsman's experience of annoyance remains ungauged, from here you went over, for a bath, to the well but never towards that *wretch.* (2)

प्र०:-यद्व्यङ्ग्यं तद्व्यञ्जनक्षमस्य शब्दार्थयुगलरूपस्योत्तमकाव्यस्य बुधैर्ध्वनिपण्डितैर्ध्वनिरिति संज्ञा कृता। यथा-**निःशेषेति**।

उद्योतः-विवर्तस्ततो हृदयावच्छेदेन मध्यमाख्यः स एव पटादिपदात्मकवैखर्या ध्वनिरूपया स्वरूपरूपितत्वेनाभिव्यंजितो वाचकः। वैखर्यात्मकस्य चाशुविनाशित्वादर्थाप्रत्यायकत्वेन ध्वनितुल्यतेति ध्वनित्वव्यवहार इति वैयाकरणमतं मंजूषायां प्रतिपादितमस्माभिः । **व्यंग्यव्यंजकत्वेति** । एतेन वैयाकरणानामपि व्यंजनाभ्युपगमो दर्शितः । **गुणीभूतवाच्यमिति** । बहुव्रीहिः । **निःशेषेति** । वापीस्नानव्याजेन नायकसंभोगचिह्नानि गोपयंतीं दूतीं प्रति विदग्धोत्तमनायिकाया उदासीनप्रतारणाय स्नानकार्यत्वप्रतिपादनमुखेनैव संभोगचिह्नोद्घाटिकेयमुक्तिः । एतेन स्नानस्य दूत्यभ्युपगतत्वे दूतीनिवेदितयोः स्नानतदंतिकगमनयोरन्यतरस्य सत्यत्वेऽपरस्यापि सत्यत्वापत्तौ तदंतिकगमने मिथ्यात्वोपन्यासो निर्बीज इत्यपास्तम् । असत्येऽपि स्नाने सत्यत्वारोपस्याविदग्धजनप्रतारणोपयोगित्वात् । एवं तदंतिकगमने मिथ्यात्वप्रतिपादनस्यापि । मिथ्यावादिनि । तदंतिकमगत्वैव मया गत्वा बहुधा प्रसाधितोऽपि नागत इति वादिनि । दूति । न तु सखि । मत्प्रतारणादिकर्तृत्वात् । बांधवजनस्य । मल्लक्षणस्य । पीडाजनकं तदुद्देश्यासंपादनादिति ज्ञानशून्ये । इतः । मत्सकाशात् । वापीमिति । स्नानकालातिक्रमभयात् नदीमदीयप्रिययोरातिकमगत्वैवेत्यर्थः । तस्य । परवेदनानभिज्ञस्य । पुनरेवार्थे । नैवेत्यर्थः । अधमस्य । बहुधा कृतापराधस्य । स्वशरणारक्षकस्य वा । स्नानोपपादकमाह-**निरिति** । यतस्तव स्तनयोस्तटं प्रांतदेशः निःशेषं यथा स्यात्तथा च्युतं स्खलितं चंदनं यस्मात्तथा । न तु उरस्स्थलं नापि संध्यादिरूपनिम्नोन्नतभागोऽपि । वाप्या गंभीरजलाशयत्वात् पिच्छिलतीरत्वात् तद्गतबहुलयुवजनत्रपापारवश्यादंसद्वयलग्नाग्रस्वस्तिकीकृतभुजलतायुगलेन तटस्यैवोन्नततया परामर्शात् । अत एव च्युतं न तु च्यावितं क्षालितं वा । व्यंग्यपक्षे तु तत्रैव मर्दनाधिक्यात् । संध्यादौ नायककरपरामर्शायोगाच्च । एवमुत्तानतया बहलजलसंबंधाद्रदनशोधनांगुल्यादीनामधिकसंमर्दवहनाच्चाधर एव नितरां मृष्टरागः । नत्वीषत् । न तूत्तरौष्ठः । न्युब्जतया तत्संबंधमांद्यात् । त्वरया सम्यगक्षालनाच्च । व्यंग्यपक्षे तु चुंबनविधेः उत्तरौष्ठे तन्निषेधाच्च तत्रैव तत्कृतं तथात्वम् । नेत्रे दूरं प्रांतभाग एवानंजने । स्नानकाले मुद्रणात् मध्ये जलसंबंधाभावात् । दूरमत्यर्थमिति त्वयुक्तमेव । व्यंग्यपक्षे प्रांत एव चुंबनविधेः मध्ये तन्निषेधाच्च तत्रैवानंजनत्वम् ।

प्रभाः-संस्कारसहकृतोन्त्यवर्ण एवोच्यते। पद्यतेऽनेनेति व्युत्पत्तेः। **स्फोटेति**। स्फुटयत्यर्थमिति स्फोटः। स च तावद्वर्णो-

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते ।

Here the word ADHAMA suggests with prominence:-You went certainly to him in order to dally.

प्रदीपः-अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते । नन्वत्र मुख्यार्थबाधाद्विपरीतलक्षणया तदन्तिकमेव गतासीति लक्ष्यमेव युज्यते, न तु व्यङ्ग्यम् । अन्यथा '**साहेन्ती**' इत्यादिवक्ष्यमाणलक्षणामूलव्यञ्जनोदाहरणेऽपि विपरीतलक्षणा न स्यात्, विशेषाभावादिति । अत्र केचित्--'सत्यमत्र विपरीतलक्षणा । वृत्तिग्रन्थस्तु तदन्तिकमेव गतासीत्यत्र लक्ष्यत इति शेषकल्पनया योजनीयः । व्यज्यत इति रन्तुमित्यनेनैवान्वीयते' इत्याहुः । परमार्थतस्तु न खलु मुख्यान्वयायोग्यत्वं स्वरूपसल्लक्षणावीजम्, किं तु ज्ञातम् । तथा च यत्र सख्यादेः प्रसाध्यकामुकादिसंभोगः प्रमाणान्तरेण श्रोतुः प्रतीतिमुपगतस्तत्र मुख्यार्थबाधादस्तु लक्षणा । तदभिप्रायेण 'साहेन्ती सहि सुहअं,' 'उपकृतं बहु नाम' इत्युदाहृतम् । यत्र तु प्रमाणान्तरं न तज्ज्ञापकमवतरति तद्वाक्यजनितप्रत्ययमहिम्नैव तु तत्प्रत्ययस्तत्र कथं लक्षणा । बाधाभावात् । उत्पन्नेऽपि वाक्यार्थबोधे भवन्नपि बाधोऽकिंचित्कर एव ।

उद्योतः-इयं तव तनुःतन्वी कृशा स्नानोत्तरमभोजनात् । अत एव पुलकिता जनभयादंगजलादूरीकरणात् । पुलको रोमोद्गमः । व्यंग्यपक्षे कार्श्यं सुरतश्रमात् । पुलकश्च तत्रानुभूताद्भुतरसस्मरणात् । असंपूर्णरतत्वाद्वा । स्नानसाधारण्यसंपादनाय वापीमित्युक्तम् । न तु गृहं सर इति वा । (शार्दूलविक्रीडितं छन्दः ।) अत्र यदकृतज्ञायां बांधवबुद्धिर्यच्च तस्मिन्नधमे तथा प्रेम तद्युक्तमेवमप्येवंविधवंचनापात्रत्वमितीर्ष्याहेतुकविप्रलंभसंचारिनिर्वेदध्वनिः । तदनुगुणश्च दूतीभोगः । चंदनच्यवनादीनां च वाच्यानां व्यंग्यानां च परिरंभचुंबनाद्यनुभावानां संभोगोत्कर्षद्वारेणेर्ष्याया उत्तेजकानां निर्वेदोत्कर्षकत्वमित्यन्यत्र विस्तरः । **प्राधान्येनेति** । तृतीयाथा वैशिष्ट्यम् । इतिपदार्थे व्यंग्येऽन्वेति । प्राधान्यं चेतरनायिकोसंभोगस्य विप्रलंभोद्दीपकत्वेन वाच्यापेक्षयाऽतिशयितत्वात् । प्राधान्यविशिष्टेनाधमपदेनेति तु न युक्तम् । तत्कथनानुपयोगात् । अधमपदेनेत्युक्त्यैव तल्लाभाच्च । ध्वनित्वोपपादकतया व्यंग्यप्राधान्यस्यैव प्रकृतत्वाच्चेत्याहुः । **अधमपदेनेति** । अयं भावः । विदग्धाया गूढतात्पर्ययाऽनया वाचोयुक्त्या स्नानसाधारण्येनैतेष्वर्थेष्ववगतेषु वक्तृबोद्धव्यादिवैशिष्ट्यबलात् दुःखप्रयोजककर्मशीलत्वरूपाधमपदार्थघटककर्मपदार्थो वाच्यतादशायां कर्मान्तरसाधारण्येनावस्थितोऽपि व्यंजनया दूतीसंभोगरूपतादृशकर्माकारेण पर्यवस्यतीति । इदमेवाधमपदस्य अधमपदेनेत्युक्तिध्वनितं प्राधान्यम् । झटिति इतरानपेक्षतया व्यंग्यबोधकत्वाच्च । चन्दनच्यवनादीनां तु स्नानकार्यतया निबद्धानां योग्यतया संभोगांगभूताश्लेषचुंबनादिकार्यत्वस्यापि प्रतिसंधाने सति तद्व्यंजनद्वारा तत्साहित्येनैव संभोगगमकत्वमिति विशेषः । एतेन नीचकर्मकारित्वस्याधमपदवाच्यस्य साधकं व्यंग्यमित्यपास्तम् । दूतीप्रेषणसापेक्षत्वेन विस्मृतप्रेमतयाऽपि तत्संभवात् । अत्र विप्रलंभस्य प्रधानतया निःशेषेत्यादिवाक्येषु तवेत्यध्याहारेऽपि न न्यूनपदतादोषः । उक्त्यसामग्र्यस्य निर्वेदातिशयव्यंजकत्वेन गुणत्वात् । अत एव विधेयाविमर्शोऽपि न दोष इति दिक् । **मुख्यार्थबाधादिति** । स्नानस्यावास्तवत्वाद्बाधः इति भावः । **किं तु ज्ञातमिति** । व्यंग्यार्थेऽवगते बाधज्ञानं त्वकिंचित्करम् । **बाधाभावादिति** । वाक्यार्थबोधात्प्राक् बाधानवतारादित्यर्थः । **उत्पन्ने चेति** । उत्पन्ने त्वित्यर्थः

प्रभाः-पाध्यनुगतब्रह्मरूप इत्यर्थः । तदव्यभिव्यक्तिश्च तद्विषयाज्ञाननिवृत्तिः । **मुख्यार्थबाधादिति** । वापीस्नानगमनरूपवाच्यार्थबाधादित्यर्थः । अध्याहारोऽन्वयक्लेशो व्यङ्ग्यस्य लक्षणामूलत्वादधमपदेनेत्युक्तेरसामञ्जस्यं चेत्यरुचिः केचिदित्यत्र बोध्या । प्रसाध्यो नायिकाभिमुखीकार्यः । तज्ज्ञापकं बाधकज्ञापकम् । **बाधाभावादिति** । वाक्यार्थ-

(6)

(२) मध्यमकाव्य called गुणीभूतव्यङ्ग्य

(सूत्र ३) अताद्दशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

अताद्दशि वाच्यादनतिशयिनि । यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ ३ ॥

(Cited in रुद्रटालंकार)

When the Suggested sense is not of that description (i. e. prominent), there results Poetry of the medium type in which the Suggested sense is subordinate. e. g.

ATADṚŚI i. e. not eclipsing the Expressed sense.

The looks of the young lady became extremely sad as she looked, time and again, at the village-youth with the new Aśoka-blossom in his hand. (3)

प्रदीपः-तदभिप्रायेण 'वापीं स्नातुम्' इत्युदाहृतम् । अत एवोक्तं 'अधमपदेन व्यज्यते' इति । अत एव च यत्र सख्यादेस्तादृशत्वं न प्रमाणान्तरेणावगतं तत्र न 'साहेन्ती' इत्यादौ विपरीतलक्षणा व्यङ्ग्यार्थप्रतीतिर्वा । वापीं स्नातुमित्यादौ तु बाधानवतारेऽप्यधमपदार्थपर्यालोचनया यथोक्तं व्यङ्ग्यं प्रतीयत एव इत्येव प्राधान्यमधमपदस्य । तस्मात् 'साहेन्ती' इत्यादौ यदि व्यञ्जना तदा लक्षणामूलैव । वापीं स्नातुमित्यादौ तु न नियमः ।

अताद्दशीति । अताद्दशि वाच्यादनतिशयिनि अतिशयितचमत्कारानाधायके व्यङ्ग्ये मध्यमं काव्यम् । तद्गुणीभूतव्यङ्ग्यम् । कथितमित्यनुषज्यते । अत्र व्यङ्ग्ये स्फुटव्यङ्ग्य इत्यर्थः । तेन नाधमकाव्यातिव्याप्तिरिति केषांचिन्मतमयुक्तम् । 'अगूढमपरस्याङ्गम्' इत्यादिना गुणीभूतव्यङ्ग्यप्रभेदत्वेन प्रतिपादयिष्यमाणस्यास्फुटव्यङ्ग्यस्याsसंग्रहापत्तेः । किं त्वस्फुटतरातिरिक्तव्यङ्ग्यपरं व्यङ्ग्यपदम् । गुणीभूतव्यङ्ग्ये चास्फुटमात्रं व्यङ्ग्यम् । अधमकाव्ये त्वस्फुटतरं तद्विरह एव वेति न काचिदनुपपत्तिः । उदाहरणम्--**ग्रामेति** ।

उद्योतः-न च तात्पर्यविषयतदंतिकगमनान्वयानुपपत्त्या लक्षणेति वाच्यम् । विदग्धाया वैदग्ध्यरक्षायै अविदग्धजनप्रतारणाय च स्नानप्रतीतिमुखेन तत्प्रकाश एव तात्पर्यात् । **अनतिशयिनीति** । अनतिशयश्च न्यूनत्वेन तुल्यत्वेन चेति बोध्यम् । **अस्फुटमात्रमिति** । मात्रपदेनास्फुटतरमेव व्यावर्त्यत इति बोध्यम् । संकेतस्थले व्यासंगवशेनानागतां स्वीयतत्स्थलगमनं ज्ञापयितुं तत्रत्यवंजुलमंजरीमादायोपस्थितं नायकं दृष्ट्वा विषण्णाया विप्रलंभवर्णनमिदं-**ग्रामतरुणमिति** । ग्रामे एकस्तरुणः । तेन ग्रामस्थसकलयुवतिजनप्रार्थ्यमानतया दुर्लभत्वं व्यज्यते । तरुण्या इति । द्वयोस्तरुणत्वेन परस्परानुरागोत्कर्षो व्यज्यते । नवेत्यादि मलिनीभावोपपादकं विशेषणम् । वंजुलोऽशोकः । नवेत्यनेन नूतनवस्तुनः करग्रहणस्यौचित्येनावितर्कणीयता । सनाथो युक्तः नाथसहितः । तेनातिशोभाशालितया नायिकया दर्शनेऽपि अवितर्कणीयता । मुहुः वारंवारम् । जनताभयेन दर्शने सातत्यविरहात् । पश्यंत्या भवतीति वर्तमाननिर्देशाभ्यां दर्शनमलिनीभावयोरविरामः सूच्यते । ग्रामतरुणं मुहुः पश्यं-

---

प्रभाः-बोधात्प्रागित्यादिः। अत एव एवमभिप्रायादेव । अन्यथा लक्षणयैव प्रयोजनीभूतव्यङ्ग्यप्रतीतेरिति भावः । अत एवज्ञातस्यैव बाधस्य लक्षणाबीजत्वादेव। ताद्दशत्वं कामुकोपभुक्तत्वम् । इत्येव प्राधान्यं इतरनिरपेक्षनियतव्यञ्जकत्वरूपम् । एतेन प्राधान्येनेत्यधमपदेनान्वितमिति दर्शितम् । **लक्षणामूलैवेति** । गमकान्तराभावादित्यर्थः । **न नियम इति** । लक्षणानवतारेऽप्यधमपदेनैव व्यञ्जनसंभवादिति भावः ॥

अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यङ्ग्यं गुणीभूतम् । तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ।

(7)

(३) अधमकाव्य called चित्रकाव्य

(सूत्र ४) शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥ ५ ॥

चित्रमिति गुणालंकारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् । अवरम् अधमम् । यथा—

Here the Suggested sense--She who had made an appointment to meet in the Vañjula arbour did not turn up—is subordinated owing to the Expressed sense itself being striking in comparison to it (i. e. the Suggested sense).

The lowest type of Poetry is that which is void of a Suggested sense and is picturesque either in Word or Sense.

CHITRA is what possesses Excellences and Figures. AVYAṄGA is what is devoid of a sense such as is *distinctly* suggested. AVARA i. e. the lowest. e. g.

प्रदीपः-अत्र वञ्जुललतागृहे दत्तसंकेता तरुणी नागतेति व्यङ्ग्यम् । तच्च गुणीभूतम् । तदपेक्षया वाच्यस्यैव चमत्कारित्वात् । यतः पश्यन्त्या नितरां मुखच्छाया मलिना भवतीत्यनेन दर्शनकाल एव तत्कार्यं मालिन्यं तस्यातिशयः संतन्यमानता चेति वाच्यं प्रतीयत इति ।

शब्दचित्रमिति । अत्र चित्रमित्यध्याहार्यम् । तेनाव्यङ्ग्यं काव्यमवरमधमम् । तच्चित्रमिति कथितमित्यर्थः । अव्यङ्ग्यं अस्फुटतरातिरिक्तव्यङ्ग्यरहितम् । तादृशं चास्फुटतरव्यङ्ग्यसद्भावे व्यङ्ग्यमात्राभावे वा । चित्रं गुणालंकारयोगि ।

उद्योतः-त्यास्तरुण्या मुखच्छाया मलिना भवतीति संबंधः। छाया कांतिः(आर्या छन्दः।)**दत्तसंकेतेति**। स्वयमेव संकेतं कृत्वा विफलीकृत इत्यनुतापातिशयो मालिन्यकारणम् । गुणीभूतत्वे हेतुमाह–**तदपेक्षयेति** । चमत्कार आस्वादः । **तस्यातिशय इति** । पौर्वापर्यविपर्ययलक्षण इत्यर्थः । तदुपपादकं दर्शनकाले एव तत्कार्यं मालिन्यमिति । तद्रूप इत्यर्थः । यद्वा नितरांपदप्रतिपाद्यो मालिन्यस्यातिशय इत्यर्थः । **वाच्यं प्रतीयत इति** । अत्र व्यंग्येन संकेतभंगेन वाच्यमुखमालिन्यातिशयरूपानुभावमुखेनैव विप्रलंभाभासपोषणं न केवलेन । संकेतभंगस्याकर्तव्यत्वबुद्ध्याऽपि संभवादिति तदनतिशायित्वं व्यंग्यस्येति भावः । निःशेषेत्यत्र तु बोध्यदूतीवैशिष्ट्येनाधमपदेन च व्यक्तसंभोगेनैव निर्वेदद्वारा विप्रलम्भपोषकत्वमिति बोध्यम् । पर्यन्तव्यंग्यविप्रलंभाभासेन तु अस्यापि ध्वनित्वमेव । वाक्यार्थरसयोरंतरालभवव्यंग्योत्कर्षापकर्षाभ्यामेव ध्वनिगुणीभूतव्यंग्यत्वव्यवस्थितेः । पार्यंतिकरसादिमादाय ध्वनित्वं तु सर्वत्रेष्टमेवेति दिक् । **अध्याहार्यमिति** । अन्यथा पूर्वयोरिवास्य संज्ञान्तराकरणान्न्यूनता स्यादिति भावः । ननु व्यंग्यरहितकाव्यमप्रसिद्धम् । पार्यंतिकरसादिव्यं-

प्रभाः-**वाच्यस्यैवेति** । व्यङ्ग्यं तु न तत्सिद्ध्यङ्गम् । वाच्यमेव तु विप्रलम्भपोषकतया चमत्कारे प्रधानमिति भावः । संतन्यमानता चिरकालानुवृत्तिः । सा च भवतीति वर्तमाननिर्देशात्, मुहुर्मलिना भवतीत्यन्वयाच्चेति ज्ञेयम् **अध्याहार्यमिति** । चित्रसामान्योक्त्यनन्तरमेव तद्विभागकथनौचित्यादिति भावः । **वृत्तीति** । 'छेकवृत्तिगतो

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ ४ ॥ (?)

May the Ganges at once (AHNĀYA) break up your nescience (MANDATĀM)—Ganges–in which their bath and daily ablutions are performed ecstatically by the great sages, whose nescience is deadened by the jets of water, that spurts spontaneously, that is clear, and that grows impetuous as it rushes into the cavities of the bank–in whose channels there leap the mighty frogs–and whose insurgence grows tremendous with the mighty waves that are given an impetus (UDREKA) by the collapse of the trees tall and stupendous.

प्रदीपः-शब्दचित्रं यथा--**स्वच्छन्देति** ।

वृत्त्यनुप्रासोऽत्र शब्दालंकारः । ननु कथमेतदव्यङ्ग्यमुच्यते । मन्दाकिनीविषयाया प्रीतेरभिव्यक्तेः । किं च नास्त्येव स काव्यार्थो यस्य न व्यञ्जकत्वमन्ततो विभावत्वेनापीति चेत्, सत्यम् । किं तु तद्व्यङ्ग्यमस्फुटतरम् ।

उद्योतः-ग्यशून्यस्य प्रहेलिकात्वादत आह–**अस्फुटतरेति** । ईषत्त्वस्य तत्र नञर्थत्वात् । अव्यंग्यं अस्फुटतरव्यंग्यमित्यर्थ इत्येके । **गुणालंकारयोगीति** । तन्मात्रं न तु रसादिरूप आत्मा काव्यस्यास्ति इति भावः । तदुक्तम्–रसादिरात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, अलंकाराः कटकादिवत्, शब्दार्थौ च शरीरमिति । अत्राहुः–अर्थो ह्यंतरंगं शरीरं तत्रैव कविसंरंभात् । अत एव यत्र कविकल्पितो न कश्चिदंशस्तत्राकाव्यत्वं वदंति सहृदयाः । शब्दस्तु तेन विनार्थस्य स्थापयितुमशक्यत्वात् उपचारितं शरीरम् इति । इदमेव च चित्रसाम्यम् । चित्रलिखिततुरगादौ तुरगबुद्धिवत् अस्यापि काव्यत्वबुद्धिरित्यधमत्वामिति । **स्वच्छन्देति** । मंदाकिनी गंगा वः युष्माकं मंदतां अज्ञानं पापं वा अह्नाय झटिति भिद्यादिति योजना । तीर्थान्तराद्व्यतिरेकं दर्शयितुं विशिनष्टि स्वच्छन्देति । स्वच्छंदं स्ववशं न तु वात्यादिपरतन्त्रं यथा स्यात्तथा उच्छलत् उद्गच्छत् । अंबुविशेषणम् । तेनांबुबाहुल्याद्गांभीर्यलाभः । अच्छं निर्मलम् । कच्छस्य जलप्रायदेशस्य । कुहरे तरंगकृतबिले । छातं दुर्बलम् । तदितरत् वेगातिशयेन बलवत् । इदमप्यम्बुविशेषणम् । अंबुनश्छटा परम्परा तया मूर्छन् विनश्यन् मोहोऽज्ञानं येषाम् । अत एव हर्षः । स्नानस्याह्निकत्वेन लाभेऽपि प्राधान्यात्पृथगुपन्यासः । नद्यन्तराद्व्यतिरेकं दर्शयितुं पुनर्विशिनष्टि–उद्यंतः प्रकाशमानाः उदारा महांतो दर्दुरा भेका यासु एवंविधा दर्यः कंदरा यस्यां सा तथा । दीर्घा आयताः अदरिद्राः शाखादिबाहुल्येनाकृशा ये द्रुमास्तेषां मदन्योऽपि दीर्घ इति द्रोहः पातनकारणं तेन उद्रेकः ऊर्ध्वप्रसरणं तद्युक्ता ये तरंगास्त एव मेदुरमदो निबिडाहंकारो यस्याः । महोर्मीति पाठे तेन उद्रेको येषामीदृशा ये महोर्मय इति व्याख्येयम् । (शार्दूलविक्रीडितं छन्दः ।) **स्मृत्यौत्सुक्यादयः संचारिणः** । इदमुपलक्षणम् । महर्षिसेवनादिना तीर्थान्तराद्व्यतिरेकोऽपि व्यंग्यो बोध्यः ।

प्रभाः-द्विधा' इति नवमेऽनुप्रासद्वैविध्योक्तेरयं वृत्त्यनुप्रास उच्यत इत्यर्थः। **विभावत्वेनापीति**। चमत्कारनैयत्येनाङ्ग-

विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ॥ ५ ॥

(मेण्ठ's हयग्रीववधनाटक ?)

Amarāvatī—when its latch was swiftly swung down by Indra in confusion, on hearing that he (Hayagrīva) the subduer of the pride (of enemies) had emerged, though by chance, from his palace,—*appeared* to close her eyes in panic. (5)

प्रदीपः-यद्वा तत्र न कवेस्तात्पर्यम् । अनुप्रासमात्र एव तस्य संरम्भात् । तात्पर्यविषयीभूतव्यङ्ग्यविरहवत्त्वमेव चाव्यङ्ग्यपदेन विवक्षितम् । यदुक्तं ध्वनिकृता--

' रसभावादिविषयविवक्षाविरहे सति ।
अलंकारनिबन्धो यः स चित्रविषयो मतः ॥ ' इति ।

अत्र पक्षे मध्यमकाव्यलक्षणे व्यङ्ग्यपदं विवक्षितव्यङ्ग्यपरं द्रष्टव्यम् । अर्थचित्रं यथा--**विनिर्गतमिति** । अत्रोत्प्रेक्षालंकार इति प्राञ्च उदाहरन्ति । परं तु रसादौ कथं तात्पर्यविरहोऽस्फुटतरत्वं वा तत्र ज्ञायते । हयग्रीवस्य वर्णनीयतया तत्प्रभावस्य स्फुटं प्रतीतेः । मदीयं तु पद्यमुदाहरणीयम् । यथा--

उद्योतः-**विभावत्वेनापीति** । उद्दीपनविभावत्वेनापीत्यर्थः । **अस्फुटतरमिति** । उद्भटालंकारकृतोत्कर्षेण चित्तापकर्षात्तत्प्रतीतिव्यवहितप्रतीतिकत्वादिति अभिमानः । न चायमनुप्रासो न मंदाकिनीविषयकभावानुगुणः । स्वच्छंदोच्छलदुदारदर्दुरेत्यादिश्रुतिकटुपुष्टार्थपदनिष्ठत्वात् इति वाच्यम् । तटभंगादिगम्यगंगानिष्ठौजःप्रकाशकतया श्रुतिकटुपुष्टार्थपदघटितविकटवर्णदीर्घसमासादेर्गुणत्वेन तदनुप्रासस्याऽपि भावानुगुणत्वादिति दिक् । पार्यंतिकं व्यंग्यमादाय ध्वनित्वस्य सर्वत्रेष्टतया मध्यमव्यंग्यमादायैव त्रैविध्यस्योपपादनीयत्वेऽपि व्यतिरेकं व्यंग्यमादाय शब्दचित्रमात्रोदाहरणत्वं चिंत्यम् । **विनिर्गतमिति** । यं प्रकृतं हयग्रीवं मानदं शत्रुमानखण्डकं मित्रमानदातारं विनिर्गतं न तु प्रस्थितं नाप्यमरावत्यां प्रविष्टम् । यदृच्छया । अमरावतीविजयाविषयिण्याऽपि यया कयाचिदिच्छया । उपश्रुत्य कर्णोपकर्णिकया श्रुत्या न तु दूतमुखेन । ससंभ्रमेण सभयेन इन्द्रेण अव्याहतैश्वर्येणापि स्वयमेव । दौवारिकाह्वाने विलंबासहत्वात् । द्रुतं शीघ्रं पातिता यथाकथंचिन्निक्षिप्ता न तु विश्रब्धं निहिता । अर्गला न तु कपाटफलके एव लापितें इति भावः । उपश्रुत्येति पातनक्रियया समानकर्तृकम् । अत्र मरावतीत्यश्लीलम् । (वंशस्थं वृत्तम् ।) **अत्रोत्प्रेक्षेति** । नायकेंद्रभयप्रदर्शनप्रभूतममरावतीस्त्रीभयमपि वीररसपोषकृदित्यस्या अलंकारत्वं बोध्यम् । एतेन संशयरूपाया उत्प्रेक्षाया अंशतो भयाभावप्रापकत्वस्यापि सत्त्वान्न वीररसानुगुणत्वमित्यपास्तम् । भावांशे एवोत्कटकोटिकत्वेनादोषात् । **रसादाविति** । अत्र वीररसः । तस्य हयग्रीव आलंबनम् । प्रतिपक्षेंद्रभयमुद्दीपनम् । मानखंडनमनुभावः । यदृच्छासंचरणगम्या धृतिः संचारिणी । आदिना प्राक्श्लोकीयभावपरि-

प्रभाः-तस्यालम्बनत्वे तद्व्यञ्जकत्वस्यावश्यंभावादित्यर्थः । **अस्फुटतरमिति** । उद्भटानुप्रासचमत्कारेण पुरःस्फूर्तिकेन व्यङ्ग्यस्याच्छादनादिति भावः । विवदमानं प्रति परिहारान्तरमाह—**यद्वेति** । चमत्कारिकत्वेन न तात्पर्यमित्यर्थः । संरम्भ उद्यमः । वस्तुतस्तु चमत्कृतेऽपि व्यङ्ग्ये कदाचित्कवेरतात्पर्यसंभवादतिप्रसङ्ग इति प्रथम एव पक्षः साधुरिति बोध्यम् । **रसादाविति** । हयग्रीवगते वीररसे तद्विषयस्तुतौ वेत्यर्थः । वीररसस्य हयग्रीव आलम्बनमिति केषां-

इति काव्यप्रकाशे काव्यप्रयोजनकारणस्वरूपविशेषनिर्णयो नाम प्रथम उल्लासः ॥ १ ॥

Thus ends the First Flash named the Determination of the Purpose, Cause, Nature and Varieties of Poetry.

प्रदीपः-

मध्येव्योम स्फुरति सुमनोधन्वनः श्यानचक्रं
मन्दाकिन्या विपुलपुलिनाभ्यागतो राजहंसः ।
अह्नश्छेदे त्वरितचरणन्यासमाकाशलक्ष्म्याः
संसर्पन्त्याः श्रवणपतितं पुण्डरीकं मृगाङ्कः ॥

अत्र रूपकमर्थालंकारः । तन्मात्रे तात्पर्यं, न तु रसादौ ।

इति महामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे काव्यलक्षणनिर्णयः प्रथम उल्लासः ।

उद्योतः-ग्रहः। **मध्येव्योमेति।** व्योम्नो मध्ये इत्यर्थः । सुमनोधन्वा कामः श्यानचक्रं चक्राकारं शस्त्रतैक्ष्ण्यसंपादकं पाषाणजयंत्रमुच्यते । पुलिनं तीरम् । तत्राभ्यागत इत्यर्थः । अह्नश्छेदे सायंसमये । त्वरितः चरणन्यासो यस्मिन्कर्मणि तथा संसर्पन्त्याः । स्त्रीत्वेन भयवशात्त्वरितगमनम् । मृगांकः चन्द्रः स एव श्यानचक्रमित्यर्थः । तथा स एव राजहंसः पुंडरीकं चेत्यर्थः । मंदाक्रांता छन्दः ।

इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते काव्यप्रदीपोद्योते प्रथम उल्लासः ।

प्रभाः-चिदुक्तेरभिप्रायं न विद्मः। इन्द्राद्यालम्बनो हि हयग्रीवगतो वीररस इति वक्तुमुचितम् । **मध्य इति।** व्योममध्य इत्यर्थः । शाणचक्रं शस्त्रतैक्ष्ण्यजनकपाषाणचक्रम् । पुलिने तीरेऽभ्यागत इत्यर्थः । छेदे समाप्तौ । रूपकं मालारूपकम् ॥

इति श्रीमत्तत्सदुपाख्यरामचन्द्रभट्टसूरिवरसूनुवैद्यनाथभट्टकृतायां प्रदीपप्रभायां प्रथम उल्लासः ॥

द्वितीय उल्लासः ।

क्रमेण शब्दार्थयोः स्वरूपमाह—

(8)

Three Classes of Word.

(सूत्र ९) स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

अत्रेति काव्ये । एषां स्वरूपं वक्ष्यते ।

(9)

Three Classes of Sense.

(सूत्र ६) वाच्यादयस्तदर्थाः स्युः,

Second Flash.

The author states, in order, the nature of Word and Sense:—

Word, *here*, is of three kinds:—Expressive, Indicative, and Suggestive.

ATRA i. e. in Poetry. Their nature will be described (later).

What are known as Senses, Expressed or otherwise, should be attributed to them.

अथ काव्यप्रदीपे द्वितीय उल्लासः ।

प्रदीपः-अथ काव्यलक्षणपदार्थेषु स्वरूपलक्षणादिभिर्विवेक्तव्येषु शब्दार्थयोः प्राधान्यात्प्रथमं तयोः स्वरूपं निरूपयिष्यन्विभागमाह--**स्याद्वाचक इति** ।

शास्त्रे व्यञ्जकः शब्दो न प्रसिद्ध इत्यत उक्त**मत्रेति** । अत्रेति काव्ये ।

उद्योतः-

उद्योते द्वितीय उल्लासः ।

स्वरूपलक्षणादिभिरिति । यथा 'योऽभिधत्ते स वाचक इति' स्वरूपम् । तथा अभिधावृत्त्वं लक्षणम् । एवमन्यत्राप्यूह्यम् । आदिना विभागः । **प्राधान्यादिति** । काव्यत्वाश्रयत्वेन लक्षणघटकेतरपदार्थमपेक्ष्य तयोः प्राधान्यम् । अर्थस्य व्यंजकत्वेऽपि शब्दसहकारितयैव तस्य तत्त्वाल्लक्षणवाक्ये शब्दस्य प्रथमं निर्देशस्तस्य प्राधान्यसूचनाय । **स्वरूपमिति** । विभागानंतरं तन्निरूपणस्य सांप्रदायिकत्वादिति भावः । सामान्यलक्षणं तु शब्दत्वजातिमत्त्वं शब्दस्य, तदभिधेयत्वं चार्थस्य प्रसिद्धमेव । एकवचनं सामान्याभिप्रायेण । सामान्यं च वाचकादिस्वरूपेष्वंततोऽन्यतमत्वं बोध्यम् । तत्र लाक्षणिकव्यंजकयोर्वाचक उपजीव्यः । व्यंजकस्य वाचकलाक्षणिकाविति उपजीव्यक्रमेणोपन्यासः । **त्रिधेति** । वाचकत्वाद्युपाधौ त्रित्वं बोध्यम् । शास्त्रे । वैशेषिकादौ । **लाघवा**-

---

प्रभाः-

प्रभायां द्वितीय उल्लासः ।

अथेति । काव्यलक्षणताद्विशेषकथनानन्तरमित्यर्थः । पदार्थेषु दोषाभावादिषु । स्वरूपं विभागः । आदिना दोषगुणादिव्यवस्थादिसंग्रहः । प्राधान्याद्विशेष्यत्वरूपात् । स्वं रूप्यतेऽनेनेति स्वरूपं लक्षणम् । विभागोत्तरं लक्षणाभि-

वाच्यलक्ष्यव्यङ्ग्याः ।

(10)

The Theory of तात्पर्यार्थ.

(सूत्र ७) तात्पर्यार्थोऽपि केषुचित् ॥ ६ ॥

आकाङ्क्षा–योग्यता–सन्निधि–वशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् ।

The Expressed, Indicated and Suggested :(are the senses).

The Purport also is an additional sense in (the opinion of) some.

It is the view of the ABHIHITĀNVAYAVĀDINs that, when word-senses, whose nature is to be described (later), are combined owing to Expectancy, Compatibility and Proximity, there arises (the so-called) Purport-sense of peculiar constitution which, though not the sense of the (individual) words, is yet the sense of the sentence (taken as a whole).

प्रदीपः-शब्दस्वरूपमप्रतिपाद्यैव लाघवादर्थं विभजते-**वाच्यादय इति** । वाच्यादयो वाच्यलक्ष्यव्यङ्ग्याः क्रमेण तेषां वाचकादीनामर्थाः स्युः । केषुचिन्न्यायादिनयेषु । न तु मीमांसकादिमतेष्वपि । लाघवात्पदानां पदार्थमात्रे शक्तिः, न त्वन्वयांशेऽपि । गौरवादन्यलभ्यत्वाच्च । तदंशो हि तात्पर्यार्थो वाच्याद्यर्थविलक्षणशरीर आकाङ्क्षायोग्यता-सन्निधिवशादपदार्थोऽपि प्रतीयते । न चापदार्थप्रतीतावतिप्रसङ्गः । स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वात् । इत्यभिहितान्वयवादिनां मतम् ।

उद्योतः–**दर्थमिति** । प्रकरणलाघवानुरोधादित्यर्थः । अन्यथा प्रकरणचतुष्टयापत्तेरिति परमानन्दचक्रवर्ती । **वाच्यलक्ष्येति** । वाचकत्वादिव्यापारेण वक्ष्यमाणवाचकादिप्रतिपाद्यत्वं च तल्लक्षणं बोध्यम् । एतेनाग्रे एषां लक्षणानुक्तेर्न्यूनतेति परास्तम् । अनुमेयाद्यर्थानां तु अप्रकृतत्वान्न विभाग इति बोध्यम् । **न्यायादीति** । आदिना भाट्टमीमांसकाः । **न त्विति** । प्राभाकरेति शेषः । **तात्पर्यार्थ इति** । आकांक्षादिवशाद्भासमानस्य हि तात्पर्यार्थत्वेन व्यवहारः । तस्यापि पदतात्पर्यविषयत्वात् । तदुक्तं भट्टपादैः । 'न विमुंचन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः । वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः ॥ साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् । वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥ वाक्यार्थमितये तेषां प्रवृत्त्या नांतरीयकम् । पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्' ॥ इति । अभिधानापर्यवसानरूपाऽऽकांक्षा । एकपदार्थेऽपरपदार्थस्य प्रकृतसंसर्गवत्त्वं योग्यता । अव्यवधानेनान्वयप्रतियोग्युपस्थितिश्च सन्निधिः । **वशात्** । तद्रूपात्प्रयोजकात् । **अपदार्थः** । प्रत्येकं पदवृत्त्यविषयः । अनेन तस्य वाक्यवशत्वं सूचयति । आकांक्षावशाद्धि तस्य शक्यताकल्पनम्, प्रमाणानामसंबद्धार्थबोधकत्वाभावादिति वैयाकरणाः । **अतिप्रसंग इति** । अशक्यार्थान्वयभानरूप इत्यर्थः । घटवद्भूतलमित्यत्र पटीयसंयोगस्य भानापत्तिः । अस्ति हि तस्यापि संयोगत्वेन योग्यतेत्यभिमानः ।

प्रभाः-धानस्य सांप्रदायिकत्वादिति भावः । **लाघवादिति** । विभागप्रकरणैक्ये लाघवादित्यर्थः । **न्यायादीति** । आदिना वैशेषिकभाट्टनयसंग्रहः । मीमांसकाः प्राभाकरा अभिमताः । तात्पर्यार्थं निरूपयति—**लाघवादित्यादिना** । अन्यलभ्यत्वमेव दर्शयति—**तदंशो हीति** । तात्पर्यस्यार्थो विषयः । वाच्यादर्थविलक्षणं संसर्गतारूपं शरीरं यस्य सः । **अतिप्रसंग इति** । पदवृत्त्यविषयस्यापि शाब्दबोधविषयत्वे कथंचिदुपस्थितस्य गगनादेरपि तद्विषयत्वापत्ति-

वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः ।

(11)

Senses are Suggestive also.

(सूत्र ८) सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।

तत्र वाच्यस्य यथा—

The ANVITĀBHIDHANAVĀDINS maintain that the Sense of the Sentence is the same as the Primary Sense.

Generally all the senses are admitted to be suggestive also.
Of these, the suggestiveness of the Sense Expressed is illustrated in the following:—

प्रदीपः-अन्वयरूपे वाक्यार्थेऽपि पदानां शक्तिः । व्यवहारेणान्वितस्यैवोपस्थापनात्तत्रैव शक्तिग्रहात् । किं चान्वयभागस्याशक्यत्वेऽनुभवविषयत्वं न स्यात् । तद्विषये शक्यत्वस्य प्रयोजकत्वात् । अशक्यस्याप्यनुभवप्रवेशेऽतिप्रसङ्गात् । इत्यन्विताभिधानवादिनां मतम् ।

व्यञ्जकत्वं न केवलं शब्दस्य, किं तु तदर्थस्यापि । तत्रापि नैकतरस्य, किं तु सर्वस्यापीत्यभिधादिवैधर्म्यसिद्धये प्रतिपादयति-**सर्वेषामिति** ।

उद्योतः-शक्यान्वयत्वस्येति । तेषामपि नानात्वसंभवे तु तात्पर्यज्ञानकारणतयाऽतिप्रसंगो वारणीय इति बोध्यम् । तद्बलाद्भासमानानां संबंधानामनेकत्वसंभवेन तद्भाने एतद्वाक्यादयं संसर्गो बोध्य इति इच्छारूपतात्पर्यज्ञानस्य कारणत्वावश्यकत्वादिति भावः । **अतिप्रसंगादिति** । गोपदादश्वादेरपि बोधापत्तेरिति भावः । **अन्विताभिधानवादिनामिति** । अन्वितमेवाभिधत्ते इति वादिनामित्यर्थः । अत्रारुचिबीजं तु विधिवाक्यात्कार्यान्वितत्वेन बोधेऽपि कार्यांशत्यागवदन्वयांशत्यागस्याप्यन्यलभ्यत्वन्यायेनौचित्यात् । किं चान्वितत्वेन शक्तावपि अन्वयविशेषभानायाकांक्षादिकमवश्यं कारणं वाच्यम् । एवं च विशेषरूपेणाशक्यस्यैव भानमिति त्वयाप्यवश्यं वाच्यम् । किं च संसर्गस्यापि प्राक्पदेनोपस्थितावगृहीतग्राहित्वरूपप्रामाण्यं शब्दस्य न स्यात् । अन्वयव्यतिरेकाभ्यां तस्यान्यलभ्यत्वाच्च । संबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति शक्यत्वस्य प्रयोजकत्वान्नातिप्रसंग इति । **सर्वस्यापीति** । वाच्यलक्ष्यव्यंग्यस्येत्यर्थः । एवं च वाच्यादिज्ञानं विना तस्या निरूपयितुमशक्यत्वात्प्रथमतो वाचकादिनिरूपणमिति भावः । **अभिधादीति** । अभिधालक्षणापेक्षया व्यंजनाया वैधर्म्यसिद्धये इत्यर्थः । प्रधानस्य रसादेर्व्यंजकत्वादाह-**प्रायश इति** । **व्यंजकत्वमपीति** । अपिना

प्रभाः-रित्यर्थः । **शक्यान्वयत्वस्येति** । वृत्तिविषयान्वयस्येत्यर्थः । नियामकत्वात् वृत्त्यविषयस्य शाब्दबोधविषयतायां प्रयोजकत्वात् । तथा चाकाशादेरतथात्वात्र शाब्दधीविषयत्वमित्यर्थः । नन्वन्वितस्योपस्थितावप्यन्वयस्यान्यलभ्यत्वात्केवलपदार्थ एव शक्तिग्रहः स्यादत आह—**किं चेति** । शक्यत्वस्येति वृत्तिविषयत्वोपलक्षणम् । तथा च तच्छाब्दत्वावच्छिन्नं प्रति वृत्त्या तदीयपदज्ञानत्वेन हेतुत्वात्संसर्गेऽपि शक्तिरावश्यकीत्यर्थः । अत्र प्रकारताविशेष्यतान्यतरसंबन्धेन शाब्दबोधे वृत्तिविषयत्वम् । संसर्गतया तस्मिन्नाकाङ्क्षादिसहकृततात्पर्यमात्रं प्रयोजकमित्येतावतानतिप्रसङ्गादन्यलभ्ये संसर्गे न शक्तिकल्पनं युक्तमित्यस्वरसः । स च ' वादिनः ' इत्येकवचनेन प्रकाशे ध्वनित इति ज्ञेयम् । यत्तु पदेनैवान्वयग्रहे वाक्यवैफल्यम्, अगृहीतग्राहित्वरूपप्रामाण्यायोगश्चेति दूषणं तदलग्नकम् । इतरान्वितत्वेन पदादुपस्थितावपि घटाद्यन्वितत्वादिना बोधस्य वाक्यलभ्यत्वात्तद्वैयर्थ्याप्रसक्तेः प्रामाण्योपपत्तेश्चेति दिक् । **अर्थस्यापीति** । अनेन व्यञ्जकत्वमपीति कारिकास्थोऽपिशब्दोऽर्थानामपीति योजितः । **वैधर्म्येति** । अभिधालक्षणयोः शब्दमात्रगतत्वात्,

माए घरोवअरणं अज्ज हु णत्थित्ति साहिअं तुमए ।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ॥ ६ ॥ (?)

अत्र स्वैरविहारार्थिनीति व्यज्यते ।

Ma, you said (SĀDHITA) there are indeed no household provisions for the day. So say what should be done. The day will not continue like this for ever ! (6)

Here it is suggested that the woman is desirous of wanton sport.

प्रदीपः–अत्र वाच्यस्य यथा–**माए इति ।**

अत्र वाच्येनैवार्थेन वक्तुर्वैशिष्ट्यात्स्वैरविहारार्थित्वम्, गृहोपकरणत्वादिना चावश्यविधेयत्वादिकं व्यज्यते ।

उद्योतः–व्यंजकतादशायामपि वाच्यत्वाद्यप्रच्यवः सूचितः । शब्दव्यंजनायाः सकलसंमतत्वेनार्थव्यंजनायामसांद्दृष्टिकत्वशंकावारणाय शब्दव्यंजनामनुदाहृत्यैव तां प्रथमत उदाहरति–**माए इति।** काचिद्दुपनायकसंगमार्थिनी बहिर्गन्तुं मातरमाह–'मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया। तद्भण किं करणीयमेवमेव न वासरः स्थायी । ' अत्र मातरित्यनेनादेशयोग्यत्वमलंघनीयाज्ञत्वं च ध्वन्यते । गृहेत्यनेनावश्यकता । उपकरणमत्रेन्धनशाकादिसामग्रीत्यर्थकम् । तेन साकल्यम् । तेनान्यथासिद्धिपरिहारः । एकैकस्येंधनादेरसत्त्वे तु पार्श्ववासिनोऽपि ग्रहणसंभवः । अद्येत्यनेनाद्यैव संपाद्यत्वम् । साधितं प्रतिपादितमिति सत्त्वशंकाराहित्यम् । त्वया इत्यनेन स्वकल्पनाराहित्यम् । तदित्यनेन हेत्वर्थकेनावश्यवक्तव्यत्वम् । किं करणीयं कर्तव्यम् । भणेत्यनेन स्वाप्रेरणम् । एवमेव । अधुना दृश्यमानावस्थ एव । तेन दिनावसाने त्वत्प्रेरणयाऽपि कुलांगनया मया न गन्तव्यमिति द्योत्यते । स्थायी न । स्थिरो नेत्यर्थः । **अत्र वाच्येनैवेति** । वाच्यसंसर्गरूपेणैव वाक्यार्थेनेत्यर्थः । संसर्गो वाक्यशक्य इत्याशयः । यथेष्टविहारेच्छायां वाक्यार्थग्रहोत्तरं प्रतीयमानायां शब्दस्य न व्यापारो विरतत्वात् । अर्थस्य च व्यापारान्तरासंभवाद्व्यंजनैवेति भावः । न च वाक्यार्थस्यैव व्यंजकत्वे वाच्यस्य यथेत्यसंगतम् । संबंध्यभाने संसर्गभानस्य वक्तुमशक्यतया तस्य व्यंजकत्वे पदार्थस्यापि व्यंजकत्वमित्यदोषात् । एवं लक्ष्यस्येत्यपि । एतेन तात्पर्यार्थस्य व्यंजकत्वं स्वातंत्र्येण नोदाहृतमिति न्यूनतेत्यपास्तम् । **व्यज्यत इति ।** प्रियानुनयार्थं प्रहितां स्वैरविहारार्थिनी एषेति सामाजिकैर्व्यंजनया बुद्ध्यत इत्यर्थः ।

भावः । इदमुपलक्षणम् । अर्थगतव्यञ्जकत्वानुक्तौ न्यूनतापत्तेः ।
प्रभाः–लक्षणाया अर्थगतत्वनयेऽपि व्यङ्ग्यत्वाभावादिति भावः । इदमुपलक्षणम् । अर्थगतव्यञ्जकत्वानुक्तौ न्यूनतापत्तेः । यद्यप्यर्थव्यञ्जकत्वं शब्दव्यञ्जकअग्रे–'अर्थव्यञ्जकतोच्यते' इत्यादिना तन्निरूपणस्यासङ्गतत्वापत्तेश्चेत्यपि ज्ञेयम् । यद्यप्यर्थव्यञ्जकत्वं शब्दव्यञ्जक-तोदाहरणानन्तरमुदाहरिष्यते तथाप्यत्रासंभावनापरिहाराय संक्षेपत उदाहरणं द्रष्टव्यम् । **माए इति ।** 'मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया । तद्भण किं करणीयमेवमेव न वासरः स्थायी ॥' इति संस्कृतम् । **वाच्येनैवेति ।** यथाश्रुतवाक्यार्थेनेत्यर्थः । गुरुमते तस्यापि वाच्यत्वान्मतान्तरे तात्पर्यार्थत्वेपि वाच्यघटितत्वेन वाच्यस्यापि व्यञ्जकत्वानपायात् । एवं च तात्पर्यार्थस्य व्यञ्जकत्वमप्युदाहृतमेवेति न न्यूनत्वशङ्कापि । वस्तुतस्त्वन्वयस्यावाच्यत्वेऽप्यन्वितस्य वाच्यत्वान्न विरोधः । वक्त्री कामिनी । तस्या वैशिष्ट्यमवस्थाविशेषः । केवलवाच्यस्यापि व्यञ्जकत्व-

लक्ष्यस्य यथा—

साहेन्ती सहि, सुहअं खणे खणे दूम्मिआसि मज्झक्कए ।
सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥ ७ ॥ (?)

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यते । तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा—

Suggestiveness of the Sense Indicated is illustrated in the following:—

In persuading the blessed one, you have been put to trouble every moment, o friend, for my sake. You have done just what is consistent with the duty of friendly disposition and affection. (7)

In this instance, the Sense Indicated is 'You have done a hostile act in dallying with my beloved.' Eventually the disclosure of the guiltiness of the lover comes to be suggested.

Suggestiveness of the Sense Suggested is illustrated in the following:—

प्रदीपः–लक्ष्यस्य यथा–**साहेन्तीति** ।

अत्रापकारिण्यां बाधावतारान्मुख्यार्थः श्रोत्रा प्रत्येतुं न शक्यत इति सद्भावस्नेहकरणीयविसदृशं मत्प्रियरमणेन शत्रुत्वाचरणरूपं विरचितमिति मुख्यविपरीतं लक्ष्यते । तेन च कामुकविषयसापराधत्वप्रकाशनं व्यङ्ग्यम् ।

तमुपभुज्यागतां दूतीं प्रति नायिका आह—**साहेंतीति** । 'साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते । सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ।' मत्कृते मदर्थं सुभगं सुंदरं तं नायकं साधयन्ती अनुनयंती त्वं क्षणे क्षणे प्रतिक्षणं दूनासि खिन्नासि । त्वया तावदेवं सद्भावः साधुत्वं स्नेहः मद्विषयः तयोः करणीयं कार्यं सदृशमुचितम् । तथा च सद्भावस्य यत्कार्यं स्नेहस्य च यदुचितं तद्विरचितमित्यर्थः । द्वंद्वे साहित्यभानवादिमते प्रथमतः समुदायस्य समुदायेऽन्वयः । ततो यथासंख्येन बोधः पार्ष्ठिको बोध्यः । तद्ध्वनयन्व्याख्यास्यति–सद्भावस्नेहाकरणीयविसदृशमिति । क्वचित्तु सद्भावस्नेहकरणीयविसदृशमिति पाठः । तदा श्लोके ताभ्यां यत्करणीयं तेन सदृशं कार्यं त्वया विरचितमित्यर्थो वोध्यः । परं त्वाद्य एव युक्तः । लक्षणामूलीभूतबाधस्य झटित्युपस्थितये सद्भावस्नेहकार्यं कृतमित्यस्यैव वक्तुं युक्तत्वादिति दिक् । भम धम्मिएत्यादौ तु व्यंजनानन्तरमपि न विरोधप्रतीतिः । ग्रामभ्रमणनिकुंजभ्रमणयोरविरोधादिति दीपिकायां स्पष्टम् । **अत्रापकारिण्यामिति** । ज्ञातापकारिण्यामित्यर्थः । **मत्प्रियरमणेनेति** । इदं न लक्ष्यान्तर्गतम् । किन्तु प्रतिपाद्यसखीवैशिष्ट्यबोधनद्वारा व्यंग्यप्रकटनायोक्तम् । ज्ञाप्यत्वं तृतीयार्थः । **तेन चेति** । लक्ष्यार्थघटितवाक्यार्थेनेत्यर्थः । **प्रकाशनं व्यंग्यमिति** । कामुकविषयसापराधत्वमेषा प्रकाशयतीति सहृदयैर्व्य-

---

प्रभाः–मिहैव दर्शयति—**गृहेति** । आदिपदेनाद्येत्यादिपदार्थसंग्रहः । **साहेन्तीति** । 'साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते । सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ॥' इति संस्कृतम् । **अत्रेति** । सद्भावस्नेहाभ्यां यत्करणीयं तद्विसदृशत्वेन लक्षणा । तत्स्वरूपं मत्प्रियेत्यादिपर्यवसितं दर्शितम् । न तु तेन रूपेण बोध इति ज्ञेयम् । तेन लक्ष्येण । सापराधत्वं च दूतीरमणकर्तृत्वमेव । अथवा दूतीरमणं लक्ष्यान्तर्गतमेव । व्यङ्ग्यं तु कामुकः सापराध इति नायिकाया ज्ञानं रोषमूलं सहृदयान्प्रति । त्वया सदृशमेवाचरितमिति भङ्ग्या दूत्यास्तव नापराधः, किं तु नायक-

उअ णिच्चलणिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअणपरिट्ठिआ सङ्खसुत्ति व्व ॥ ८ ॥

(गाथासप्तशती of हालकवि)

अत्र निष्पन्दत्वेन आश्वस्तत्वम् । तेन जनरहितत्वम् । अतः संकेतस्थानमेतदिति कयाचित् कंचित्प्रत्युच्यते । अथवा, मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते ।

Lo ! Steady and unruffled the crane looks splendid on the leaf of the lotus plant, as though it were a conch-shell resting on a tray of clear emerald. (8)

In this instance, motionlessness suggests the sense of security (felt by the crane). And this, in its turn, suggests that the place is unfrequented by men. Therefore some woman suggests to another : This should be our rendezvous. Or else, it may be taken as suggested: You tell a lie. You had never been to this place.

प्रदीपः–व्यङ्गयस्य यथा–**उअ इति** ।

अत्र निष्पन्दत्वेनाश्वस्तत्वम्, तेन निर्जनत्वम्, अतः संकेतस्थानमेतदिति कयाचित्कंचित्संकेतस्थानाभिलाषिणं प्रति व्यञ्जनया प्रतिपाद्यते । अथवा निष्पन्दत्वेनाश्वस्तत्वम्, तेन जनागमनाभावः, अतो न त्वमत्रागत इति मिथ्या वदसीति कयाचिद्दत्तसंकेता त्वं नागता अहं त्वागत इति वादिनं प्रति व्यज्यते ।

उद्योतः–जनया गम्यत इति भावः । **उअ इति** । पश्येत्यर्थेऽव्ययमुअ इति । 'पश्य निश्चलनिष्पंदा बिसिनीपत्रे राजते बलाका । निर्मलमरकतभाजनपरिस्थिता शंखशुक्तिरिव ।' कस्याश्चिन्नायिकाया उपनायकं प्रति इयमुक्तिः । बिसिनी पद्मिनीलता । चलनं शरीरक्रिया । स्पन्दस्त्ववयवक्रिया । स्पदि किंचिच्चलन इति धात्वनुसारात् । कर्मधारयसमासः । पुंवत्कर्मधारयेति पुंवत् । यद्वा निश्चल जनशंकया विहारव्यापारनिरुद्योगेति कामुकसंबोधनम् । यत्तु निश्चला अचला पृथ्वी तद्वन्निष्पन्दे- त्यर्थ इति । तन्न । अचलापदस्यैव तत्र प्रयोगात् । पृथ्वीवाचकस्य नित्यस्त्रीलिंगत्वेन भाषितपुंस्क- त्वाभावात्पुंवद्भावानुपपत्तेश्च । मरकतो नीलमणिः । भाजनं पात्रम् । शंखशुक्तिः शुक्त्याकारं शंख- घटितं पात्रम् । न तु मुक्ताशुक्तिः । तस्या बलाकावत् श्वेतत्वाभावात् । शंखशुक्तिपदस्य तत्रासा- मर्थ्याच्च । अत्र चाचेतनोपमया लेशतोऽपि क्षोभाभावः । तेन निर्जनत्वं गम्यते । केचित्तु 'नायि- काया विरहवेदनां कामुकं प्रति निगूढं निवेदयन्त्याः सख्या इयमुक्तिः । निष्पंदा सा नायिका बलाकापांडुतातिशयात् बलाकात्वेनाध्यवसिता बिसिनीपत्रे तापाच्छयिता राजते । अत्र निश्चल अलसेति कामुकसंबोधनमेव । अचेतनोपमया निश्चेष्टत्वातिशयस्तेन च विप्रलंभातिशयो व्यंग्यः' इत्याहुः । संभोगाद्विप्रलंभस्य अतिमधुरत्वेन तत्र योजयति–**अथवा निष्पंदेति** । **स्वरूपमिति** । लक्षणमित्यर्थः । **अतो नेति** । अभिधया प्रतिपादयतीत्यर्थे वैयर्थ्यं स्पष्टमेव । **इदं चेच्छायामिति** ।

प्रभाः–स्यैवेति वा । 'पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका । निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥' इति । निश्चलद्वयं दर्शयति–**अत्रेत्यादिना** । **विशेषणान्तरेति** । अभिधया प्रतिपादयतीत्युक्तौ साक्षात्संकेति- तमित्यस्य वैयर्थ्यं स्यादित्यर्थः । **इदं चेति** । यद्यप्यनया चेष्टयायमर्थो बोद्धव्य इति संकेतस्तत्राप्यस्ति तथाप्य-

वाचकादीनां क्रमेण स्वरूपमाह—

(12)

वाचकशब्द defined

(सूत्र ९) साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ॥ ७ ॥

इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात्संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः ।

The author enunciates, in order, the nature of Words Expressive or otherwise:--

That is the Word Expressive which conveys a sense that is directly conventional.

Since, in this world, a word fails to convey a sense so long as the convention relating to it remains ungrasped, (it follows that) a word conveys a particular sense only when helped by convention. Therefore, a word is (said to be) *Expressive* of that sense with regard to which it is apprehended to have a direct convention.

प्रदीपः–एवमर्थं विभज्य वाचकादीनां स्वरूपं क्रमेणाह–**साक्षादिति ।**

अभिधत्ते प्रतिपादयतीत्यर्थः । अतो न विशेषणान्तरवैयर्थ्यम् । संकेतितं गृहीतसंकेतम् । इदं चेष्टायां साक्षादर्थप्रतिपादिकायामतिव्याप्तिवारणाय, माधुर्यादिव्यञ्जकस्पर्शादिवर्णेऽतिव्याप्तिवारणाय वा । न च साक्षादित्यधिकम् । 'यन्नामा यत्र चैत्यादिर्विषयोऽपि स तादृशः' इत्यादिव्यवहितसंकेतसत्त्वेऽपि चैत्रादिनामके चैत्यादियोगिनि विषये प्रतिपाद्ये चैत्यादिपदेऽतिव्याप्तिवारकत्वात् । तत्र शक्यसंकेतव्यवहितसंकेतत्वात् । न च तत्र शक्तिरेवेति सम्यक् । तद्योगिनि तत्पदप्रयोगस्य लक्षणयैवोपपत्तेः । न च साक्षात्संकेतवान्वाचक इत्येतावतैव स्वस्थत्वे अभिधत्ते इत्यस्य वैयर्थ्यम् । संयोगादिनाऽभिधायां नियमितायां वाच्यार्थव्यञ्जकतादशायामतिव्याप्तेर्वारणीयत्वात् । न च तथापि तत्रातिव्याप्तिरेवेति वाच्यम् । यस्य शब्दस्य यत्राव्यवहितसंकेतग्रहो यदर्थग्रह उपयुज्यते तत्र स तदर्थवाचक इति हि लक्षणार्थः । अथ संकेतग्रहस्य शब्दसहकारितायां किं मानमिति चेत्, अगृहीतसंकेतस्य शब्दार्थप्रत्ययाभावः । इदं च 'यत्राव्यवधानेन संकेतो गृह्यते' इत्यादिवृत्तिदर्शनात्संकेतविशेषणतया साक्षात्पदं व्याख्यातम् । वस्तुतस्तु

उद्योतः–पदघटितः संकेत इत्यभिमानः । इत एव वाऽस्वरसादाह–**स्पर्शादिवर्णे** इति । माधुर्यादिनिरूपितवाचकत्वापत्तिरिति भावः । चेष्टातिव्याप्तिस्तु विशेष्यतया शब्दनिवेशाद्वारणीयेति बोध्यम् । **विषयः** । देशः । **तत्रेति** । तदीयसंकेत इत्यर्थः । अग्रे च व्यवहितसंकेतत्वादिति पाठः । संकेतसत्त्वादिति पाठे तु तत्रेत्यस्य देशे इत्यर्थः । व्यवहितत्वं च शक्यसंकेतग्रहप्रयोज्यग्रहविषयत्वम् । स चेत्थं वृक्षविशेषश्चैत्यपदाद्बोध्यः । तद्योगी देशश्च तत्पदाद्बोध्य इति । रूढिलक्षणायाः शक्तितुल्यत्वात्संकेतस्य तत्रानुभूयमानत्वाच्च तत्रैव प्रत्युदाहृतम् । **लक्षणयैवेति** । तद्वृक्षच्छेदेऽपि यथाकथंचित् शक्यसंबन्धोऽस्त्येव । तादृशस्यैव लक्षणाप्रयोजकत्वादिति भावः । **वाच्यार्थेति** । द्वितीयवाच्यार्थेत्यर्थः । **यस्य शब्दस्य यत्रेति** । काले इति शेषः । अपभ्रंशादौ वाचकत्वस्येष्टत्वेन तत्रातिव्याप्तिर्न शंक्या । अन्यथा वाच्यव्यंग्यतायां माए इत्यादेरनुदाहरणत्वापत्तेरित्याहुः । **संकेतो गृह्यत इति** । वृत्तौ गृह्यते इत्यस्य 'यदर्थप्रतिपत्तये' इत्यादिः । साक्षात्संकेतग्रहसहकारेण यदा यदर्थप्रतिपत्तिरिति फलितोऽर्थः । संकेतपदेन च शक्तिरुच्यते । संकेतग्राह्यत्वात्तस्याः । सा च बोध-

प्रभाः–स्माच्छब्दादित्येवं शब्दघटितसंकेतस्यात्र निवेशान्न दोषः । ननु प्रकृतत्वादेव शब्दस्वरूपविशेषणलाभान्न चेष्टायामतिव्याप्तिरत आह–**माधुर्यादीति** । 'मूर्ध्नि वर्गान्त्यगाः स्पर्शाः' इत्यादिना वर्णविशेषाणां माधुर्यादिगुणव्यञ्जकत्वस्य वक्ष्यमाणत्वादिति भावः । **यन्नामेति** । वटादिनामा प्रधानवृक्षो यत्र स विषयो देशोऽपि तन्नामेत्यर्थः । **तत्रेति** ।

(13)

Two views re. सं

(सूत्र १०) संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद्व्यभिचाराच्च

The sense by convention is, according to some, of four kinds including the sense of the Generic attribute; while, (according to others), it is only the sense of the Generic attribute.

Though it is the individual that is suited to (our) activity or passivity (in relation to it), on account of its performing an action in satisfaction of our purpose, yet it is not proper to establish a convention with regard

---

प्रदीपः–संयोगादिनाभिधायां नियमितायां यत्र शक्यान्तरध्वननं तत्र वाचकत्वं मा प्रसाङ्क्षीदित्यभिधानक्रियाविशेषणं साक्षादिति । तत्र तु वाक्यार्थप्रतीतिव्यवधानेन तत्प्रतीरित्यतिप्रसङ्गः । न च संकेतितपदवैयर्थ्यम् । लक्ष्यप्रतीतावपि वाच्यप्रतीतिव्यवधानाभावात् । स्पर्शादिवर्णानां साक्षादेव माधुर्यादिव्यञ्जकत्वाच्च ।

भास्करस्तु—"लक्ष्यस्याप्यन्विताभिधाननये संकेतितत्वात्तत्रातिव्याप्तिवारणाय साक्षादिति विशेषणम् । तदनभ्युपगमे तु 'साक्षादभिधत्ते' 'संकेतितमभिधत्ते' इति लक्षणद्वयम् । न चाद्यस्य चेष्टायामतिव्याप्तिः । शब्दत्वस्य प्रकरणादेव लाभात्" इत्याह । तत्तु 'साक्षात्संकेतो गृह्यते' इत्यादिवृत्तौ साक्षात्त्वस्य संकेतितविशेषणतया व्याख्यानेन

उद्योतः–जनकत्वरूपेति पंचमशेषे वक्ष्यते । अत्र च वाचकव्यवहारविषयत्वं लक्ष्यतावच्छेदकम् । अतो न लक्ष्यतावच्छेदकलक्षणयोरभेदः । ननु लक्षणास्थले तत्तत्पदात्तत्तल्लक्ष्यार्थो बोद्धव्य इत्यादीच्छायाः संकेतत्वमेव नास्ति । शक्यसम्बन्धेनैव तद्बोधात् । एवं च तद्व्यावृत्त्यर्थं संकेतविशेषणं साक्षात्पदं व्यर्थमित्यरुचेराह–**वस्तुतस्त्विति** । संकेतितं इति तु साक्षादेव माधुर्यादिव्यंजके स्पर्शादिवर्णेऽतिव्याप्तिवारणाय । अनेनैव चैत्यादियोगिदेशबोधकचैत्यादिपदे नातिव्याप्तिः । संकेतपदस्य शक्तिपरत्वात् । न च तत्र तस्य साऽस्ति । वृक्षसंबन्धेनैव तद्बोधादिति बोध्यम् । **व्यवधानाभावादिति** । गंगापदादपि साक्षात्तीराद्युपस्थितिरित्यभिमानः । इत एव वाऽरुचेराह–**स्पर्शादीति** । वस्तुतो न च संकेतितपदवैयर्थ्यमित्यादिस्पर्शादिवर्णानां साक्षादेव माधुर्यव्यंजकत्वाच्चेत्यंतग्रन्थो बहुषु पुस्तकेषु न दृश्यते । **लक्ष्यस्याप्यन्वितेति** । इतरान्विते शक्तौ इतरत्वेन तीरस्यापि भानादिति अभिमानः । **विशेषणमिति** । अभिधानक्रियाया इत्यर्थः । साक्षात्त्वं च पदजन्यपदार्थो-

---

प्रभाः–चैत्यादियोगिनि देश इत्यर्थः । **न चेति** । चैत्रादिपदाद्ग्रामविशेषत्वेन प्रतीतेः । अन्यथा तद्वृक्षनाशे तत्प्रतीत्यनापत्तेरित्याशयः । भूतपूर्वशक्यसंबन्धेनापि प्रतीत्युत्पत्तेर्न शक्तिकल्पनेत्याह––**तद्योगिनीति** । चैत्रादिनामकचैत्यादियोगिनीत्यर्थः । **वाच्येति** । वाच्यार्थान्तरेत्यर्थः । यत्र यस्मिन्काले । एवं तत्रेत्यत्रापि । ननु साक्षादिति व्यर्थम् । यन्नामेत्यादिवाक्यस्य पूर्वपूर्वप्रयोगाधीननिरूढलक्षणाबोधकत्वेन संकेताग्राहकत्वात् । तस्यानादिवृद्धपरम्परयैवावगमाच्छास्त्राधीनत्वात् संम्बन्धस्याशास्त्रहेतुत्वादिति न्यायात् । अत एव क्वचिदपभ्रष्टशब्दे संकेतस्यानादित्वाभावान्न तत्रातिव्याप्तिः । न चैवं प्राकृतकाव्यविलोपः । तत्र मूलशब्दानुसारेणैव तत्त्वात् । पूर्वपूर्वसंकेतस्य तत्रापि सत्त्वाद्वा । इत्थं चानादिसंकेतस्यैव सहकारित्वान्न क्वाप्यतिप्रसङ्ग इत्यरुचेराह––**इदं चेति** । संकेतितमिति तु माधुर्यादिव्यञ्जकवर्णातिव्याप्तिवारणायेत्युक्तमेव । **अन्विताभिधानेति** । इतरान्वितत्वेन संकेतग्रहे इतरत्वेन लक्ष्यस्यापि विषयत्वादिति

तत्र संकेतः कर्तुं न युज्यते इति, गौः शुक्लश्चलो डित्थ इत्यादीनां शब्दानां विषयविभागो न प्राप्नोतीति च तदुपाधावेव संकेतः।

to it (i. e. individual), for fear of the faults of Endlessness and Infringement, and because no distinctness of scope obtains for each of the words, गौः, शुक्लः, चलः, डित्थः.

Therefore it is with regard to the attribute of the individual that a convention is made.

प्रदीपः--विरोधादुपेक्षणीयम्। किं च प्रथमे माधुर्यादिव्यञ्जकस्पर्शादिवर्णेष्वतिव्याप्तिः । तेषां साक्षादेव शृङ्गारादिव्यञ्जकत्वात्। द्वितीयं तु वाच्य एव व्यङ्ग्यतादशायामतिव्याप्तम्। न च तत्रेष्टापत्तिः। संकेतवान्वाचक इत्यस्यैव तदा सम्यक्त्वेन शेषवैयर्थ्यात्। **संकेतित इति।**

नन्वयं विभागोऽनुपपन्नः। जात्यादेरसंकेतितत्वात्। आद्यसंकेतग्रहस्य व्यवहारमात्राधीनतया प्रवृत्तिनिवृत्तियोग्यायां व्यक्तावेव तदौचित्यादिति। मैवम्। किं हि व्यक्तिषु सर्वासु संकेतग्रहो व्यवहाराङ्गम्, उत यस्यां कस्यांचित्। नाद्यः। आनन्त्यात्। नान्त्यः। व्यभिचारप्रसङ्गात्। यतोऽगृहीतसंकेतगोपिण्ड इव घटादेरपि गोपदात्प्रतीतिः प्रसक्ता। अगृहीतसंकेतत्वस्य तुल्यत्वात्। किं च न यत्र संकेतग्रहस्तस्यापि प्रतीतिरिति व्यभिचारान्न व्यक्तौ संकेतः। अपि च व्यक्तिसंकेतपक्षे 'गौः' 'शुक्लः' 'चलः' 'डित्थः' इत्यादिशब्दानामर्थभेदो न प्राप्नोति। किमेवमनिष्टमिति चेत्, सहप्रयोगानुपपत्तिः। तस्मादुपाधावेव संकेतः। स च द्विविधः—स्वभावतो वस्तुवृत्तिर्घटत्वादिः।

उद्योतः-पस्थितिविशेष्यत्वमिति बोध्यम्। **शृंगारादिव्यंजकत्वादिति।** तद्गतमाधुर्यव्यंजकत्वादित्यर्थः। अतो न पूर्वविरोधः। **व्यंजकतादशायामिति।** तद्बोधके शब्दे इति शेषः। **शेषेति।** अभिधत्त इतीत्यर्थः। **जात्यादिरिति।** आदिना गुणक्रियासंज्ञाः। **संकेतग्रहस्य।** तत्प्रयोज्यशक्तिग्रहस्य। **योग्यायां व्यक्तावेवेति।** नयनानयनाद्यनुमिततत्तद्गोचरप्रवृत्त्यनुमितस्वजनकव्यक्तिज्ञानजनकत्वनिर्वाहशक्तेस्तज्ज्ञानविषयव्यक्तावेव सिद्धिरुचितेति भावः। **आनंत्यादिति।** तथा च शक्तिग्रहासंभवः। सामान्यलक्षणा तु निरस्तैव तंत्रान्तरे इति भावः। **यतोऽगृहीतेति।** तद्विषयकशाब्दबोधे सामान्यतो गृहीतसंकेतपदज्ञानं कारणमित्यंगीकारे इत्यर्थः। तद्विषयसंकेतवत्पदज्ञानं कारणमित्यंगीकारेऽप्याह-**किं च न यत्रेति। व्यभिचारात्।** तथा व्यक्तिपक्षे कार्यकारणभावस्य वक्तुमशक्यत्वात्तत्र संकेत एव नेति भावः। समानप्रकारकत्वेनैव कार्यकारणभावांगीकारान्नायं दोष इत्यत आह-**अपि चेति।** व्यक्तावेवेति पक्षेऽयं दोषः। **सहप्रयोगानुपपत्तिरिति।** इदं चिन्त्यम्।

प्रभाः-भावः। **शृङ्गारादीति।** शृङ्गारशब्दो माधुर्यादिगुणपरः। **प्रवृत्तीति।** दोहनादीष्टसाधनत्वं हि प्रवृत्तियोग्यत्वम्, शृङ्गाघाताद्यनिष्टसाधनत्वं च निवृत्तियोग्यत्वं गोव्यक्तावेव, न तु जातावित्यर्थः। जात्यादिरित्यादिपदेन गुणक्रियासंज्ञानां संग्रहः। **सर्वास्विति।** सर्वासु गोव्यक्तिष्वित्यर्थः। व्यवहाराङ्गं गोपदजन्यशाब्दबोधाङ्गम्। **यस्यांकस्यांचिदिति।** संकेतग्रहो व्यवहाराङ्गमित्यनुषज्यते। **आनन्त्यादिति।** गवादिव्यक्तीनामनन्तत्वेनोपस्थापकाभावात्सामान्यलक्षणप्रत्यासत्तौ च मानाभावान्नाद्यपक्षसंभव इत्यर्थः। **व्यभिचारेति।** संकेतितस्यैव शाब्दबोध इति नियमाभावप्रसङ्गादित्यर्थः। इष्टापत्तिमाशङ्क्य निरस्यति--**यत इति।** गोपदजन्यशाब्दबुद्धौ यत्किंचिद्गोव्यक्तिसंकेतग्रहो हेतुरिति नोक्तदोष इत्यत आह--**किं चेति।** संकेताविषयगोपिण्डस्यापि प्रतीतेर्व्यभिचार इत्यर्थः। एवं च 'व्यभिचाराच' इति प्रकाशग्रन्थः प्रकारद्वयेन व्याख्यात इति बोध्यम्। ननु गोत्वादिप्रकारकसंकेतग्रहस्तत्प्रकारकशाब्दबोधे हेतुरित्युक्तौ न कोऽपि दोष इत्यत आह--**अपि चेति।** व्यक्तिसंकेतपक्षे व्यक्तिमात्रसंकेतपक्षे। न

उपाधिश्च द्विविधः । वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च । वस्तुधर्मोऽपि द्विविधः । सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः । पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । तत्राद्यो जातिः । उक्तं हि वाक्यपदीये 'गौः स्वरूपेण न गौर्नाप्यगौः गोत्वाभिसंबन्धात्तु गौः' इति ।

Attribute is of two kinds: (1) Inherent Property of a thing, and (2) what is attributed to a thing by the free will of the speaker. Inherent Property of a thing is again of two kinds: (1) that which is an accomplished fact, and (2) what requires to be accomplished. Property of an accomplished nature is again of two kinds: (1) What gives life to a thing, and (2) what is responsible for imparting particularity to it. The former of these is the Generic attrubute (Jāti). So it is said in the Vākyapadīya: "An ox is an ox not on account of its individual form; nor does it fail to be an ox (owing to it). It is an ox owing to its vital connexion with

प्रदीपः-वक्तुर्यदृच्छया संनिवेशितो नामरूपः । तत्राद्यो द्विविधः-सिद्धः साध्यश्चेति । सिद्धोऽपि द्वेधा-पदार्थस्य प्राणप्रदः विशेषाधानहेतुश्च । प्राणप्रदत्वं च यावत्स्थितिसंबन्धित्वम् । यद्यपि शुक्लत्वादेर्नित्यत्वाभ्युपगमे गोत्वादिना समकालमेव संबन्धित्वम्, तथापि तस्य संबन्धः कदाचिदपैत्यपि, न तु गोत्वादेरिति विशेषः । तत्र प्राणप्रदो जातिः । उक्तं हि वाक्यपदीये--"न हि गौः स्वरूपेण गौः, नाप्यगौः, गोत्वाभिसंबन्धात्तु गौः" इति । अस्यार्थः--'गौः स्वरूपेण न गोव्यवहारस्य नाप्यगोव्यवहारस्य विषयः । गोत्वाभिसंबन्धात्तु गोव्यवहारस्य विषयः' इति । तथा च प्राणप्रदत्वमस्य

उद्योतः-व्यक्तिविशेषोपस्थितये तेषां सहप्रयोगात् । तद्बोध्यव्यक्तिमात्रबोधकत्वस्यैव पर्यायत्वात् । विशिष्टशक्तौ तु नागृहीतविशेषणान्यायेन व्यक्तौ शक्तेर्जात्यादौ तदवच्छेदकत्वस्य च स्वीकारे गौरवेण च विशेषण एव सोचितेत्याह-**तस्मादुपाधावेवेति** । विशेषणे जात्यादावेवेत्यर्थः । व्यक्तिबोधस्त्वाक्षेपात् । अनुमानसहकृतपदेनैवेति केचित् । लक्षणयेत्यन्ये । व्यंजनयेति परे । विशेषणशक्तिग्रहस्यैव विशिष्टस्मृतित्वं विशिष्टशाब्दत्वं च कार्यतावच्छेदकमित्यपरे । **सन्निवेशितः** । संकेतसंबंधेन तत्तद्धर्मिणि स्थापितः । **नामरूप इति** । डित्थडपित्थादिशब्दरूपः । संज्ञाशब्दादेव च प्रागुक्तरीत्या संज्ञाविशिष्टधर्मिबोध इति बोध्यम् । **कदाचिदपैत्यपीति** । पाकेन रंजनेन च वर्णान्तरकरणे इत्यर्थः । क्रियासमवायस्य नित्यत्ववादिमते तदन्यत्वं निवेश्यम् । **गौः स्वरूपेणेति** । अज्ञातगोत्वकेन धर्मिस्वरूपमात्रेणेत्यर्थः । **नाप्यगोव्यवहारस्येति** । अभावज्ञाने प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य कारणत्वादिति भावः । **गोत्वाभिसंबंधात्त्विति** । एवं च यावद्गोव्यवहारं तत्र पिण्डे गोत्वस्य सत्त्वात्प्राणप्रदत्वमिति भावः । **विशेषाधानहेतुरिति** । तत्त्वं च यावदाश्रयस्थितिसंबंधकभिन्नत्वे सति द्रव्यक्रियान्यत्वम् । **साध्यस्त्विति** । साध्यत्वेन विवक्षितः । तदेव दर्शयति-

प्रभाः-प्राप्नोति न संभवति । तर्हि जातिविशिष्टव्यक्तौ शक्तिरस्त्वित्याशङ्क्याह--**तस्मादिति** । नागृहीतविशेषणान्यायादिति भावः । यदृच्छया स्वेच्छया संकेतरूपया संनिवेशितः कल्पितो डित्थादिनामरूपः । **यावत्स्थितीति** । यथाश्रुतार्थस्य वाक्यपदीयपदार्थस्य स्थितिर्व्यवहारयोग्यता । तावत्पर्यन्तं तत्प्रयोजकतया संबन्धित्वमित्यर्थः । **शुक्लत्वादेरिति** । शुक्लादिगुणस्येत्यर्थः । गुणिपरशुक्लपदाद्भावप्रत्ययात् ग्रन्थानुक्तत्वेन 'उक्तं हि' इत्याद्यसंगतेः । **अस्यार्थ इति** । स्वरूपेण व्यक्तिमात्रेण । कदाचित्पाकाद्यवस्थायाम् । गौर्न गौरिति यथाश्रुतासंगतेस्तदर्थमाह--**अस्यार्थ इति** । स्वरूपेण व्यक्तिमात्रेण । यथानभिव्यक्तस्वरूपमात्रे वैधर्म्याग्रहादगौरिति न व्यवहारः, तथा गौरित्यपीत्यर्थः । **नापीति** । एतच्च दृष्टान्तत्वेनोक्तम् । अन्यथा गवि अगोव्यवहारस्य गोत्वसंबन्धाप्रयुक्तत्वेनासंगतेः । विशेषाधानमितरव्यावृत्तिबोधः । लब्धसत्ताकं

द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यते इति सोऽयं संज्ञारूपो यदृच्छात्मक इति । 'गौः

(the generic attribute of) cowness." The latter is Quality (Guṇa). For, whiteness etc. distinguishes a thing which has already come into existence. The property requiring to be accomplished is, in its nature, an action which consists of constituents, prior and posterior. The (eternal) form of words like Ḍittha etc., which is fully grasped on the apprehension of the last syllable (ANTYABUDDHI), and which is divested of sequence, comes to be attributed, at will, by the speaker to objects like Ḍittha, as (their) attribute. So what is in the form of Proper Nouns is essentially based on free will. 'Fourfold,' says the author of the Mahābhāṣya, 'is

प्रदीपः–सिद्धमिति । विशेषाधानहेतुस्तु गुणः । गोत्वादिना लब्धसत्ताकं हि वस्तु शुक्लत्वादिना विशिष्यते । साध्यस्तु पूर्वापरीभूतैकदेशत्वेन विवक्षितः क्रियारूपश्छेदनादिः । यदुक्तम्—

'यावत्सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥' इति ।

वक्तृयदृच्छासंनिवेशितस्तु शब्दरूपः । डित्थादिशब्दानां प्रथमवर्णप्रतीत्या किंचित्प्रकाशितमन्त्यवर्णबुद्ध्या निःशेषतो ग्राह्यं नानावर्णात्मकघटादिपदवद्वर्णक्रमशून्यं स्फोटाख्यं शब्दस्वरूपं डित्थादिष्वर्थेषूपाधित्वेन वक्त्रा यदृच्छया कल्प्यत इति संज्ञारूपयदृच्छात्मको डित्थादिशब्दः ।

चण्डीदासस्तु—'अन्त्यं स्वलक्षणं बुद्ध्या निःशेषतो ग्राह्यं यस्य तत् जातिप्रतीत्यनन्तरं व्यक्तिप्रतीतिरिति क्रमशून्यं च डित्थादीनां शब्दानां स्वरूपं डित्थादिष्वर्थेषूपाधित्वेन पदार्थोपस्थित्यनुकूलतया संकेत्यते । उपाध्यन्तरं

उद्योतः–**पूर्वापरेति ।** अधिश्रयणाद्यवतारणान्तव्यापारसमूहो हि पाकक्रिया । विक्लित्त्यनुकूलत्वेन तेषामनुगमान्न नानार्थता । तत्र सर्वप्रागभावे भविष्यत्वम् । सर्वध्वंसे भूतत्वम् । कस्यचिद्वर्तमानत्वे वर्तमानत्वम् । एवं च भासमानपौर्वापर्यकावयवकत्वसमानाधिकरणो धर्मविशेषः साध्यत्वमिति फलितम् । **क्रियारूप इति ।** धातुवाच्य इति यावत् । तथा च पाचकादीनां प्रकारीभूतक्रियायां शक्तिः । वैयाकरणैः कृत्स्वेव कार्याभावांगीकारादिति स्पष्टमस्मत्कृतवैयाकरणसिद्धान्तमंजूषायाम् । **किंचित्प्रकाशितमिति ।** अल्पावयवावच्छेदेन चक्षुःसन्निकर्षे पटस्येवेत्यर्थः । **अंत्यवर्णबुद्ध्येति ।** पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतयेत्यर्थः । **निःशेषत इति ।** सर्वावयवावच्छेदेन तत्सन्निकर्षे संपूर्णपटस्येवेति भावः । **घटादिपदवदिति ।** मतांतरसिद्धस्य व्यतिरेके दृष्टांततेति बोध्यम् । **वर्णक्रमशून्यमिति ।** वर्णक्रमग्रहशून्यमित्यर्थः । यथा पटप्रत्यक्षे न तंतुक्रमभानं तद्वदित्यर्थः । एकः पट इतिवदेकं पदमिति व्यवहारात् अवयवातिरिक्तोऽवयवी स्फोटाख्यः स्वीक्रियत इत्यर्थः । अत

प्रभाः–प्राप्तव्यवहारयोग्यताकम् । विशिष्यते इतरेभ्यो व्यावर्त्यते । अनेन प्रकाशगतस्य 'शुक्लादिना' इत्यस्य विशिष्यत इत्यनेनान्वयो दर्शितः । **पूर्वेति ।** पूर्वापरीभूता एकदेशाः कुठारोद्यमननिपतनादिव्यापारा यस्य तत्त्वेन विवक्षितः । द्वैधीभवनफलकोद्यमनादिव्यापारसमूहो हि च्छिदिधातुवाच्यः कल्प्यत इति तद्घटकव्यापाराणां तदेकदेशत्वं काल्पनिकमेवेत्यर्थः । **यावदिति ।** वाक्यपदीयकारिकेयम् । सिद्धं तथा असिद्धं भावि वा यावद्व्यापारवृन्दं साध्यत्वेनाकारेण पचतीत्याख्यातात्प्रतीयते सा क्रियेत्यन्वयः । सिद्धमसिद्धं वेत्यत्र हेतुः—**आश्रितेति ।** आश्रितं क्रमरूपं येन तत्त्वादित्यर्थः । **प्रथमेति ।** पूर्वपूर्ववर्णप्रतीत्या किंचित्किंचित्प्रकाशितमित्यर्थः । **अन्त्यवर्णेति ।** पूर्वपूर्ववर्णानुभवजनितसंस्कारसचिवयेत्यर्थः । न च स्फोटस्य निरवयवत्वात्किंचिदित्यनुपपन्नमिति वाच्यम् । किंचित्त्वस्याभिव्यक्ति

शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः ' इति महाभाष्यकारः । परमाणवादीनां

the currency of words as illustrated in गौः, शुक्लः, चलः, डित्थः'. The Atomic Dimension and some other (so-called qualities) are called qualities

प्रदीपः–तेषां नास्ति। किं तु धर्मिमात्रं ततः प्रतीयते' इति वृत्त्यर्थमाह। तच्च भाष्यविरुद्धम् । तत्र शब्दस्यैवोपाधित्वेन व्यवस्थापनात् । डित्थादिशब्दाड्डित्थादिनामायमिति प्रतीतेः । एवं हि 'गौः' 'शुक्लः' 'चलः' 'डित्थः' इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः इति महाभाष्यकारः । नन्वेवं परमाण्वादिशब्दानां जातिशब्दत्वं स्यात्, न गुणशब्दत्वम् ।

उद्योतः–एव तत्र तंत्वियत्तावत्पदज्ञानेऽपि न तत्र गणनां विना वर्णेयत्ताज्ञानमिति भावः । तदाह–**स्फोटाख्यमिति ।** एतेन नानावर्णतत्तद्व्यवहितोत्तरत्वादिक्रमघटितपदत्वस्य शक्ततावच्छेदकत्वे गौरवमानंत्यं चेत्यपास्तम् । **यदृच्छयेति ।** डित्थादिपदं तादात्म्यसंबंधेन डित्थादिनामविशिष्टतत्तदर्थबोधकं भवत्वित्याकारयेच्छयेत्यर्थः । यदृच्छाकल्पितत्वाच्च यदृच्छाशब्द इति व्यवहारस्तदाह–**यदृच्छात्मक इति।** अयमेव संज्ञाशब्दो द्रव्यशब्द इति च व्यवह्रियते। श्रावणज्ञानस्य शाब्दबोधे हेतुत्वांगीकारान्नात्माश्रय इति बोध्यम् । **चंडीदास इति ।** अंत्यं व्यवच्छेद्यं तच्च स्वलक्षणं धर्मिस्वरूपं बुद्ध्या तद्द्वारा निर्ग्राह्यं यस्य शब्दरूपस्य । शब्दज्ञानेन धर्मिप्रत्ययनात् । गवादिपदे हि विशेषणप्रतीत्यनन्तरं व्यक्तिप्रत्यय इति क्रमः तच्छून्यम् । आहत्यैव धर्मिप्रत्यायनादिति भावः । उपाधित्वेनेत्यस्य व्याख्या–**पदार्थोपस्थित्यनुकूलतयेति । संकेत्यते ।** केवले धर्मिण्येवेति शेषः । अयं भावः । तदुपाध्युपलक्षिते शुक्लवासा देवदत्त इत्यादाविव शक्तिग्रह इति न तस्य बोधे मानम् । शुक्लवासस्त्ववदर्थे तन्निवेशस्तु निर्धर्मितावच्छेदकशक्तिग्रहासंभवात्तत्सौकर्यायैवेति । तदेवाह–**उपाध्यन्तरमिति ।** पदान्निर्विकल्पकं तु आकाशादिपदादाविष्टमेव । अत एवास्य द्रव्यशब्दत्वेन व्यवहार इति तद्भावः । यद्वा अंत्यं अंत्यवर्णप्रत्यक्षेण ग्राह्यं स्वलक्षणं शब्दरूपं यस्यार्थस्य बुद्ध्या ज्ञानेन निःशेषतः स्वरूपतोऽर्थतश्च ग्राह्यम् । अर्थबोधकत्वं हि पदस्वरूपम् । पद्यते बोध्यतेऽनेन इति व्युत्पत्तेः । तादृशं डित्थादिपदानां स्वरूपं स्वेन डित्थादिपदेन रूप्यते बोध्यत इत्यर्थरूपं तत् । डित्थाद्यर्थेषु पदार्थोपस्थित्यनुकूलतया तादात्म्येन तदवच्छेदकतयेत्यर्थः । **तच्च भाष्येति ।**

प्रभाः–गतस्योपपत्तेः । आलोकतारतम्येन घटाभिव्यक्तितारतम्यवत् । बहुभिर्दर्शनै रत्नतत्त्वाभिव्यक्तिवच्च । तदुक्तम्–'सामस्त्येन तु तद्व्यक्तिः सर्वान्ते मणितत्त्ववत्' इति । नानेति व्यक्तिरेकदृष्टान्तेनाखण्डत्वमुक्तम् । तदाहुः–'एकैकवर्णासामर्थ्यान्मेलकानुपपत्तितः । एकबुद्धेर्नदीदीनसाम्यात्स्फोटः स च द्विधा ॥' इति । एकैकवर्णस्यार्थप्रत्यायनासामर्थ्यात् नानावर्णात्मकपदस्य चोत्तरोत्तरवर्णग्रहे पूर्वपूर्ववर्णनाशेन प्रत्यक्षायोगादनेकपुरुषोच्चारितानां समूहालम्बनस्य च वर्णक्रमाविषयत्वेन जरा राजेत्युभयसाम्यात्स्फोटः स्वीक्रियते। स च पदवाक्यभेदाद्द्विविध इत्यर्थः । **शब्दस्वरूपमिति ।** वर्णातिरिक्तपदरूपम् । एकपदमिति प्रतीतेर्विषयः । अवयवातिरिक्तपटाद्यवयविवदित्यर्थः । तथा चाखण्डपदशक्तिरेव तादृशपदविशिष्टशाब्दधीहेतुर्जात्यादिशक्तिवदिति भावः । यदृच्छात्मकत्वं च यदृच्छाकल्पितत्वाद्बोध्यम् । एवं मीमांसकमते स्वशब्दस्य द्रव्यत्वाद् द्रव्यशब्दत्वमपीति । स्वलक्षणं शुद्धं वस्तु। **बुद्ध्येति ।** यस्य बुद्ध्या निःशेषतो ग्राह्यं तड्डित्थादीनां स्वरूपमित्यन्वयः । उपाधेः कस्याप्यग्रहणादिति भावः । अत एव जातिप्रतीत्यनन्तरमाक्षेपादिना व्यक्तिप्रतीतिरिति गवादिपदे यः क्रमस्तच्छून्यम् । नन्वत्र जात्यादिवदिह संज्ञाया एवोपाधित्वात्कथमेतदत आह–**उपाधित्वेनेति ।** तथा च पदार्थविशेषणस्वरूपमुपाधित्वेन संज्ञाया इत्यर्थः । तदाह–**उपाध्यन्तरमिति ।** एवंविधोपाधित्वस्य व्याख्यातादन्यदित्यर्थः । उक्तरूपोपाधित्वाङ्गीकारान्न विरोध इत्याशङ्क्याह–**डित्थादीति ।** एवंविधोपाध्यभिप्रायेण हि भाष्यकार इत्यूचे इत्यध्याहारः । तथा च भाष्याभिमतत्वे मानमाह–**एवं हीति ।**

तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम् । गुणक्रियायदृच्छाशब्दानां वस्तुत एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते । यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालंबनभेदात् ।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्य-

only technically owing to their mention in the list of qualities. Qualities, Actions or Proper Names (Yadṛcchās'abda), though really the same in nature, appear to be varied owing to the variety of substrata, just as one and the same face appears varied owing to the variety of the substrata (in which it is reflected), like a sword, a mirror, oil etc.

It is the generic characteristic whiteness etc. on account of which the same name and idea-viz. This is white and that is white-arise concerning

प्रदीपः–परमाणुत्वादीनां प्राणप्रदत्वेन जातित्वादिति चेत्, सत्यम् । जातिशब्दा एव ते । वैशेषिकनयानुसारेण तु तत्र गुणशब्दव्यवहारः । ननु पटादिनिष्ठानां शुक्लादिगुणानाम्, गुडतण्डुलादिनिष्ठानां पाकादिक्रियाणां च भेदस्य प्रत्यक्षतः सिद्धौ व्यक्तिसंकेतपक्षोक्तदोषः समान इति चेत्, न । गुणादीनां स्वरूपत एकरूपाणाश्रयभेदाद्भेद इव लक्ष्यते । यथैकस्यैव मुखस्य खड्गमुकुराद्यालम्बनभेदात् ।

अपरे तु--" हिमपयःशङ्खादिषु शुक्लादिगुणः परमार्थतो भिन्न एव । पाकाच्छुक्लं रूपं नष्टं श्याममुत्पन्नमिति प्रतीतेः । न चेयं भ्रान्तिः । बाधकाभावात् । न चोत्पादविनाशौ समवायस्य प्रतीयेते इति युक्तम् । तदनुल्लेखात् ।

उद्योतः–किं च पक्षद्वयेऽप्यंत्येत्यादि व्यर्थम् । सर्वेषामेव शब्दानां स्वज्ञानद्वाराऽर्थज्ञानजनकत्वात् । अर्थज्ञानानन्तरमेव स्वरूपतोऽर्थतो बोधाच्च । अंत्यशब्दस्य प्रागुक्तार्थे शक्त्यभावाच्च । अपि च बहुव्रीहौ बुद्धिनिर्ग्राह्यांत्यकमिति स्यात् । विशेषणत्वात् । किं चाद्यव्याख्यायामुपाधित्वेनेत्यसमंजसम् । सर्वेषामेव शब्दानां तथात्वेनास्य वैलक्षण्यानापत्तेः । पक्षद्वयेऽपि लक्षणापत्तेश्चेति दिक् । तत्र डित्थादिपदं डित्थादिपदवति शक्तमित्याकारः शक्तिग्रहः । न चैतादृशशक्तिग्रहात्पूर्वं डित्थादिपदवत्त्वेनाज्ञानात्कथं तदवच्छिन्ने शक्तिग्रहः । संबन्धसामान्येन वैशिष्ट्यस्यैव तत्र निवेशात् । यद्वा गुणगुणिनोरिव वाच्यवाचकयोरपि तादात्म्यांगीकाराददोषः । वाचकत्वाख्यसंबंधविशेषग्रहस्तु पश्चादेवेति बोध्यम् । **चतुष्टयीति** । उपाधेर्विशेषणस्य चातुर्विध्यादित्यर्थः । प्रवृत्तिरितीत्यस्य उवाचेति शेषः । प्रवृत्तिः प्रवृत्तिनिमित्तम् । **परमाण्वादीति** । आदिना परममहच्छब्दसंग्रहः । परमाणुशब्दः परिमाणविशेषे तद्वति च । **गुडतण्डुलादिनिष्ठानामिति**—तन्निष्ठविक्लित्तीनां भेदे तदनुकूलव्यापाराणामपि भेद इति भावः । कारणभेदस्य कार्यभेदनियामकत्वादित्याशयः । **उक्तदोषः** । आनन्त्यव्यभिचाररूपः । **भेद इवेति** । प्रत्यभिज्ञालाघवादिभिः शुक्लादीनामैक्यसिद्धौ भेदप्रतीतिराश्रयभेदौपाधिकी । तत्संबंधस्यैव च नाशोत्पादाविति भावः । **आलंबनम्** । प्रतिबिंबाश्रयः । **प्रतीतेरिति** । अबाधिततारतम्यप्रतीतेश्चेत्यपि बोध्यम् । **अनुगतः** । एकाकारः । प्रत्ययेत्यभिधान-

प्रभाः–चतुर्विधप्रवृत्तिनिमित्तभूतोपाधिभिर्गवादीनां विषयविभागवचनं भाष्यकारस्य तादृशोपाधित्वे संज्ञाशब्दस्य मानमिति भावः । परमाण्वादिशब्दानामित्यत्रादिशब्देन परममहच्छब्दादिपरिग्रहः । परमाण्वादीनामणुपरिमाणादीनाम् । अत्रादिपदात्परममहत्परिमाणादिग्रहः । अस्मदुक्तजातित्वस्य वैशेषिकाभिमतगुणत्वेन न विरोध इत्याह--**सत्यमिति** । उक्तदोष आनन्त्यव्यभिचाररूपः । **एकरूपेति** । लाघवसहकृतप्रत्यभिज्ञावशेनाभेदसिद्धिरिति भावः । आलम्बनं प्रतिबिम्बाश्रयः । **तदनुल्लेखादिति** । नाशप्रतियोगित्वेन समवायस्याविषयीकरणादित्यर्थः । एतच्च शुक्लतरं शुक्लतममिति तारतम्यप्रतीतेरप्युपलक्षणम् । **अनुगतप्रत्ययेति** । अनुगतशब्दरूपाभिधानस्य प्रत्ययद्वारैवार्थानुगमसाधक-

भिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यम् । गुडतण्डुलादिपाकादिष्वेवमेव पाक-
त्वादि । बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च, प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा
डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये । तद्वान् अपोहो वा

the white colours etc., though they are (really) different as abiding in different substrata like snow, milk, conch etc. Similarly is present the generic chracteristic '*cookingness*' in the cookings of molasses, rice etc. So is there present the generic attribute of Dittha-ness in the words like Dittha, as uttered by an infant, an adult or a parrot, or (it may be said), in the objects like Dittha that are changing every moment. Thus, according to others, it is Generic attribute only that is responsible for the currency of a word. Some have said that the sense of a word is an individual as qualified by the generic attribute; yet some others have stated it to be

प्रदीपः–तथा चानुगतप्रत्ययानुरोधेन तत्रापि शुक्लत्वादिजातिः । लाघवाच्च तत्रैव संकेत इत्यभ्युपेयम् । एवं गुडतण्डुल्पा-
कादिष्वपि पाकत्वादिकम् । तथा तारत्वादिविरुद्धधर्माध्यासाद्बालवृद्धाद्युदीरितडित्थादिशब्देष्विव । डित्थाद्यर्थेष्वपि बाला-
द्यवस्थापरिणतनानापरिमाणरूपविरुद्धधर्माध्यासाद्भिन्नेषु डित्थत्वादिकं जातिः । सैव च डित्थादिपदशक्या । एकत्वात् ।
इत्यङ्गीकर्तव्यम् । एतेन 'बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्था-
दित्वमस्ति' इति व्याख्यातम् । इवार्थेन वाशब्देन चशब्दस्य स्थानविनिमयात् । यद्वा सर्वेष्वेव वाच्येषु सामान्य-
मस्तीत्यत्र तद्वाक्यतात्पर्यम् । अथवा भाष्यकारमते डित्थादिशब्द एवोपाधिरिति तन्मतेऽपि शब्दस्य नानात्वात्तन्निष्ठा
जातिरेव शक्याङ्गीकार्येति तत्तात्पर्यम् । तस्मात्सर्वशब्दानां जातिरेव संकेतविषयः" इत्याहुः । येषां मते संज्ञा-
शब्दानां शब्दो नोपाधिः किन्तु ततो धर्मिमात्रप्रतीतिस्तेषां मते आकाशादिशब्दानां कथं जातौ संकेत इति चिन्त्यम् ।

उद्योतः–स्याप्युपलक्षणम् । अभिधानं शाब्दव्यवहारः । **एवम्** । अनुगतप्रत्ययाभिधानाभ्याम् । शब्दे-
ष्वपि भेदस्य साध्यतयोपमानत्वायोगादाह–**यद्वेति** । सर्वेष्वेव वाच्येष्विति पाठः । शब्दपरेषु शब्देषु
शब्दस्यैव वाच्यत्वादिति भावः । **अथवेति** । बालाद्युदीरितानां तेषामनेकत्वात्तद्भेदेन व्यंग्यस्यापि
भेद इत्याशयः । **शब्दो नोपाधिरिति** । किं तु निर्विकल्पक एव बोध इति भावः । **तेषां मते**
इति । धर्मिमात्रस्य ततो बोधांगीकर्तॄणां मते जातेर्बोधाविषयत्वादिति भावः । **आकाशादिपदानां**
चेति । एकव्यक्तिमात्रवृत्तिजात्यनंगीकारादित्यर्थः । आनंत्यव्यभिचाराभावेन व्यक्तावेव शक्त्यौ-
चित्यमिति भावः । **चिन्त्यमिति** । चिंताबीजं तु शब्दाश्रयत्वेनैव ततो बोधस्यानुभविकत्वेन
शब्दवृत्तिजातिरेव प्रवृत्तिनिमित्तम् । न चाकाशः शब्दाश्रयः इति सहप्रयोगानुपपत्तिः । पदवाच्य-
त्वपरतया परिहारादिति बोध्यम् । केचित्तु जातिपदं अखंडोपाधिपरम् । तेनाकाशत्वाभावत्वादिप-
रिग्रह इत्याहुः । जातिरेवेति पक्षे शुक्लादिपदैः शुक्लत्वजात्या स्वाश्रयाश्रयत्वपरंपरया पटादेराक्षेप
इति बोध्यम् । एतेन गोत्वादिभिः स्वसमवाय्यवयवाक्षेपः स्यादिति निरस्तम् । साक्षात्स्वाश्रयेऽन्व-

प्रभाः–त्वात्पृथगनुक्तिः । एवमनुगतप्रत्ययेन पाकत्वादिकमित्यस्य जातिरित्यग्रतनेनान्वयः । डित्थादिपदशक्येत्यत्रादिपदेन
चैत्रादिपदसंग्रहः । **व्याख्यातमिति** । साक्षादर्थगतजातिं विहाय शब्दगतजातौ शक्तिकल्पनानौचित्येन यथाश्रुता-
संगतेरिति भावः । वाशब्दस्येवार्थत्वस्य स्थानविनिमयस्य च क्लिष्टा कल्पनेत्यरुचेराह––**यद्वेति** । 'वाच्येषु' इति
पाठः । डित्थशब्दं शृणोमीत्यादौ शब्दस्यैव वाच्यत्वात्तद्गतैव जातिस्तदर्थ इति भावः । अत्रापि संदर्भास्वारस्यादाह—
अथवेति । येषामिति । चण्डीदासादीनामित्यर्थः । आनन्त्यव्यभिचाराभावाद्धि संज्ञाशब्दस्योपाधित्वं तेनाङ्गीकृतम् ।
तत एव हेतोरिहाप्युपाध्यभावे किंगता जातिः स्यात् । आकाशस्यैकत्वादुपाधेश्चानङ्गीकारात् । तथा च सर्वेषामित्यसंगतं

शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम् ।

(14)

अभिधा defined.

(सूत्र ११) स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥ ८ ॥

the exclusion of the individual (from what it is not). These views have not been detailed out for fear of making the work unwieldy, and because they have no bearing on the matter on hand.

That is the Primary Sense; and the primary operation of the word (ASYA) leading to it (TATRA) is called Expression,

प्रदीपः–नैयायिकादयस्तु–' न व्यक्तिमात्रं शक्यम्, न वा जातिमात्रम् । आद्ये आनन्त्याद्व्यभिचाराच्च अन्त्ये व्यक्तिप्रतीत्यभावप्रसङ्गात् । न चाक्षेपाद्व्यक्तिप्रतीतिः । तस्माद्विशिष्ट एव संकेतः । न चानन्त्यादशक्यता व्यभिचारो वा । गोत्वादिसामान्यलक्षणया सर्वव्यक्तीनामुपस्थितौ सर्वत्र संकेतग्रहसौकर्यात् ' इत्यातिष्ठन्ते ।

सौगतास्तु–' व्यक्तावानन्त्यादिदोषाद्भावस्य च देशकालानुगमाभावात्तदनुगतायामतद्व्यावृत्तौ संकेतः ' इत्यादिमतानि प्रकृतानुपयोगान्न सूत्रकृता दर्शितानि ।

ननु वाच्यलक्ष्यव्यङ्ग्याः पदार्था इति विभागोऽनुपपन्नः । मुख्यत्वेन प्रसिद्धस्य तुरीयस्यापि भावादित्यत आह–**स इति** ।

साक्षात्संकेतित एवार्थो मुख्यत्वेन प्रसिद्ध इत्यर्थः । कथमसौ तथेत्यत आह--**तत्रेति** ।

अस्य शब्दस्य तत्रार्थे योऽभिधारूपो व्यापारः स मुख्यो यत उच्यते इत्यर्थः । यद्वा अभिधाव्यवहारस्य नाभिधा समयाभावादित्यादौ दर्शनात्तां लक्षयति--तत्र मुख्य इत्यादि । तत्र यो व्यापारः सोभिधेत्युच्यत इत्यर्थः । मुख्यत्वोत्कीर्तनं च वक्ष्यमाणस्य लक्षणायास्तद्बाधपुरःसरत्वस्योपपत्तये ।

उद्योतः–यासंभवे एव परंपरया आश्रयस्याक्षेपात् । तच्छक्तपदस्य तादृशशाब्दबुद्धित्वं कार्यतावच्छेदकमिति पक्षे तु दोषशंकैव नेति दिक् । न **चाक्षेपादिति** । तथा सति वृत्त्याऽनुपस्थितत्वेन शाब्दबोधविषयत्वानुपपत्तिरिति भावः । **सर्वत्र सौकर्यादिति** । संकेतग्रहस्येत्यर्थः । **अनुगमाभावादिति** । क्षणभङ्गवादिनः स्थिरसामान्याभावादित्यर्थः । **प्रकृतानुपयोगादिति** । उपाधिशक्तौ हि विशेष्यस्य व्यंग्यत्वसंभवात्तत् प्रकृतोपयोगि । नैवमुपहितशक्त्यादिमतमिति भावः । **अभिधारूपो व्यापार इति** । ज्ञायमानवृत्तेर्व्यापारत्वमित्यभिमानः । **सोऽभिधेत्युच्यत इति** । एवं च संकेतितार्थबोधज-

प्रभाः–स्यादिति भावः । व्यक्तिमात्रे शक्तिरिति पक्षे सर्वत्र व्यक्तौ, क्वचिद्वा । आद्ये आनन्त्यादिति । अन्त्ये व्यभिचारादिति । **न चेति** । अनुमानस्यार्थापत्तेर्वा आक्षेपपदार्थस्यानवतारेऽपि व्यक्तिप्रतीतेः, आक्षेपनियमेपि वृत्त्यनुपस्थितत्वेन शाब्दप्रतीत्ययोगाच्चेति भावः । विशिष्टशक्तिपक्षेऽपि सर्वत्र क्वचिद्वेति विकल्पाभिप्रायेण दोषद्वयमाशङ्क्याद्यपक्षाङ्गीकारेण समाधत्ते--**सामान्येति** । सर्वत्र व्यक्तौ । सौकर्यात् संकेतग्रहसौकर्यात् । भावस्य जात्यादिरूपस्य । **देशेति** । भावमात्रस्य क्षणिकत्वादिति भावः । अतद्व्यावृत्तौ अघटव्यावृत्तौ । **प्रकृतेति** । प्रामाणिकोक्तमतानुसारेणैव प्रकृतार्थविभागसिद्धौ मतान्तरकथनानुपयोगादिति भावः । उपयोगे सति ग्रन्थगौरवस्यादोषत्वात्तदुपेक्षणम् । **अभिधारूप इति** । साक्षात्संकेतितार्थप्रतीत्यनुकूलः शब्दव्यापारोऽभिधा । स च पदज्ञानम्, तद्गोचरः संस्कारो वा । तदुक्तं न्यायरत्नमालायां पार्थसारथिमिश्रैः—' कस्तर्ह्यस्य व्यापारः । स्वज्ञानमेव, तज्जनितो वा संस्कारः । तद्योगी शब्दोऽर्थप्रतीतिं जनयति ' इति । **अभिधेति** । शब्दस्य व्यापारो य उक्तः स क इति प्रश्नः । तदुत्तरं स्वज्ञान-

स इति साक्षात्संकेतितः । अस्येति शब्दस्य ।

(15)

लक्षणा defined.

(सूत्र १२) मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥ ९ ॥

SAH i. e. the one with regard to which there is a direct convention. ASYA i. e. of the word.

Indication is that operation, imaginarily attributed (to word) on account of which (YAT = YAYĀ) a (Secondary) sense different (from the Primary) is apprehended, whether on the basis of Usage or Purpose, when the Primary sense is found incongruous, provided such a secondary sense is connected with it (i. e. Primary sense).

प्रदीपः–यत्तु-मुख्यार्थबाधे तद्योग इत्यादिकारिकोपयुक्ततया वाच्यस्य संज्ञान्तरं करोति–-'स मुख्य इत्यादि' इति सूत्रावतारणं तदयुक्तम् । वाच्यार्थबाधे तद्योग इत्येवमेव तत्रोपपत्तौ तदर्थं संज्ञान्तरकरणस्य गौरवेणानौचित्यात् । वाचकं निरूप्य लाक्षणिकं लक्षयितुं लक्षणां लक्षयति–-**मुख्यार्थेति** ।

रूढिः प्रसिद्धिः । प्रयोजनं व्यङ्ग्यार्थप्रतिपादनरूपम् । क्रिया व्यापारः । अत्रान्योऽर्थो यल्लक्ष्यते सा लक्षणेति लक्षणम् । लक्ष्यते प्रतिपाद्यत इत्यर्थः । अतो नात्माश्रयः । मुख्यार्थबाधः शक्यसंबन्धो रूढिप्रयोजनान्यतरच्चेति हेतुत्रयवचनम् । व्यञ्जनायां शक्तिस्मृतौ चातिव्याप्तिवारणाय तद्योग इति लक्षणेऽपि प्रवेशनीयम् । योगस्य च हेतुत्वं विवक्षितम् । अतो न मुख्यार्थसंबन्धिव्यञ्जनायामप्यतिव्याप्तिः । मुख्यस्याप्यभिधारूपमुख्यार्थसंबन्धेन प्रतिपादनं

उद्योतः–नकव्यापारत्वं अभिधालक्षणम् । **मुख्यत्वेति** । 'स मुख्योऽर्थः' 'तत्र मुख्यः' इत्यनेनेत्यर्थः । कारिकया 'संकेतग्राह्यं शक्त्याख्यपदार्थान्तरमभिधा' 'तादृशं शब्दार्थयोस्तादात्म्यमभिधा' इति मीमांसकपातंजलमतमुपनिबद्धमिति बोध्यम् । पातंजलमतं वैयाकरणसिद्धांतमंजूषायामस्माभिरुपपादितम् । **तद्बाधपुरःसरेति** । अस्य मुख्यत्वे एतदभावेऽन्याश्रयणमित्यर्थाल्लभ्यते । लोकेऽपि ग्रामे कस्यचिन्मुख्यत्वे कृते तदभावे गौण आयाति । **तद्योगे** । शक्यार्थयोगे । **अथेति** । चार्थे । **प्रयोजनादिति** । प्रयोजनाभिसंधेरित्यर्थः । प्रयोजनाभिसंधिपूर्वकं लांक्षणिकशब्दप्रयोगे वक्तुः प्रवृत्तिर्भवतीति तस्य लक्षणाप्रयोजकत्वं बोध्यम् । **व्यंजनायाम्** । तज्जन्यबोधे । **शक्तिस्मृताविति** । शक्तेः शक्यार्थादन्यत्वादिति भावः । सा च न मुख्यार्थसंबंधेनोति तद्योग इत्यनेन तद्व्यावृत्तिः । **योगस्य च हेतुत्वमिति** । न च संबंधस्याव्यावर्तकतया तात्पर्यमेव तदर्थभासकमस्तु किं संबंधज्ञानेनेति

प्रभाः–मेवेत्यादि । मुख्यः प्रथमप्रत्यायकः। प्रथमं प्रतीयमानत्वेनैवार्थस्य मुख्यत्वोपपत्तेर्यत इत्यध्याहारक्लेशाच्च पक्षान्तरमाह—**यद्वेति** । तत्र साक्षात्संकेतिते । **तद्बाधेति** । मुख्यासंभवे हि तदन्याङ्गीकार इति न्यायादिति भावः । **हेतुत्रयेति** । 'लक्षणान्तर्गतत्वे हि हेत्वभावान्न लक्षणा' इत्यत्र लक्षणाहेतुत्वं वक्ष्यमाणमसंगतं स्यादिति भावः । अन्यतरच्चेत्यनेनाथशब्दोऽथवेत्यर्थको दर्शितः । प्रयोजनस्यापि स्वेच्छाद्वारा साधनप्रयोजकत्वाद्धेतुत्वम् । **व्यञ्जनायामिति** । 'उपकृतं–' इत्यादि व्यङ्ग्यापकारातिशयादिबोध इत्यर्थः । अतिशयादेरुपकारादिमुख्यार्थासंबन्धान्नातिव्याप्तिः । **मुख्यार्थसंबन्धीति** । गङ्गादिसंबन्धिपावनात्वादिबोध इत्यर्थः । अपिशब्देन शक्तिस्मृतिसमुच्चयः । शक्तेर्मुख्यार्थसंबन्धित्वेऽपि तत्स्मृतेर्मुख्यार्थसंबन्धज्ञानाजन्यत्वात् । न च तात्पर्यविरहान्नातिप्रसङ्ग इति वाच्यम् ।

'कर्मणि कुशल' इत्यादौ दर्भग्रहणाद्ययोगात् 'गङ्गायां घोष' इत्यादौ च गङ्गादीनां घोषाद्यधिकरणत्वासम्भवात् मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च संबन्धे, रूढितः

Since the Primary sense is incongruous in cases like KARMAṆI KUŚALAH and GAṀGĀYĀM GHOṢAH—there being no occasion for the handling of DARBHA (in the former instance), and (in the latter), it being impossible for (the flow of) the Ganges to be a site for the hamlet;—since there is a connexion (between the sense Primary and sense Secondary) viz. (like) discrimination (in the former) and proximity (in the latter);—since the Secondary sense comes into vogue (in the former

प्रदीपः–संभवतीति तद्वारणायान्य इत्युक्तम्। अन्योऽमुख्यः। यदिति गुणीभूतलक्षणक्रियामात्रपरामर्शः। तेन 'शक्यसंबन्धेनाशक्यप्रतिपत्तिर्लक्षणा' इति प्राचीनमतेनैतल्लक्षणम्। 'तद्धेतुः शक्यसंबन्धो लक्षणा' इति परमार्थः। प्रतिपत्तिहेतुर्हि वृत्तिः, न तु प्रतिपत्तिरेव। यत्तु यदित्यस्य यत इत्यर्थकतया संबन्धपरतयैव सूत्रव्याख्यानं तदयुक्तम्। 'नाभिधा समयाभावाद्धेत्वभावान्न लक्षणा' इत्यत्र 'मुख्यार्थबाधादित्रयं हेतुः' इति व्याख्यानविरोधात्। न हि

उद्योतः–वाच्यम्। अनुपस्थिते पदार्थे तात्पर्यस्य ग्रहीतुमशक्यत्वात्। संबंधग्रहश्च प्रागेव कदाचिज्जातः। एवं च प्रागगृहीतसंबंधेन पुंसा तेन संबन्धेन तटादिस्मृतौ पश्चात्तत्र तात्पर्यग्रहे तच्छाब्दबोधः। अनुपपत्तिप्रतिसंधानस्यापि तात्पर्यग्रह एवोपयोगो बोध्यः। **गुणीभूतेति**। कर्तृविशेष्यकबोधनये इदम्। क्रियाविशेष्यकबोधनये तु न कश्चिद्दोषः। तेन **शक्यसंबंधेनेति**। अननुगततज्ज्ञानहेतुकेत्यर्थः। पदात् शक्यस्मृतिः। तया च शक्यसंबंधिलक्ष्यस्मृतिरिति तन्मतम्। अत्र नव्याः। मुख्यार्थबाधज्ञानकालिकत्वमपि शक्यसंबंधज्ञाने देयम्। तेन मुख्यप्रवाहाद्यबाधज्ञानकालिकतीरादिस्मृतौ नातिव्याप्तिः। गुणो द्रव्यमित्यादौ गुणपदेन स्वकारणत्वेन ज्ञातगगनोपस्थितौ च नातिव्याप्तिः। वस्तुगत्या गुणस्य गुणपदशक्यत्वेऽपि शक्यत्वेन तदाऽग्रहात्। मुख्यार्थबाधे इत्यस्य च तात्पर्यविषये इतरपदार्थे मुख्यार्थतावच्छेदकावच्छिन्नबाधज्ञानकालीनेत्यर्थः। तेन छत्रिणो यांतीत्यादौ नाव्याप्तिः। तात्पर्यविषये अच्छत्रिगमने छत्रिणामन्वयबाधात्। निर्हेतुकलक्षणाभासेऽतिव्याप्तिवारणाय रूढित इत्यपि लक्षणे निवेश्यम्। एवं च शक्तित्वेन शक्तिज्ञानजन्यशक्यस्मृतिविषयशक्यसंबंधज्ञानजन्या तात्पर्यविषयेतरपदार्थतावच्छेदकावच्छिन्ने मुख्यार्थतावच्छेदकरूपेण तदवच्छिन्नान्वयबाधज्ञानकालीना रूढिप्रयोजनान्यतरहेतुका अशक्यार्थप्रतिपत्तिस्तज्जनकज्ञानविषयशक्यसंबंधरूपव्यापारो वा लक्षणेत्याहुः। **न तु प्रतिपत्तिरिति**। यदि त्वन्वयबोधरूपप्रतिपत्तिहेतुर्वृत्तिरियं तु स्मृतिरित्युच्यते तदा मूलोक्तमपि सम्यक्। **हेतुर्घटत इति**। शाब्दबोधजनकशक्यसंबंधस्यैव

प्रभाः–तात्पर्यग्रहेऽप्युक्तोपस्थितिरूपवृत्त्यभावे घटः कर्मत्वमित्यादित इव शाब्दबोधानुदयात्। वृत्तेस्तात्पर्यनिर्वाहकत्वात्। मुख्यार्थबोधश्च शब्दतावच्छेदकरूपेण तात्पर्यविषयान्वयबाधः। तेन 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ न व्यभिचारः। न च तदभावेऽपि गङ्गादिपदात्तीराद्युपस्थितिः। मुख्यार्थोपस्थितेरेव गङ्गापदस्योपक्षीणतया विरम्य व्यापारायोगात् तत्र तीराद्युपस्थितेः पदव्यापाराकल्पनात्। अतो न व्यभिचारः। एवं रूढिप्रयोजनयोरभावस्थलेऽप्यशक्योपस्थितेः शब्दवृत्तित्वाकल्पनान्न व्यभिचारः। तथाभूतोपस्थितावेव तद्धेतुत्वोपगमादिति दिक्। लक्षणं निष्कृष्य दर्शयति—**तेनेति**। प्रतिपत्तिरित्यनन्तरं शब्दव्यापार इत्यध्याहार्यम्। वक्ष्यमाणास्वरसादाह—**तद्धेतुरिति**। अशक्यप्रतिपत्तिहेतुरित्यर्थः। एवं चैतन्मतेऽशक्यप्रतिपत्त्यनुकूलत्वेन शक्यसंबन्धग्रहे मुख्यार्थबाधादेः प्रयोजकत्वाल्लक्षणाबीजत्वप्रसिद्धिरिति ज्ञेयम्। प्राचीनमतेऽस्वरसबीजमाह—**प्रतिपत्तिहेतुर्हीति**। वस्तुतस्तु संकेतग्राह्यमर्थप्रतिपादकत्वमभिधावृत्तिः, न तु

प्रसिद्धेः, तथा, गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिः तेषां शैत्यपावनत्वादीनां धर्माणां तथाप्रतिपादनात्मनः प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ।

instance) as a matter of usage, while (in the latter) there underlies the purpose viz. of conveying the properties of Coolness, Sanctity etc. in a way in which they could not have been apprehended, were we to use the words GAMGĀTAṬE GHOṢAH;—the Primary sense conveys a Secondary sense. That operation imaginarily attributed to Word which thus results in a Secondary sense is called Indication.

प्रदीपः–संबन्धरूपत्वे लक्षणायाः संबन्धो हेतुर्घटते । ननु प्रतिपादनं चेल्लक्षणा न तर्हि शब्दधर्मः । गङ्गादिशब्दानां नीरादिकमुपस्थाप्य विरामे नीराद्यर्थेनैव संबन्धेन तीराद्यर्थप्रतिपादनादित्यत आह—**आरोपिता क्रियेति** । शक्यव्यवहितलक्ष्यार्थविषयत्वाच्छब्दे आरोपित एव स व्यापारः । वस्तुतोऽर्थनिष्ठ एवेत्यर्थः । तदेतदुक्तम्—'सान्तरार्थनिष्ठः' इति । रूढितो यथा—'कर्मणि कुशलः' इत्यादौ । अत्र दर्भग्रहणायोग्यत्वान्मुख्यार्थबाधः । विवेचकत्वं च संबन्धः ।

उद्योतः–लक्षणात्वेन तद्विशेषणलक्ष्यार्थशाब्दबोधसामग्रीप्रदर्शनपरत्वाद्धेतुपदस्य च लक्षणाविशेषणांशप्रयोजकपरत्वान्न काप्यसंगतिरिति चिंत्यमेतत् । **प्रतिपादनं चेदिति** । भावल्युडंतं करणल्युडंतं वा । **आरोपित एवेति** । स्वहेतुसंबंधप्रतियोगिशक्तत्वसंबधरूपपरंपरयाशब्दनिष्ठत्वमात्रेणारोपितत्वोक्तिः । तादृशसंबंधसत्त्वात्तत्रारोप इत्यर्थो वा । **वस्तुत इति** । साक्षात्संबंधेनेत्यर्थः । **सांतरार्थनिष्ठ इति** । साक्षादर्थनिष्ठः सांतरा परंपरया शब्दनिष्ठ इत्यर्थः । विभक्त्यर्थान्वये प्रकृतिजन्योपस्थितेर्हेतुत्वात् स्वशक्यसंबंधेन गंगादिपदजन्यैव तीराद्युपस्थितिरित्येव युक्तमिति । शक्यसंबंधस्यैव लक्षणात्वेऽपि तस्यापि परंपरयैव शब्दनिष्ठत्वं बोध्यम् । तथा च तीरादिरूपोऽर्थः स्वशक्यसामीप्यादिसंबंधेन गंगापदवानिति ज्ञानमेव लक्षणाज्ञानम् । तदेव च शाब्दबोधे हेतुः । एवं च लक्षणाजन्यशाब्दबोधे

प्रभाः–संकेत एव । नाभिधासमयाभावादिति वक्ष्यमाणत्वम् । एवं च यथापूर्वगृहीतमर्थप्रतिपादकत्वमुत्तरोत्तरार्थप्रतिपत्तिहेतुः, तथा शक्यसंवन्धेनाशक्यार्थप्रतिपादकत्वमपि लाघवन्यायादिगृहीतं तत्प्रतिपत्तिहेतुरिति न कश्चिद्दोषः । तदुक्तं वृत्तिवार्तिकेऽप्यप्पय्यदीक्षितैः–'मुख्यार्थसंवन्धेन शब्दस्य प्रतिपादकत्वं लक्षणा' । इत्यलं विस्तरेण । **नन्विति** । प्रतिपादनमशक्यार्थप्रतिपादकत्वम् । संबन्धेन स्वसंवन्धेन सामीप्यादिना । तथा च शब्दस्य मुख्यार्थोपस्थानेनोपक्षीणत्वादर्थ एव लक्षक इत्यर्थः । सत्यम् । मुख्यार्थगतमेवाशक्यार्थप्रतिपादकत्वम् । परंतु मुख्यार्थवाधेन शब्दस्य तद्विषयत्वायोगात्तद्द्वारा लक्ष्यार्थपरत्वात्तन्निर्वाहार्थं शब्दव्यापारत्वं तस्य कल्प्यते । अन्यथा लक्ष्यस्य शब्दानुपस्थितस्य शाब्दबोधविषयत्वानुपपत्तेरित्याशयेन समाधत्ते—**शक्यव्यवहितेति** । इदमेव सान्तरेत्यनेनोक्तमित्याह—**तदुक्तमिति** । सान्तरः शक्यव्यवहितो योऽर्थो लक्ष्यार्थस्तन्निष्ठः । तद्विषय इत्यर्थः । 'सर्वं वाक्यं कार्यनिष्ठं' इति गुरूक्तिवत् । तथा च शब्दस्य लक्ष्यार्थविषयत्वं लक्षणाधीनमित्यतः शब्दे लक्षणारोप इति भावः । एवं च स्वप्रयोजकशक्तिमत्त्वरूपपरम्परासंबन्धेन शब्दवृत्तित्वादारोपितत्वोक्तिरिति ज्ञेयम् । **कर्मणीति** । चित्रकर्मणीत्यर्थः । न च मुख्यार्थबोधाप्रतिसंधानेऽपि झटिति दक्षबोधात्तत्र शक्तिरेव । अन्यथा मण्डपपदस्यापि गृहादौ शक्त्यभावप्रसङ्ग इति वाच्यम् । मण्डपादिपदस्यापि गृहादौ निरूढलक्षणाङ्गीकारात । न चैवं पङ्कजादिष्वप्येवमापत्तौ योगरूढिविलोपापत्तिः । तत्र योगार्थविशिष्टरूढ्यर्थस्यैव नियतोपस्थित्या रूढिकल्पनेन वैषम्यात् । मुख्यार्थबाधप्रतिसंधानमपि व्युत्पन्नानामस्त्येव । कदाचिच्छक्तिभ्रमाद्बोधे तदभावेऽपि न क्लृप्तावयवशक्तिकस्यान्यत्र लक्षणयैवोपपत्तावतिरिक्तशक्तिकल्पनाया अन्याय्यत्वात् ।

(16)

Two Divisions of शुद्धालक्षणा.

(सूत्र १२) स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ ५ ॥

Indication Pure only is stated to be of two kinds: UPĀDANA and LAKṢAṆA, according as the Primary sense conveys a Secondary sense in order to establish itself (as plausible), or surrenders itself for the sake of the Secondary sense.

प्रदीपः–एवमन्यत्राप्यूह्यम् । तथा च तैलङ्गादिजनपदशब्दा जने, त्वक्शब्दस्त्वगिन्द्रिये । प्रयोजनाद्यथा–'गङ्गायां घोषः' इत्यादौ । अत्र हि गङ्गातीरे घोष इति मुख्यशब्दात्तादृशं पावनत्वं न प्रतीयते यादृशं 'गङ्गायां घोषः' इति लाक्षणिकात् ।

लक्षणा तावद्द्विविधा–शुद्धा गौणी च । तत्राद्या द्विविधा––उपादानलक्षणा लक्षणलक्षणा च । ते अपि प्रत्येकं सारोपा साध्यवसाना चेति द्विविधे । इति शुद्धाभेदाश्चत्वारः । गौणी तु द्वेधा––सारोपा साध्यवसाना च । इति षड्विधत्वं लक्षणायाः कारिकात्रयेण प्रतिपादयति–**स्वसिद्धये इति ।**

स्वसिद्धये स्वार्थस्यान्वयप्रवेशसिद्धये । पराक्षेपः परलक्षणम् । स्वार्थापरित्यागेन परार्थलक्षणमुपादानमित्यर्थः । अतः 'काकेभ्यो दधि रक्ष्यताम्' इत्यस्य न तृतीयभेदत्वम् । एवं परार्थं स्वसमर्पणं परस्यान्वयप्रवेशसिद्ध्यर्थं स्वसमर्पणं स्वार्थसमर्पणं स्वार्थपरित्यागः । स्वार्थपरित्यागेन परार्थलक्षणं लक्षणमित्यर्थः । एताभ्यामुपाधिभ्यां शुद्धैव द्विविधोक्ता,

उद्योतः–तादृशज्ञानजन्योपस्थितित्वेन हेतुत्वमिति तीरं प्रवाहसंबंधीति ज्ञानस्य न हेतुत्वेन शक्तिज्ञानजन्यस्मृतित्वेन हेतुत्वं वाच्यमित्यतिगौरवम् । एवं च यत्र क्वचित् तादृशपदसंबंधाग्रहस्तीरादौ, किन्त्वर्थसंबंधग्रह एव तत्रापि मानसतादृशग्रहोत्तरमेव लक्षणाजन्यबोध इति न व्यभिचारोऽपीत्याहुः । **विवेचकत्वमिति ।** तद्रूपं सादृश्यमित्यर्थः । विवेचकत्वं च सतो ग्रहणमसतः परित्यागरूपं कुशग्राहाण दक्षे च वतत इति भावः । कर्मणि कुशलः, लावण्यं, मंडपः, कुण्डलमित्यादौ दक्षत्वादेः प्रवृत्तिनिमित्तत्वात् व्युत्पत्तिनिमित्तस्य च झटित्यप्रतीतेर्बाधप्रतिसंधानं विनाऽपि तत्प्रतीतेश्च कुशेः कलचि कुशलपदस्य वैयाकरणैः साधनाच्च रूढिशक्तिरेवात्रेति केचित् । इत एव वाऽस्वरसादाह–**त्वगिति ।** एवं तैलपदस्य तिलविकारे द्रवे शक्तस्य सार्षपे निरूढलक्षणा । **घोषः ।** आभीरपल्ली । अर्थांतरसंक्रमितवाच्यध्वन्यादिव्यवस्थायै लक्षणां विभजते—**लक्षणेति । ते अपीति ।** उपादानलक्षणलक्षणे इत्यर्थः । तत्रोपादानलक्षणा सारोपा यथा । कुंताः पुरुषाः प्रविशन्ति । साध्यवसाना यथा । कुंताः प्रविशन्तीति कुन्तान् भोजयेति च । लक्षणलक्षणा तु तद्रूपा उदाहरिष्यते मूल एवेति बोध्यम् । लक्ष्यवाचकपदसत्त्वासत्त्वमात्रेणारोपाध्यवसानव्यवहार इति बोध्यम् । स्वार्थापरित्यागश्च विशेष्यान्वयिनान्वयित्वम् । स्वार्थपरित्यागश्च तस्योपस्थितिसत्त्वेऽपि शाब्दबोधेऽप्रवेशमात्रमित्याहुः । **शक्यावृत्तितयेति ।** सादृश्यस्य भेदघटितत्वादिति भावः । **सादृश्यसंबंधयुक्तलक्षणाया एव**

प्रभाः–क्षतिः । **तैलङ्गादीति ।** न च विनिगमकाभावः । जनेषु प्रवृत्तिनिमित्तस्यैकस्यासंभवात् । एवमिन्द्रियमजानतोऽपि त्वचि त्वक्पदप्रयोगात्तत्रैव शक्तिरिति दिक् । तादृशं साक्षाद्गङ्गागतम् । 'लक्षणा तेन षड्विधा' इति वक्ष्यमाणषड्विधत्वस्य प्रकारं कारिकास्वरससिद्धं विशदीकृत्य दर्शयितुमाह—**लक्षणेति ।** ते अपि उपादानलक्षणालक्षणलक्षणे अपि । अन्वयप्रवेशसिद्धये समभिव्याहृतपदार्थान्वयबोधविषयत्वसिद्धये । स्वार्थापरित्यागेन स्वार्थसाहित्येन । स्वार्थपरित्यागेन

'कुन्ताः प्रविशन्ति' 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते, तत उपादानेनेयं लक्षणा। 'गौरनुबन्ध्यः' इत्यादौ

In KUNTĀH PRAVIŚANTI, (Lances enter) or YAṢṬAYAH PRAVIŚANTI (Staffs enter), KUNTĀH (Lances) etc. convey (the sense of) men in possession of them, in order to make their entrance plausible; thus this variety of Indication is based on a *take-in* (of the primary sense). It should not be urged:—"In a case like GAUR ANUBANDHYAH (ox should be tied), we have an instance of UPĀDĀNA LAKṢAṆĀ,

---

प्रदीपः-न तु गौण्यपीत्यर्थः । एते एवान्यत्र जहत्स्वार्थाजहत्स्वार्थे इत्युच्येते । ननु शुद्धैवेत्यनुपपन्नम् । गौण्या अपि तथात्वसंभवात् । तथा हि--'गौर्वाहीकः' इत्यादौ लक्षणलक्षणा तावत्स्फुटैव । उपादानलक्षणा तु गोवाहीकोभयविषये गाव एते समानीयन्तामित्यादाविति चेत्, मैवम् । अत्रोपचारबीजं संबन्धः सादृश्यमन्यो वा । आद्ये शक्यसादृश्यस्य शक्यावृत्तितया कथं शक्यस्यापि लक्ष्यता । येनोपादानलक्षणा स्यात् । अन्त्ये कथं गौणी । सादृश्यसंबन्धप्रयुक्तलक्षणाया एव गौणीत्वात् । तत्रोपादानलक्षणा यथा—'कुन्ताः प्रविशन्ति' 'यष्टीः प्रवेशय' इत्यादौ । अत्र कुन्तादयः स्वतोऽसंभवत्प्रवेशास्तत्सिद्धये स्वसंयोगिपुरुषाँल्लक्षयन्ति । यथा च 'काकेभ्यो दधि रक्ष्यताम्' इत्यादि संग्रहस्तथोक्तम् । अन्ये पुनर्जातिपदार्थवादिन उपादानलक्षणामन्यामुदाहरन्ति । यथा—'गौरनुबन्ध्यः' इति श्रुत्या

उद्योतः–गौणीत्वादिति । साधारणधर्मप्रकारेणेत्यादिः। एतेन कुंताः पुरुषा इत्यादौ सादृश्यसंबंधेन कुंतपदस्य कुंतवत्पुरुषलक्षणायां कुंतानुप्रवेशसत्त्वादुपादानत्वं दुर्वारमित्यपास्तम् । एवं गंगैव घोषवतीत्यादौ शैत्यपावनत्वादिप्रकारकलक्षणायां कुंताः प्रविशंतीत्यादावपि पीडाकारित्वादिना लक्षणायां च गौणत्वं संभवत्येव । लक्षणलक्षणात्वं तु गौण्या इष्टमेवेति भावः । नव्यास्तु यदा यत्किंचिद्गोसदृशत्वेन गोवाहीकसमुदायप्रतिपिपादयिषया गाव एते यांतीति प्रयुक्तं तदा गौण्यप्याद्या दुर्वारैव । वस्तुतो रूपके भेदाघटितसादृश्यस्यैव संबंधतया वक्ष्यमाणत्वेन सा दुर्वारैवेत्याहुः । केचित्तु पंकजं कुमुदमित्यादौ पंकजादिपदानां योगार्थमात्रे लक्षणास्थले जहदजहल्लक्षणा तृतीयाऽपि । न च योगमात्रेण निर्वाहे किमत्र लक्षणया । एकपदोपस्थाप्यत्वप्रत्यासत्त्या प्रथमं रूढ्यर्थे योगार्थस्यान्वयेन जनितान्वयबोधतया निराकांक्षत्वेन पुनरनुसंधानकल्पने मानाभावेन च कुमुदतात्पर्यग्रहस्य तद्बाधप्रतिसंधानपूर्वकं नियमेन ग्रहाच्च लक्षणाया एवौचित्यात् । रूढ्यर्थविशेष्यकयोगार्थबोधस्यैव व्युत्पन्नत्वाच्चेत्याहुः । वस्तुतस्तु इयं जहत्स्वार्थैव । परार्थे स्वसमर्पणमिति तल्लक्षणात् । तत्र स्वसमर्पणं स्वार्थत्यागः । स च स्वार्थत्वावच्छिन्नस्य यस्य कस्यचित् अवच्छेदकावच्छिन्नस्य वेत्यन्यदेतत् । **असंभवत्प्रवेशाः** । असंभवत्प्रवेशान्वयाः । **तत्सिद्धये** । स्वीयशक्यार्थस्य प्रवेशान्वयसिद्धये । यष्टीः प्रवेशयेत्यत्र च तात्पर्यविषयीभूतभोजनाद्यर्थप्रवेशाद्यन्वयानुपपत्तिर्द्रष्टव्या । रूढौ तु श्वेतो धावतीति । यत्तु शक्त्योपस्थितकुंतसंयोगित्वं लक्ष्यतावच्छेदकम् । अतिगहनत्वप्रतीतिः प्रयोजनम् । यष्टीः प्रवेशयेत्यत्र च तात्पर्य- कुंतस्य लक्षणयोपस्थितसंबंधिन्यन्वयाद्विशिष्टलाभ इति । तन्न । एकपदार्थयोर्भेदेन परस्परमन्वयस्य

प्रभाः-स्वार्थस्य समभिव्याहृतपदार्थान्वयत्यागेन। परार्थलक्षणं परार्थोपस्थापनम्। एवं च समभिव्याहृतपदार्थान्वयित्वेन स्वार्थविवक्षया तत्साहित्येनाधिकार्थोपस्थापनमुपादानम् । तत्त्वेन स्वार्थत्यागेनेतरार्थोपस्थापनं लक्षणमिति फलितम्। **अन्यत्रेति** । शास्त्र इत्यर्थः । **स्फुटैवेति** । गोर्वाहीकोभयानुगतजाड्यमान्द्यादिविशिष्टलक्षणया जडो वाहीक इत्यन्वये गोरप्रवेशादिति भावः । अशक्ये शब्दप्रयोग उपचारः । **शक्यावृत्तितयेति** । सादृश्यस्य भेदगर्भत्वादिति भावः ।

श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या। न ह्यत्र प्रयोजनमस्ति। न वा रूढिरियम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्ति-

inasmuch as therein an individual is *indicated* by the class, in view of the implausibility of the slaughter as enjoined by the Śruti applying to the whole class, and is not *expressed* (ŚABDENA UCHYATE), as follows from the principle that the Expressive Power cannot reach the thing qualified owing to its capacity being exhausted in (expressing) the attribute" For, here there is no purpose; nor is this a usage. The individual is conveyed by the class owing to the latter being invariably connected with the former; as the subject is conveyed in

प्रदीपः–प्रतिपादितमनुबन्धनं गोपदार्थस्य जातेर्मम कथं स्यादिति जात्या अवच्छेदकतया कथंचित्स्वान्वयसिद्धये व्यक्तिर्लक्ष्यते। ननु व्यक्तिरभिधेयैव न तु लक्ष्येति चेत्, न। व्यक्तौ केवलायामेवाभिधा जातिविशिष्टायां वा। आद्ये आनन्त्यव्यभिचारौ। अन्त्ये नागृहीतविशेषणान्यायेन जाताववाभिधा। व्यक्तिप्रतीतेराक्षेपादेव संभवात्। तदुक्तम्– 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति। तदेतदपेशलम्। प्रयोजनस्य रूढेर्वा तृतीयलक्षणाहेतोरभावात्। जातिव्यक्तिपदार्थौदासीन्येन हि लोकप्रसिद्धिमाश्रित्य रूढिविचारः। कथं तर्हि भट्टमते व्यक्तिप्रतीतिः। जात्या आक्षेपात्। व्यक्तिं विना तस्या अभावात्। यथा क्रियतामित्यत्र क्रियया कर्तुः, कुर्वित्यत्र कर्मणः।

उद्योतः–एवकारातिरिक्तस्थलेऽस्वीकारात्। अत एव हरिर्धावतीत्यत इंद्रसंबंधी अश्वो धावतीति न बोधः। विद्वन्मानसेत्यादौ अभेदेन बोधश्चेत्याहुः। **अन्ये इति**। मण्डनमिश्राः। स्यादितीत्यंतेन मुख्यार्थबाधसूचनम्। **अवच्छेदकतया**। स्वनिष्ठपरिच्छेदकतानिरूपकत्वेन। अनेन लक्षणामूलयोगप्रदर्शनम्। **कथंचित्**। परंपरया स्वान्वयिवृत्तित्वरूपया। **स्वान्वयसिद्धये**। स्वस्यानुबंधनान्वयसिद्धये। **नागृहीतेति**। एवं च लाघवाज्जाताववेव शक्तिरिति तद्भावः। **आक्षेपादेवेति**। आक्षेपोऽत्र लक्षणा। **क्षीणशक्तिर्विशेषण इति**। उभयत्रापि शक्तिरिति मते इति भावः। **तृतीयेति**। तृतीयत्वं लक्षणाहेतावन्वेति। **लोकप्रसिद्धीति**। लक्ष्यार्थेन विनाकृतः शक्यार्थो यस्य तादृशे पदे यल्लक्ष्यार्थबोधकप्रयोगबाहुल्यं सा रूढिः। यथा देशमात्रे प्रयुक्तस्य कलिंगपदस्य तद्वासिषु। गवादिपदस्य तु व्यक्तिं विना न क्वापि प्रयोग इति भावः। **जात्याऽऽक्षेपादिति**। आक्षेपोऽत्रानुमानम्। व्यक्तिं विना इत्यनेन व्याप्तिर्दर्शिता। अनुमानसहकृतपदेनैव व्यक्तिबोधः। पदजन्यपदार्थोपस्थितिहेतुहेतुमद्भावे

प्रभाः–**अन्त्य इति**। साहित्यादिसंबन्धेन गोयुक्तलक्षणे गवामप्यानयनान्वयादुपादानसत्त्वेऽपि गौणीत्वं नेत्यर्थः। न च सादृश्यसंबन्धेनैव गोसदृशत्वेन वाहीकलक्षणायां सादृश्यप्रतियोगितया गोरप्युपादानमस्तीति शङ्क्यम्। एवमपि वाहीकपदार्थेनान्वयाभावेन निरुक्तोपादानत्वविरहात्। अत एव 'कुन्तायुधानानय' 'कुन्तान्भोजय' इत्यादौ नोपादानत्वमिति बोध्यम्। **स्वत इति**। इतरविशेषणत्वं विनेत्यर्थः। **असंभवदिति**। असंभवत्तात्पर्यविषयप्रवेशान्वया इत्यर्थः। अन्यथा पुरुषमात्रोपलक्षणत्वे तु लक्षणत्वमेवेति ज्ञेयम्। अत्र च प्रयोजनं कुन्तबाहुल्यप्रतीतिः। कुन्तगततैक्ष्ण्यस्य वा पुरुषेषु प्रतीतिः। 'श्वेतो धावति' इति निरूढोपादानलक्षणा ज्ञेया। इयमेव विशेष्यवाचकसमानाधिकरणपुरुषादिपदयोगे सारोपा। तदनुपादाने तु साध्यवसानेति द्रष्टव्यम्। लक्षणलक्षणा तु सारोपा साध्यवसाना च 'आयुर्घृतम्' इत्याद्युदाहरणेषु वक्ष्यते। **आक्षेपादेवेति**। आक्षेपश्च शक्यसंबन्धेनोपस्थितिर्लक्षणात्मिकैव विवक्षिता। 'स्वसिद्धये पराक्षेपः' इतिवत्। ननु प्रयोजनाभावेऽपि रूढिः कुतो नेत्याशङ्क्याह–**जातीति**। औदासीन्येन परित्यागेन। गवादिपदानामुत्सर्गतो व्यक्तिसाहित्येनैव जातिबोधकत्वेन तत्र लोकप्रसिद्धेरनपेक्षणात्। कादाचित्कबोध एव

राक्षिप्यते यथा क्रियतामित्यत्र कर्ता कुर्वित्यत्र कर्म। 'प्रविश' 'पिण्डी' मित्यादौ 'गृहं' 'भक्षये'त्यादि च।

'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते। श्रुतार्थापत्ते-र्थापत्तेर्वा तस्य विषयत्वात्।

'गङ्गायां घोष' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति

KRIYATĀM; the object in KURU; or the *words* GṚHAM and BHAKṢAYA in PRAVIŚA and PINḌĪM respectively.

In "PĪNO DEVADATTO DIVĀ NA BHUṀKTE" (The robust Devadatta does not eat during day-time), it is not by Indication that (the idea of) eating in the night is conveyed; for, (according to some), it forms the province of ŚRUTĀRTHĀPATTI, or, (according to others), of ARTHĀPATTI.

In the instance GAṀGĀYĀM GHOṢAH the word GAṀGĀ surrenders its own sense, for (giving) plausibility to TAṬA (the bank) being the

---

प्रदीपः-अपरे तु-"पीनो देवदत्तो दिवा न भुङ्क्ते इति वाक्यमभोजी पीन इतिवत्पीनत्वान्वयप्रयोजकस्य भोजित्व-स्याप्रतीत्या योग्यतामलभमानमन्वयं न बोधयति। तेन तत्सिद्धये रात्रिभोजनं लक्ष्यते। तथा च दिवा न भुङ्क्त इति। मुख्यमर्थमादायैव तल्लक्षणेत्युपादानलक्षणेयम्" इत्याहुः। तदप्यसम्यक्। शब्दाध्याहारनये श्रुतार्थापत्तेः, अर्थाध्या-हारनयेऽर्थापत्तेरेव रात्रिभोजनप्रत्ययेन लक्षणानङ्गीकारात्। लक्षणलक्षणा तु 'गङ्गायां घोषः' इत्यादौ। अत्र तटा-

---

उद्योतः-वृत्त्येत्यस्य गौरवेणाप्रवेश इति भावः।प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिरपि प्रकृतितात्पर्य-विषयान्वितत्वविषयेति न विभक्त्यर्थान्वयानुपपत्तिरिति भावः। एवं चान्यलभ्यत्वादपि न लक्षणेति बोध्यम्। वस्तुतो लक्षणायामपि नोपादानत्वं जातेरनुबंधनाद्यन्वयाभावेन विशेष्यान्वयिना तथान-न्वयादिति तत्त्वम्। **यथेति**। कृतिः साश्रया गुणत्वात्, सविषया कृतित्वादित्यनुमानेन तयोर्लाभ इति भावः। अत्र भट्टमते कथं व्यक्तिप्रतीतिरिति वदता स्वमते व्यंजनया सा इति सूचितम्। **योग्यतामिति**। अन्वयप्रयोजकरूपवत्त्वं योग्यतेति भावः। **श्रुतार्थापत्तेरिति**। श्रुतं शब्दः तत्क-ल्पकार्थापत्तेरित्यर्थः। श्रुतशब्दादन्वयबोधानुपपत्तौ शब्दकल्पनं श्रुतार्थापत्तिः। **अर्थापत्तेरिति**। प्रत्यक्षादिना प्रमितस्य दिवा अभोजिसंबंधिपीनत्वस्य तद्विनाऽनुपपत्तेरिति भावः। **घोषादिकरण-त्वसिद्धये इति**। तदन्वयसिद्धये इत्यर्थः। **स्वार्थम्**। स्वशक्यं प्रवाहरूपम्। **अर्पयंति**। अन्वय-

---

प्रभाः-हि रूढिवशेन लाक्षणिक उच्यते। यथा त्वगादिपदैरिन्द्रियादिबोध इति भावः। **आक्षेपादिति**। अर्थापत्तेरनु-मानाद्वेत्यर्थः। एवं चाक्षेपसहकृताद्गोपदाद्गोत्वविशिष्टबोधः। नियतोपस्थितेराक्षेपलभ्यतया वृत्त्यभावेऽपि क्षतिविरहात्। न चाप्रकृत्यर्थतया प्रत्ययार्थान्वयानुपपत्तिः। प्रकृतितात्पर्यविषय एव तदङ्गीकारात्। यत्र तु नाविनाभावस्तत्रोप-स्थित्यर्थं लक्षणाङ्गीकार इत्याशयः। अत एव प्रकाशकृद्वक्ष्यति 'अविनाभावे चाक्षेपेणैव सिद्धेः' इति। अविनाभावेनाक्षेपे दृष्टान्तमाह—**यथेति**। 'प्रविश पिण्डीम्' इति शब्दाध्याहारस्य विषय इति वैषम्यान्नोपन्यस्तम्। प्रकाशे त्वाक्षेप-सामान्यमात्रेणोक्तमिति ज्ञेयम्। **तत्सिद्धय इति**। अन्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानायेत्यर्थः। **शब्देति**। भट्टादिमत इत्यर्थः। श्रुतार्थापत्तिः श्रुतार्थकल्पनम्। तच्च न शब्दाध्याहारं विनेति तत्सिद्धिः। अर्थमात्राध्याहार इति गुरुनये त्वर्थकल्पनमात्रमित्यर्थः। न च देवदत्तादिपदस्यैव रात्रिभोजनविशिष्टस्वार्थे लक्षणास्तु, न तु शब्दकल्पनेति वाच्यम्। नियमतो मुख्यार्थबाधे प्रतिसंधानाद्यभावेऽपि द्वारमित्यादौ शब्दाध्याहारस्यार्थाध्याहारस्य च क्लृप्तत्वेन वार-

इत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा । उपचारेणामिश्रितत्वात्। अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम् । तटादीनां गङ्गादिशब्दैः प्रति-

site for the GHOṢA (hamlet). Therefore, in instances like this, Indication is based on a distinctive characteristic (LAKṢAṆA). In both these varieties we have Indication Pure, (which comes to be so called) on account of its being unmixed with the figurative way of expression based on resemblance.

In the case of these two varieties (viz. UPĀDĀNA & LAKṢAṆA LAKṢAṆĀ), there is no aloofness in the nature of dissimilarity between the sense Indicated and the sense Indicative (i. e, Primary). For, when the TĪRA etc. are conveyed by means of words like GAṀGĀ, the apprehension of the Purpose sought to be conveyed, follows only on the apprehension of the identity of the TĪRA with the GAṀGĀ. If we were to apprehend

प्रदीपः–देर्घोषाधिकरणत्वसिद्धये गङ्गादिशब्दाः स्वार्थमर्पयन्ति । स्वार्थं परित्यज्य तत्रैव वर्तन्ते। उभयरूपा चेयमुदाहृता शुद्धा न तु गौणी । उपचारमिश्रा हि गौणीत्युच्यते । उपचारश्च सादृश्यसंबन्धेन प्रवृत्तिः । सादृश्यातिशयमहिम्ना भिन्नयोर्भेदप्रतीतिस्थिगनं वा । न चोक्तयोस्तत्संभवः ।

केचित्पुनराचक्षते--" उपचारामिश्रत्वं न शुद्धाया मिश्रातो भेदकम्, किं तु तटस्थत्वम् । तच्च लक्षकस्य मुख्यार्थस्य लक्ष्यस्य च भेदप्रतीतिः । तथा हि 'गौर्वाहीकः' 'गौरयम्' इत्यादौ भेदेऽपि शक्यलक्ष्ययोरभेदः प्रतीयते, न तु 'गङ्गायां घोषः' इत्यादौ । तत्र भेदमात्रप्रतीतेः " इति ।

अन्ये तु--' गङ्गायां घोषः ' ' यष्टीः प्रवेशय ' इत्यनयोरेव परस्परभेदहेतुस्तटस्थत्वम् । गङ्गायामित्यत्र तत्सत्त्वात् । यष्टीरित्यत्र तदभावात् " इति मन्यन्ते । तदुभयमप्यसत् । अस्ति हि गङ्गादिपदैस्तीरादिप्रतिपादने गङ्गादिनिष्ठपावनत्वादिरूपप्रतिपिपादयिषितप्रयोजनप्रत्ययः । तत्र गङ्गात्वादिप्रतीतिरेव बीजम्, न तु तीरत्वादिप्रतीतिरेव । 'तीरे घोषः' इत्यत्रापि तत्प्रतीतिप्रसङ्गात् । अथ गङ्गाशब्देन तटप्रतिपादने गङ्गासंबन्धस्तत्र प्रतीयते । तदेव च

उद्योतः–बोधनांगमुपस्थापयंति । **तत्रैव वर्तते** । तद्विषयमेव बोधं जनयंतीत्यर्थः । शुद्धैवेति व्याचष्टे– **उभयेति** । गौणीभेदः साध्यः । उपचारामिश्रत्वं हेतुः । **न चोक्तयोरिति** । शक्याभेदप्रतीतावपि भेदस्थगनं नास्तीति भावः । **शुद्धायाः** । उक्तद्विविधायाः । **मिश्रातः** । गौणीतः । **भेदप्रतीतिरिति** । भेदमात्रप्रतीतिरित्यर्थः । **अभेदः प्रतीयत इति** । फलतयेति शेषः । **एवं हि गंगातटे इति** । गंगादिपदजन्यतटत्वादिविशिष्टशाब्दबोधत्वमेव तन्नियामकमस्तु किमभेदप्रत्ययेन । त्वामस्मि वच्मि, कमलानि कमलानि, उपकृतं बहु नाम, साहेन्तीत्यादौ वाच्यार्थाभेदप्रत्ययस्य प्रकृताननुगुणत्वाच्चेति नव्याः । **गंगादिशब्दैः** । गंगादिबोधकशब्दैः । **तत्त्वेति** । गंगात्वेत्यर्थः । गंगाऽभेदेति यावत् । **न च व्यंजने इति** । बाधितार्थबोधकतयैव तस्या धर्मिग्राहकमानसिद्धत्वादिति भावः । येषां तु

प्रभाः–यितुमशक्यत्वादिति संक्षेपः । शुद्धैवेति व्याचष्टे--**उभयरूपा चेति** । ननु 'कुन्ताः प्रविशन्ति' इत्यादौ सादृश्यसंबन्धेन कुन्तधरोपस्थित्या कुन्तधरान्वयबुद्धिसंभवात्तत्र गौणीत्वं स्यादत आह--**सादृश्यातिशयेति** । एवं च यत्र साधारणगुणप्रकारिकोपस्थितिस्तत्रैव भेदप्रतीतिस्थगनाद्गौणत्वम्, नान्यत्रेति नोक्तदोष इति भावः । अनयोरिति दोषः । लक्षणायाः शक्यसंबन्धात्मकत्वादिति भावः । तदेवेत्यस्य विधेयबीजविशेषणत्वान्न लिङ्गानुपपत्तिः । **एवं हीति** ।

पादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः । गंगासंबन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ।

(17)

सारोपा.

(सूत्र १४) सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा ।

(by Indication) merely the connexion with the GAṀGĀ, where would be the difference between (GAṀGĀYĀM GHOṢAH, based on) Indication and GAṀGĀTAṬE GHOṢAH wherein the words are used in their primary significance ?

The second variety is called Indication by Superimposition wherein the Object Superimposed and the Object Superimposed upon are mentioned.

प्रदीपः–तद्बीजमिति चेत्, न। एवं हि 'गङ्गातटे घोषः' इति मुख्यशब्दप्रयोगेऽपि तत्प्रतीतिः स्यात् । तत्संबन्धप्रतीतौ विशेषाभावात् । अथ बाधे जागरूके कथं गङ्गाशब्दादिभिर्गङ्गात्वादिकं तीरे बोध्यत इति चेत्, उच्यते । शब्देन लक्ष्येऽर्थे प्रतिपादिते तत्र मुख्याभेदो व्यञ्जनया प्रतिपाद्यते । तदेतदुक्तम्--तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः ' इति अत्र प्रतिपादने इति सतिसप्तम्या प्रत्ययस्यानन्तर्यं बोध्यते । न च व्यञ्जने बोधः प्रतिबन्धक इति काव्यविदां पन्थाः । वक्ष्यति हि-' सारोपसाध्यवसानयोर्गौणभेदयोर्भेदेऽप्यभेदावगमः सर्वथैवाभेदप्रतीतिश्च फलम् ' इति । किं बहुना । बाधित एव पावनत्वादिविशेषस्तटादौ प्रतीयते । यत्सूत्रयिष्यति– ' योगः फलेन नो ' इति । नन्वेवं कथं गौण्यामेवाभेदप्रत्ययं प्रयोजनं वक्ष्यति, शुद्धभेदयोस्तु प्रयोजनान्तरमिति चेत्, न । गौण्यां तन्मात्रस्य प्रयोजनत्वात् । शुद्धभेदयोस्तु मुख्यस्य प्रयोजनान्तरस्यापि भावात्, न तु शुद्धायामभेदप्रत्ययस्याभावादिति संक्षेपः । गौणीभेदौ लक्षयन्नेव विभजते-**सारोपेति** ।

उद्योतः–बाधज्ञानं न बोधे प्रतिबंधकं तन्मते व्यंजने इत्यस्य तज्जन्यबोधे प्रामाण्यग्रहे इत्यर्थः । व्यंजनायां बाधस्याप्रतिबंधकत्वे संमतिमाह—**वक्ष्यति हीति** । द्वितीयमपि न युक्तम् । यष्टीरित्यस्य गंगायामित्यतो विशेषाभावादिति दिक् । **संक्षेप इति** । नव्यास्तु शक्यतावच्छेदकप्रकारकलक्ष्यबोध एव लक्षणाज्ञानस्य कार्यम् । एवं च गंगात्वादिनैव तीरस्य बोध इति । शैत्यपावनत्वादिप्रतीतये मध्ये शक्याभेदविषयकं ज्ञानांतरं नांऽगीकार्यम् । न चैवं प्रवाहत्वविशिष्टे घोषाभावज्ञानेन तीरादौ प्रवाहत्वाभावज्ञानेन च प्रतिबंधात्कथं लक्ष्यार्थबोध इति वाच्यम् । बाधबुद्धेः शाब्दबोधाप्रतिबंधकत्वात् । न चैवमपि जायमानबोधे अप्रामाण्यशंकाजनने ततश्चमत्कारानापत्तिरिति वाच्यम् । विषयतासंबंधेन शक्यतावच्छेदकतत्समानाधिकरणधर्मे तदन्यतरविषयकबाधग्रहजन्याप्रामाण्यज्ञानं प्रति जनकतारू-

---

प्रभाः–मुख्यशब्दप्रयोगाद्यन्न प्रतीयते तदनन्यलभ्यत्वाल्लक्षणाप्रयोजनम्, नान्यदिति भावः । वैयञ्जनिकबोधे न बाधो विरोधीत्यत्र संमतिमाह—**वक्ष्यति हीति** । प्रकाशकृदिति शेषः । सूत्रसंमतिमपि दर्शयितुमाह--**किं बहुनेति** । पावनत्वादिविशेषो गङ्गागतपावनत्वादिरूपः । **मुख्यस्येति** । उद्देश्यतया चमत्कारितया च प्रधानस्येत्यर्थः ॥ **अर्थादिति** । पूर्वं शुद्धाभिधानसामर्थ्यादित्यर्थः । यत्र यादृशलक्षणास्थले । अतीतत्वाविवक्षां दर्शयति--**शब्द-प्रतिपाद्याविति** । ननु सारोपेत्यस्यारोपयुक्तेत्यर्थः । न च स्वमते वाहीके गोरारोपो लक्षणाविषयः । बाधात् । अन्यथा लक्षणाया एवासंभवात् । नापि लक्षणाफलीभूतारोपसाहित्यमर्थः । 'आयुर्घृतम्' इत्यादिशुद्धसारोपायां तदसंभवादित्याशङ्क्याह--**विषयेति** । तथा चारोपपदार्थस्य मुख्यस्याभावेऽपि न क्षतिरिति भावः । विषयिवाचक-

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।

(18)

साध्यवसाना.

(सूत्र १९) विषय्यन्तःकृतेऽन्यस्मिन्सा स्यात्साध्यवसानिका ॥ ६ ॥

विषयिणाऽऽरोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति सा साध्यवसाना स्यात् ।

(19)

(सूत्र १६) भेदाविमौ च सादृश्यात्संबन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ,

That variety of Indication is called Indication by Superimposition (SĀROPĀ) wherein the object superimposed and the object superimposed upon are stated in grammatical coordination, their distinctness remaining not-veiled.

When by the object superimposed the other (i. e. the object superimposed upon) is *taken in* the Indication is called Indication by Supersession (SĀDHYAVASĀNIKĀ).

The Indication will be Indication by Supersession in case the object superimposed takes in i. e. swallows up the other i. e. the object superimposed upon.

These two varieties (i. o. SĀROPĀ & SĀDHYAVASĀNĀ) should be supposed as belonging respectively to the class of Figurative (GAUṆĪ) or Pure (ŚUDDHĀ) Indication, according as they are due to resemblance or some other relation.

प्रदीपः–अन्या अर्थाद्गौणी आरोपाध्यवसानाभ्यां भिद्यते, न तूपादानलक्षणाभ्यामिति तुशब्दार्थः । विषयी आरोप्यमाणो गवादिः, विषय आरोपस्य वाहीकादिश्च यत्र तथा अनपह्नुतभेदौ सामानाधिकरण्येनोक्तौ शब्दप्रतिपाद्यौ सा लक्षणा सारोपा । विषयविषयिणोर्भेदेनोपन्यासस्यात्रारोपपदार्थत्वात् । **विषयीति ।**

विषयिणा आरोप्यमाणेनान्यस्मिन्नारोपविषयेऽन्तःकृते निगीर्णे । भेदेनानुपस्थित इति यावत् । विषयिमात्रं यत्र निर्दिश्यते, न तु विषयोऽपि सा साध्यवसाना । विषयिणा विषयतिरोभावस्यात्राध्यवसानपदार्थत्वात् ।

एतौ भेदौ शुद्धाभेदेऽपि भवत इति प्रतिपादयन्नेव शुद्धाया गौण्याश्च लक्षणमाह--**भेदाविति ।**

उद्योतः–पविषयनिष्ठप्रत्यासत्त्या लक्षणाज्ञानस्य प्रतिबंधकत्वान्न दोष इत्याहुः । **सामानाधिकरण्येनोक्ताविति ।** समानविभक्तिकपदोपस्थाप्यत्वादभेदसंसर्गकान्वययोग्यावुक्तावित्यर्थः । अतीतत्वमविवक्षितम् । तदाह—**शब्दप्रतिपाद्याविति । एवं च तदन्वये** बाधाल्लक्षणाप्रसर इति भावः । विषयतावच्छेदकरूपेण शब्दजन्यविषयप्रतिपत्तिकालिकी विषयिणोऽसाधारणधर्मादिप्रकारिकोपस्थितिः

प्रभाः–पदेनैव विषयप्रतिपादनं विषयिकृतस्तिरस्कारोऽध्यवसानमिति निष्कृष्याह--**विषयिणेत्यादिना ।** अत्र गौणसारोपोदाहरणे । मुख्यतः शक्त्या तथा प्रवृत्तिनिमित्तम् । न च तस्य वाहीकावृत्तित्वात्कथं तद्विशिष्टतया वाहीकबोध इति

इमावारोपाध्यवसानरूपौ साहश्यहेतू भेदौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च ।

(१) अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति इति केचित् ।

These two i. e. those in the nature of Superimposition and Supersession, caused by resemblance, are illustrated in GAUR VĀHĪKAH (Vāhīka is an ox i. e. stupid) and GAUR AYAM (Here is an ox).

For, some hold that, in these instances, qualities like dullness, laziness etc. associated with the Primary (lit. own) sense (of the word गो), though indicated, are responsible for the word गो being used to *express* the other sense (viz. that of VĀHĪKA).

प्रदीपः–इमावारोपाध्यवसानरूपौ भेदौ । तौ यदि साहश्यसंवन्धात्तदा गौणौ । अथ संबन्धान्तरात्तदा शुद्धौ । तत्र साहश्याद्यथा––' गौर्वाहीकः ' इति सारोपः । ' गौरयम् ' इति साध्यवसानः । यद्यपि वाहीकस्य वाहीकत्वेन इदंतया वोपस्थितौ सारोपत्वमेवोचितम्, तथापीदंत्वस्यारोप्यविशेषणतया तदुदाहरणं द्रष्टव्यम् । अत एव वक्ष्यते अनिश्चय-रूपसंकरावसरे—" नयनानन्ददायीन्दोर्विम्वमेतत्प्रसीदति ' इत्यत्रैतदिति विम्वविशेषणतया किमियमतिशयोक्तिः किं वैतदिति वक्रं निर्दिश्य विम्वमित्यारोपाद्रूपकम् " इति ।

अत्र केचित्––' गोशव्दस्य मुख्यतो गोत्वं प्रवृत्तिनिमित्तम्, लक्षणया तु गोशब्दार्थगतं जाड्यमान्द्यादि तथा भवतीति गोशब्देन जडत्वेन रूपेण वाहीक उच्यते ' तद्युक्तम् । अशक्यस्याशक्यवृत्तेश्च धर्मस्याप्रवृत्तिनिमित्तत्वात् । शक्यत्वे शक्यवृत्तित्वे स्वभिन्नशक्यानधिकरणत्वस्य तत्त्वात् ।

उद्योतः–सारोपेत्यर्थः । एवं साध्यवसाना तथाविषयप्रतिपत्त्यकालिकी सेति बोध्यम् । **मुख्यत इति** । शक्त्या गोत्ववदर्थप्रतिपादकत्वे इत्यर्थः । लक्षणया वाहीकरूपार्थप्रतिपादने तु लक्षणयोपस्थितं गोवृत्तिजाड्यादि तथा प्रवृत्तिनिमित्तम् । **उच्यत इति** । शक्त्या बोध्यत इत्यर्थः । **अशक्यस्येति** । गोवृत्तिजाड्यस्य तदवृत्तित्वा-जाड्यस्य लक्ष्यत्वात् वाहीके संकेतविरहेण तस्य गोपदाशक्यत्वाच्च गोवृत्तिजाड्यस्य तदवृत्तित्वा-च्चेति भावः । शक्यवृत्तिद्रव्यत्वादावतिप्रसंगवारणाय **शक्यत्वे इति** । व्यक्तिमात्रबोधकाकाशादि-पदबोध्याकाशादिव्यक्तावतिप्रसंगवारणाय शक्यवृत्तित्वे इति । न च तत्र स्वभिन्नशक्याप्रसिद्ध्या क्वचित्पुत्रादावाकाशादि-तृतीयदलाभावः । स्वभिन्नशक्याधिकरणं यद्यत् तद्भेदस्यैव विवक्षणात् ।

प्रभाः–वाच्यम् । आरोपेण प्रवृत्तिनिमित्तत्वाङ्गीकारात् । अतएव सारोपत्वमप्युपपन्नमिति भावः । तथा च जाड्यवदभिन्नो वाहीक इति शक्तिलक्षणाभ्यां बोध इति । अशक्यवृत्तेर्गोपदशक्यत्वाभिमतवाहीकवृत्तिभिन्नस्य । एतदेव प्रवृत्तिनिमित्त-लक्षणासंभवेनोपपादयितुं तल्लक्षणमाह—**शक्यत्व इत्यादि** । द्वे अपि सतिसप्तम्यौ । भवति हि गोत्वं गोपद-शक्यम् । गोपदशक्यगोवृत्तिस्वभिन्नगोपदशक्यानधिकरणं चेति लक्षणसमन्वयः । स्वपदं प्रवृत्तिनिमित्तत्वाभिमतपरम् । गगनघटादिपदेषु शब्दाश्रयत्वद्रव्यत्वादिवारणायाद्यम् । गवादिपदेष्ववयवसंयोगविशेषवृत्तित्वं रूपाकृतेः, पश्वादिपदेषु लोमत्वादेश्च वारणाय द्वितीयम् । तदर्थश्च शक्यतावच्छेदकतानियामकसाक्षात्संबन्धेन शक्तिमुख्यविशेष्यवृत्तित्वम् । तेनाकृतिनिष्ठजातिविशेषस्य लोमत्वादेश्च निरासः । आकृतेर्लोमादेश्च मुख्यविशेष्यत्वाभावात् । आकृतेरपि स्वसमवायि-समवेतत्वसंवन्धेन गवादिवृत्तित्वात्तद्वारणाय साक्षादिति । कालिकादिना तद्वृत्तित्वाच्छक्यतावच्छेदकता नियामिकेति । ज्ञानविषयवाचिवस्तुपदशक्य-दध्यादिपदे दधिवारणाय तृतीयाम् । दध्नः स्वभिन्नदधिपदशक्यदाधित्वाधिकरणत्वात् । न चैवमपि स्वभिन्नवाच्यत्वाद्यधिकरणत्वादव्याप्तिरिति तावच्छेदकज्ञानविषयत्वस्य स्वात्मकशक्याधिकरणत्वात्स्वभिन्नेति । न चैवमपि स्वभिन्नवाच्यत्वाद्यधिकरणत्वादव्याप्तिरिति वाच्यम् । शक्यपदेन शक्तिजन्यबोधप्रकारविवक्षणात् । वाच्यत्वादेर्वस्तुपदशक्तिजन्यबोधप्रकारत्वाभावात् । अधि-

(२) स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभिधीयते इत्यन्ये।
(३) साधारणगुणाश्रयणेन परार्थ एव लक्ष्यते इत्यपरे ।

Others hold that it is the qualities belonging to the other object that are *indicated* owing to their being similar to the qualities associated with primary sense; the other object (viz. VĀHĪKA) however is not expressed (by the word गो).

Yet some others hold that it is the other object that is *indicated* as being the abode of identical qualities.

प्रदीपः–अपरे तु–'न गवादिशब्देन वाहीकादिः प्रतिपाद्यते । किं तु गवादिगतस्य जाड्यादिगुणस्याभिन्नतया वाहीकादिगता जाड्यादयो गुणा एव लक्ष्यन्ते ' इत्याहुः । तदप्यसम्यक् ' ' गौर्वाहीक ' इत्यादिसामानाधिकरण्यानुपपत्तेः ।

इदं पुनरत्र तत्त्वम्––साधारणं जाड्यमान्द्यादि लक्ष्यतावच्छेदकमाश्रित्य वाहीकादिर्लक्ष्यत इति । तेन ' जडो वाहीकः ' इत्यादि वाक्यार्थो भवति ।

तदुक्तमन्यत्र––

' मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे ।

उद्योतः–पदसंकेते तत्प्रसिद्धेश्च। अवयवसंयोगरूपाकृतेरपि शक्यत्ववादिनां मते तत्रातिव्याप्तिवारणाय वा तत् । अवयवभूतदध्न्यतिप्रसंगवारणाय शक्यानधिकरणत्वे इति । तस्य शक्यत्वे स्वावयवरूपशक्यवृत्तित्वे सत्यप्यवयविरूपशक्याधिकरणत्वात् । प्रमेयपदप्रवृत्तिनिमित्ते प्रमेयत्वेऽव्याप्तिवारणाय स्वभिन्नेति । प्रमेयत्वस्यापि प्रमाविषयत्वात् । येन संबंधेन शक्यवृत्तिता तेन संबंधेन स्वभिन्नशक्यानधिकरणत्वस्य विवक्षणादेकार्थसमवायेन सत्पदशक्यैकत्वस्य सत्पदप्रवृत्तिनिमित्तसत्तायां सत्त्वेऽपि तत्र नाव्याप्तिः । स्वभिन्नपदेन च प्रवृत्तिनिमित्तं तत्समनियतधर्मभिन्नत्वं विवक्षणीयम् । तेन प्रमेयत्वे स्वभिन्नवाच्यत्वसत्त्वेऽपि न क्षतिरित्यन्यत्र विस्तरः । **अभिन्नतयेति** । साजात्येन वेत्यपि बोध्यम् । **गुणा एवेति** । न गुणिन इत्यर्थः । तेषां वाहीकशब्दादेव लाभादिति भावः । **अनुपपत्तेरिति** । न च जातिशक्ताविव अनुमानसहकृतपदेन व्यक्तिबोधान्नानुपपत्तिरिति वाच्यम् । अन्वयानुपपत्त्या

प्रभाः–करणत्वं च शक्यवृत्तिताघटकपूर्वोक्तसंबन्धेनेति न पशुपदप्रवृत्तिनिमित्तलाङ्गूलस्य तादृशलोमाद्यधिकरणत्वेऽपि क्षतिः । शक्यतावच्छेदकतानियामकसमवेतत्वसंबन्धेन लाङ्गूलस्य लोमानाधिकरणत्वात् । संयोगस्य चातथात्वात् । न चैवमपि सदादिपदे स्वातिरिक्तशक्योपस्थितिप्रकाराप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धिः । स्वत्वस्य प्रतियोगिकोटिनिवेशेन स्वभिन्नशक्योपस्थितिप्रकारीभूताधिकरणं यद्यत्तत्तद्भेदकूटनिवेशेनाप्रसिद्धेरभावात् । एवं च शक्यत्वे सति शक्यतावच्छेदकताघटकसाक्षात्संबन्धेन शक्तिमुख्यविशेष्यवृत्तित्वे च सति स्वभिन्नशक्योपस्थितिप्रकारीभूताधिकरणं यद्यत्तत्तद्भेदकूटवत्त्वमिति लक्षणं पर्यवसन्नमित्यलमतिविस्तरेण । अत्र च वाहीके गोपदशक्तौ संकेताद्यभावान्न किंचित्प्रमाणमिति दूषणं स्फुटत्वान्नोक्तमिति ज्ञेयम् । **अभिन्नतयेति** । सजातीयतयेत्यर्थः । बाधितार्थस्य लक्ष्यत्वायोगात् । तथा च गोजाड्यसजातीयजाड्यवान्वाहीक इति बोध इति भावः । **सामानाधिकरण्येति** । एकधर्मिबोधकत्वाभावादिति भावः । एवं नामार्थयोर्भेदेनान्वयानुपपत्तिरप्यूह्या । तृतीयमतस्य सिद्धान्तत्वबोधनायाह––**तत्त्वमिति** । साधारणं जाड्यमान्द्यत्वाद्यवच्छिन्नम् । अत्र संमतिमाह––**तदुक्तमिति** । अन्यत्र भट्टवार्तिके । गुणैर्योगात्संबन्धाद्या वृत्तिर्गोशब्दस्य वाहीकार्थोपस्थापकता तस्या गौणतेष्टेत्यर्थः । प्रथममते गुणयोगाभावः मध्यमे गुण एव वृत्तिः, न तु तद्योगाद्वाहीक इति तयोर्नाभिमतत्वम् । लक्ष्यतावच्छेदकीभूतगुणरूपसंबन्धाद्वृत्तिर्गौणीति व्याचष्टे—**लक्ष्यमाणा ये इति** । अत्र वदन्ति––'गौर्वाहीकः' 'मुखं चन्द्रः' इत्यादिषु क्लृप्ताकाङ्क्षावशादभेदान्वयेनोपपत्तौ न

उक्तं चान्यत्र—"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता" इति । (तंत्रवार्तिक १।४।२२) अविनाभावोऽत्र संबन्धमात्रं, न तु नान्तरी-

So is it said elsewhere: "Indication is said to be the apprehension of a thing connected with the primary sense. The process is said to be Figurative (GAUṆA) if based on the connexion (of the Primary sense) with the qualities of the object indicated." The word AVINĀBHĀVA, in the present quotation (ATRA), is used to denote mere connexion, but not invariable association (NĀNTARĪYAKATVA). Were it that (i. e. invariable assoc-

प्रदीपः– | अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥'

लक्ष्यमाणगुणैरिति लक्ष्यमाणा ये गुणा जाड्यादयस्तैरेव यदि योगः शक्यसंबन्धस्तदा गौणी वृत्तिरिति ।

उद्योतः–प्रसरंत्या लक्षणायाः साक्षादन्वययोग्यार्थबोधकतैवोचितेत्यभिप्रायात् । **अभिधेयाविनाभूतेति** । अविनाभावः संबंधः । तद्ग्रहश्च लोके धर्मिण्येवेति तदाशयः । एतेन गौणी अतिरिक्ता वृत्तिरित्यपास्तम् । **लक्ष्यमाणगुणैरिति** । लक्ष्यतावच्छेदकैरित्यर्थः । गुणलक्ष्यतावच्छेदकिका लक्षणा गौणीति भावः । अनेन लक्ष्यतावच्छेदकेऽपि लक्षणां सूचयति । प्रतीतिरिति उपस्थितेर्लक्षणात्वे भावे क्तिन् । पक्षांतरे तु करणे इति बोध्यम् । **तैरेव यदि योग इति** । तद्द्वारको यदि योग इत्यर्थः । आह्लादयति मुखेंदुरित्यादौ धर्मत्वेनेंद्वादिवृत्तिधर्मस्य लक्षणान्न पौनरुक्त्यम् । धर्मत्वेन च प्रत्त्यासत्त्योपात्तधर्मस्यैव भानमित्याहुः । केचित्तु सदृशत्वेनैव सदृशो लक्ष्यते । शक्यसंबंधोऽप्येत-

प्रभाः–लक्षणा युक्ता । बाधनिश्चयस्याहार्यज्ञान इव शाब्देप्यविरोधात् । अत एव 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः
करोति हि' इति प्राचां प्रवादः । न चैवं 'वह्निना सिञ्चेत्' इत्यतोऽपि बोधापत्तिरिति वाच्यम् ।
योग्यताज्ञानाभावात् । 'मुखं चन्द्रः' इत्यादौ त्विष्टचमत्कृतिप्रयोजकताज्ञानादिच्छेत्याहार्ययोग्यताज्ञानसंपत्तिः ।
अतएव शाब्दे योग्यताज्ञानस्य हेतुत्वमपि संगतम् । अस्तु वान्वयबोध एवाहार्यः । बाधप्रतिबध्यतावच्छेद-
ककोटौ शाब्दान्यत्वनिवेशे शाब्दे योग्यताज्ञानहेतुत्वकल्पने च गौरवप्रसङ्गस्यापरिहारात् । किंच लक्षणापक्षे
'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्' 'पादाम्बुजं भवतु वो विजयाय मञ्जु मञ्जीरशिञ्जित-
मनोहरमम्बिकायाः' इत्यादौ क्रमेणोपमारूपकयोरुपमितविशेषणसमासाधीनयोः स्वीकारे लक्ष्मीकर्तृकालिङ्गनमञ्जीर-
शिञ्जितयोरन्वयानुपपत्तिर्व्यवस्थापिका रूपकोपमयोः प्राचीनोक्ता न संगच्छते । आद्यपद्ये उपमायामिव रूपकेऽपि
सदृशलक्षणया नारायणसदृशप्रतीतौ लक्ष्मीकर्तृकालिङ्गनानुपपत्तिसाम्येन रूपकनिर्णायकत्वानुपपत्तेः । द्वितीयपद्येऽपि
रूपकेऽपि बाधकाभावेन तन्निवर्तकताया असंभवात् । अपि च लक्षणा किं समानधर्मत्वेन, आह्लादकत्वादिना
वाङ्गीक्रियते । आद्ये सादृश्यस्य शब्दोपात्तत्वादुपमानत्वापत्तिः । न हि सादृश्यस्य वाच्यतायामेवोपमा । 'कमल-
सुहृन्मुखम्' इत्यादावपि तस्याः सर्वसंमतत्वात् । अन्त्ये 'आह्लादयति मुखेन्दुः' इत्यादौ पौनरुक्त्यात्पत्तिः । न
चात्राह्लादकत्वातिरिक्तधर्म एव लक्ष्यतावच्छेदक इति वाच्यम् । तदस्फुरणेऽपि सहृदयानां चमत्कारोदयादनुभव-
विरोधाच्च । न चायमुपमितसमास एवेति वाच्यम् । सामान्यधर्माप्रयोग एव तदनुशासनात् । तस्मात् 'चन्द्राभिन्नं
मुखम्' इत्याद्याकारक एव तत्र बोध इति न लक्षणाप्रसङ्ग इति । अत्रेदमाकूतम्—अस्ति तावच्चमत्कारिसमानधर्मो-
पस्थितावेव रूपकप्रतीतिश्चमत्कारश्चेति सहृदयसाक्षिकम् । तत्र मुखचन्द्रादौ समानधर्मः प्रसिद्ध इति स एव लक्षणया
प्रतीयते, न पृथङ्नियमेन शब्देनोपादीयते । 'भारतं नाकमण्डलम्' इत्यादौ तु तदप्रसिद्धेः । 'सुपर्वालंकृतं
इत्यादिशब्दोपादानापेक्ष एव रूपकप्रत्यय इत्येतावान्विशेष इति चन्द्रसमानधर्मत्वेन सादृश्यविशिष्टे लक्षणैव । आहार्या-

प्रकत्वम् । तत्त्वे हि 'मञ्चाः क्रोशन्ती' त्यादौ लक्षणा न स्यात् । अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम् । 'आयुर्घृतम्' 'आयुरेवेदम्' इत्यादौ सादृश्यादन्यत् कार्यकारणभावादि संबन्धान्तरम् । एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने।

---

iation), there would be no Indication in sentences like MAÑCHĀH KROŚANTI (The sofas raise an uproar). It has been already stated that in the matter of invariable association, Indication is futile, since there a plausible sense is arrived at by mere inference. In instances like, ĀYUR GHṚTAM, (Clarified butter is life) or ĀYUR EVEDAM (Here is life indeed), there is present some relation like that of the Cause and Effect, a relation different from that of Resemblance. In instances like these, Superimposition and Supersession are due to relation sach as the Cause-Effect relation.

प्रदीपः-अविनाभावश्चात्र संबन्धमात्रमभिमतम् । न तु व्याप्तिः । 'मञ्चाः क्रोशन्ति' इत्यादावभावात् । दशाविशेषविशिष्टस्य तत्रापि सास्त्येवेति चेत्, तर्हि आक्षेपादेव व्यापकप्रतीतिरस्तु किं लक्षणयेत्युक्तं 'गौरनुबन्ध्यः' इत्यत्र। संबन्धान्तरात्सारोपो यथा-'आयुर्घृतम्' इति । साध्यवसानो यथाः-'आयुरेवेदम्' इति । एवमादौ सादृश्यादन्यो यः

उद्योतः-देव । न चैवं सादृश्यस्य शब्दोपात्तत्वे चंद्र इव मुखमित्यादाविवोपमैव स्यादिंदुर्मुखमित्यादौ। किं च वाहीकोऽयं न गोसदृशोऽपि तु गौरेवेत्यादौ सादृश्यव्यतिरेकमिश्रिते सादृश्यबुद्ध्ययोग इति वाच्यम् । भेदगर्भसादृश्यप्रतीतौ हि उपमा । तदेव च सदृशादिपदवाच्यम् । तदगर्भसादृश्यं च लक्ष्यतावच्छेदकम् । न गोसदृश इत्यादिना निषेधोऽपि भेदगर्भस्यैवेति न दोष इत्याहुः । **दशाविशेषेति** । क्रोशनविशेषेत्यर्थः । **आक्षेपादेव व्यापकप्रतीतिरिति** । आक्षेपोऽनुमानम् । तथा च शब्दसहकृतानुमानेनोपस्थिते तटादौ घोषाधिकरणत्वान्वयः । प्रत्ययानां प्रकृत्यर्थान्वयव्युत्पत्तिः प्रकृतिसहकृतानुमानोपस्थितार्थविषयाऽपीति बोध्यम् । व्यापकतारूपसंबंधस्य लक्षणाबीजत्वे मानाभावाच्च । व्यापकत्वाग्रहेऽपि लक्षणाप्रसरात् । **आयुर्घृतमिति** । आयुरत्र दीर्घकालजीवनम् । जनकत्वं संबंधः । स एव च लक्ष्यतावच्छेदकम् । **भेदेऽपि ताद्रूप्येति** । भिन्नधर्मप्रकारकोपस्थितावपि सादृश्यातिशयमहिम्ना ताद्रूप्यप्रत्यय इत्यर्थः । तत्र प्रथमतो जडगवोरेकशब्दबोध्यतयाऽभेदप्रतीतौ व्यंजनया गवाभिन्नजडाभेदस्य वाहीके प्रतीत्या तदुपपत्तिः । इयं चाहार्या । शब्दतो भेदस्याप्युप-

---

प्रभाः-भेदबोधस्तु समानधर्मास्फुरणेऽपि संभवतीति चमत्कारानुपपत्तिः। न च तस्यां बुद्धौ तज्जन्यचमत्कारे वा साधर्म्यज्ञानं हेतुरिति वाच्यम् । तेन विनापि तदुत्पत्तेर्व्यभिचारात् । साधर्म्यज्ञानादेव चमत्कारसंभवेनाभेदबोधस्याप्रयोजकत्वाच्च । अथ 'नायं सिंहसदृशः किं तु सिंहः' इत्यस्यानुपपत्तिरिति न सादृश्यबोधो रूपके इति चेत्, न । भेदघटितसादृश्यनिषेधेन ताद्रूप्यप्रतीत्यर्थं तदघटितसादृश्यलक्षणया तथा प्रयोगोपपत्तेः। अत एव रूपकस्योपमात्वापादनमपि प्रत्युक्तम्। उपमाया भेदघटितत्वात् । वक्ष्यति हि दशमे--'सादृश्यमुपमा भेदे' इति । तथा--'उपमैव तिरोभूतभेदा रूपकमिष्यते' इति चान्यैरुक्तम् । राजनारायणमित्युत्तरपदार्थप्रधानविशेषणसमासे राजाभिन्ननारायणसदृशस्यं लक्षणया व्यञ्जनया च नारायणत्वेन बोधाल्लक्ष्मीकर्तृकालिङ्गनोपपत्तिः उपमितसमासेन नारायणसदृशराजप्रतीतौ तु राजत्वेनावगतेन तदुपपत्तिरिति व्यवस्थासंगतिः । कथं तर्हि 'जडो वाहीकः' इत्याकारकबोधकथनमिति चेत्, पौनरुक्त्याप्रसङ्गेन विशेषरूपेण लक्षणया बाधकाभावादिति ज्ञेयम् । **दशेति** । क्रोशनकालीनस्य मञ्चादेरित्यर्थः । तत्रापि मञ्चाः क्रोशन्तीत्यादावपि । **व्यापकेति** । तादात्म्येन क्रोशनकालीनमञ्चानां व्यापका ये पुरुषास्तत्प्रतीतिरित्यर्थः । कारिकायामभिधेयमविनाभूतं यस्येति बहुव्रीहिर्बोध्यः । **सारोप इति** । लक्षणाभेद इति शेषः । आयुर्जीवनम् । तेन तज्जनकत्व-

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम् । शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि ।

In these instances of the two varieties of Indication Figurative, an apprehension of identity–though along with a consciousness of difference–(in the first), and an apprehension of absolute identity (in the second), form the Purpose. In the two varieties of Indication Pure, however, (the apprehension of) the capacity of the thing to produce the effect, in a manner distinct from others (in the first), and, (in the second), (the apprehension of) the capacity of the thing to produce the effect without fail and so on (form the purpose).

प्रदीपः-कार्यकारणभावादिः संवन्धस्तत्पूर्वके आरोपाध्यवसाने । अत्र गौणभेदे सारोपे भेदेऽपि ताद्रूप्यप्रतीतिः । साध्यवसाने सर्वथैवाभेदावगमः प्रयोजनम् । शुद्धभेदे तु सारोपे अन्यवैलक्ष्ण्येन कार्यकारित्वादेः, साध्यवसाने त्वव्यभिचारेण

उद्योतः–स्थितेः । वस्तुतो लक्षणया सादृश्यबोधे तन्महिम्ना गोत्ववाहीकत्वयोः सामानाधिकरण्यसंभावनया ज्ञातस्यापि भेदज्ञानस्य वाच्यबोधकालिकस्य तिरोधानादनाहार्यैव सा । तस्याः वैयंजनिकत्वेन तस्यां बाधबुद्धेरप्रतिबंधकत्वाच्च । **सर्वथैवेति** । वाच्यार्थबोधवेलायामपि शब्दजभेदकधर्मानुपस्थितेरिति भावः । एतेन मुख्यार्थबाधज्ञानविधया भेदस्योपस्थितिरस्त्येवेति परास्तम् । एवं च शुक्तौ रजतत्वारोपे शुक्तित्वेनेव वाहीकत्वेन तदनुपस्थितिरेवेति बोध्यम् । नव्यास्तु साध्यवसानास्थले गोत्वेनैव वाहीकस्य बोधः । शक्यतावच्छेदकातिरिक्तरूपेण शक्यबोधे लक्षणाया इव शक्यतावच्छेदकरूपेण शक्यान्यबोधेऽपि तत्प्रसरादित्याहुः । **अव्यभिचारेणेति** । कारणात्कार्यस्य भेदग्रहे सति व्यभिचारसंभावनासंभवेन सारोपायां नेदं प्रयोजनम् । साध्यवसानायां तु भेदतिरस्कारात् अभेदग्रहेण व्यभिचारशंकाया अपि अयोग इति भावः । लक्षकगतधर्मप्रतीतिरेव प्रयोजनमिति त्वश्रद्धेयम् । उपकृतमित्यादौ व्यभिचारात् इत्याहुः । परे तु शक्यतावच्छेदकारोपेण शक्यतावच्छेदकप्रकारक एव तीरादिबोधो लक्षणायामिति गौतमसूत्रे पुंयोगादिति सूत्रे महाभाष्ये च स्पष्टमिति निरूपितं मंजूषायाम् । एवं च गंगात्वादिनैव तीरबोधः । न चारोपितगंगात्वेन बोधेऽपि तस्य ज्ञानस्य भ्रमत्वात् शास्त्रज्ञानवतां सर्वथा तत्त्वेन ग्रहाच्च तदुत्तरं गंगागतशैत्यपावनत्वप्रतीतिरूपं प्रयोजनं न सिध्येत् । अत एव शुक्तिरजतज्ञाने भ्रमत्वग्रहे तत्र न प्रवर्तते इति वाच्यम् । मध्ये व्यंजनया मुख्यगंगापदार्थाभेदस्य प्रतीतेः । व्यंजनाजन्यज्ञाने च बाधज्ञानेन नाप्रामाण्यग्रह इति न दोषः । तदुक्तम्–तटादीनां गंगादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ प्रतिपिपादयिषितप्रयोजनसंप्रत्यय इति । तत्त्वेत्यस्य मुख्यगंगाऽभेदेत्यर्थः । न च लक्षणामूलतया गंगासंबंधप्रतीत्या तत्सिद्धिः । गंगातटे घोष इत्यतोऽपि तत्प्रतीत्यापत्तेः । तदुक्तम्–गंगासंबंधमात्रप्रतीतौ तु गंगातटे घोष इति मुख्यशब्दाल्लक्षणायाः को भेद इति । कुंताः प्रविशंतीत्यादावपि कुंतत्वादिना कुंतयुक्तपुरुषप्रतीतिः ।

प्रभाः–विशिष्टं लक्ष्यते । तेनायुर्जनकाभिन्नं घृतमिति बोधः । मुख्यार्थस्य घृतपदार्थान्वयविरहाल्लक्षणलक्षणेयं सारोपा । आयुरेवेदमित्यपि इदंत्वस्य विधेयविशेषणतया साध्यवसाना च । उपादानलक्षणा तु शुद्धा कुन्ता इत्यादौ सारोपा साध्यवसाना च पूर्वं दर्शितेति । उक्तोदाहरणेषु क्रमेण लक्षणाप्रयोजनान्याह––**अत्रेति** । एषूदाहरणेषु मध्य इत्यर्थः । भेदेऽपि वाहीकादिपदप्रयोगाद्भेदे भासमानेऽपि ताद्रूप्यं तादात्म्यम् । सर्वथैव वाहीकादिपदानुपादानेन भेदामिश्रितः । उपलक्षणे तृतीया । उक्तप्रयो- **अन्यवैलक्षण्येनेति** । जनकान्तरवैलक्षण्येन नियतकार्योपधायकतारूपेणेत्यर्थः ।

क्वचित् तादर्थ्यादुपचारः। यथा इन्द्रार्था स्थूणा इन्द्रः। क्वचित् स्वस्वामिभावसंबंधात्। यथा राजकीयः पुरुषो राजा। क्वचिदवयवावयविभावात्। यथा अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः। क्वचित् तात्कर्म्यात्। यथा अतक्षा तक्षा।

In certain cases, Indication is based on a thing being meant to serve the purpose of another e. g. Indra indicates the post dedicated to Indra. In some other cases, it is based on the relation of the Master and the Servant; e. g. RĀJĀ (King) indicates an official royal. In some cases it depends on the relation of the Part and the Whole; e. g. HASTA (Hand) indicates only the top-portion of the hand. In some others, it is based on one thing carrying out the functions of another; e. g. TAKṢĀ (Carpenter) indicates a person who does not belong to the class of carpenters (and yet works as a carpenter).

प्रदीपः–कार्यकारित्वादेः प्रतीतिः फलम्। तदुभयं चाभेदप्रतीतिपूर्वकमित्युक्तम्। क्वचित्तत्प्रयोजनकत्वेनोपचारः। यथा इंद्रार्था स्थूणा इन्द्रः। क्वचित्स्वस्वामिभावतः। यथा राजकीयः पुरुषो राजा। क्वचिदवयवावयविभावात्। यथा कर्मधारये अग्रहस्त इत्यत्रावयवेऽग्रमात्रे हस्तोपचारः। क्वचित्तदीयकर्मशालित्वात्। यथा अतक्षा तक्षा।

उद्योतः–अत एवात्र न मतुप्। तेषु च मुख्यकुंताभेदप्रतीत्या कुंतगततैक्ष्ण्यादिप्रतीतिरूपप्रयोजनसिद्धिः। तदुक्तम्—कुंतादिभिरात्मनः प्रवेशान्वयसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते इति। आक्षिप्यन्ते इत्यस्य स्वगतकुंतत्वाद्याश्रयत्वेन बोध्यन्ते इत्यर्थः। गौर्वाहीक इत्यत्र साधारणगुणरूपसादृश्याश्रयणेन वाहीकस्यैवारोपितगोत्वेन बोधस्ततो व्यंजनया मुख्यगवाभेदप्रतीतिः प्रयोजनम्। तत एव चमत्कारः। आद्यबोधेन तु न चमत्कारः। तस्मिन् भ्रमत्वज्ञानात्। अत एव गौर्वाहीको जड इत्यादौ न पौनरुक्त्यम्। आयुर्घृतमित्यादौ कार्यकारणभावसंबंधादायुष्ट्वेन घृतबोधः। ततो व्यंजनयाऽन्यवैलक्षण्येनायुःकारित्वरूपप्रयोजनप्रतीतिः। तदुक्तम्—साधारणगुणाश्रयणेन परार्थो लक्ष्यते इत्यपरे। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता। गौणभेदे भेदेऽपि ताद्रूप्यप्रतीतिः प्रयोजनं शुद्धभेदयोस्त्वन्यवैलक्षण्येन तत्कार्यकारित्वादिप्रतीतिरिति। लक्ष्यमाणगुणैरित्यस्य ज्ञायमानगुणैरित्यर्थः। यद्गुणज्ञानपूर्वकं वाहीके गोशब्दप्रयोगस्तद्गुणरूपात्संबंधादिति यावत्। साधारणगुणाश्रयणेनेत्यस्य तद्रूपसंबंधेनेत्यर्थः। अत्रत्यप्रदीपस्तु मतांतरपरतया कथंचिन्नेयः। लक्ष्यमाणगुणैरित्यत्र प्रकृत्यादित्वात्तृतीया। अनया रीत्याऽन्योऽपि प्रकाशग्रंथो योज्यः। एतेन रूपके न लक्षणा समानविभक्तिकत्वेन नामार्थयोरभेदान्वयोपपत्त्या लक्षणाफलाभावादित्यादि दीक्षितादिनव्योक्तं परास्तम्। गौर्न वाहीक इत्यादिबाधकज्ञानेन तद्बोधे अप्रामाण्यग्रहजननात्ततश्चमत्कारानापत्तेः। मम तु तस्य बोधस्य लक्षणामूलव्यंजनाजन्यत्वेन तत्र बाधज्ञानेनाप्रामाण्यग्रहाजननान्न दोष इति वदंति। इदमेव युक्तम्। अन्यथा गंगादिपदजन्यतटादिशाब्दबोधस्यैव प्रयोजनप्रतीतिनियामकत्वेन गंगातटे इत्यादितस्तदभावोपपत्तौ मध्येऽभेदप्रतीतिः प्रकाशाद्युक्ताऽसंगता स्यात्। मम तु यथा तदुपयोगस्तदुक्तं तद्बोधे भ्रमत्वग्रहादिति दिक्। **क्वचित्प्रयोजकत्वेनेति**। इंद्रपूजाप्रयोजके तत्प्रयोजकत्वव्यवहारो गौणः। **स्थूणा**। स्तंभः। **अग्रमात्रे इति**। विजातीयसंयोगं प्राप्तोऽवयवपुंज एवावयवीति मते अवयवांतर-

प्रभा–जनयोरनन्यलभ्यत्वमाह–**तदुभयं चेति**। अभेदप्रतीतौ हि कारणसत्तायां कार्यसत्त्वावगतेः कार्योपधानावगतिः। साध्यवसाने तु भेदस्यात्यन्ततिरोधानाद्व्यभिचारसंदेहोऽपि नैवेत्यव्यभिचारेण जनकत्वावगतिरिति भावः। **उक्तमिति**।

(सूत्र १७) लक्षणा तेन षड्विधा ॥ १७ ॥

आद्यभेदाभ्यां सह । सा च

Thus Indication is of six varieties.

(The six are made up) after including the two varieties mentioned at the outset. And again,

प्रदीपः–लक्षणा तेनेति ।

उपादानलक्षणरूपशुद्धभेदाभ्यां सह । रूढिप्रयोजनाभ्यां भेदे संभवत्यपि न ते विभाजकत्वेनोक्ते किं तु हेतुत्वेनेति न तत्कृतो भेदो गणितः । अत एव पश्चात् ' व्यङ्ग्येन रहिता ' इत्यादिना तत्कृतं भेदं दर्शयिष्यति । अन्यथा

उद्योतः–व्युदासाय मात्रपदम् । एवं गंगा तु हरते पापं दृष्टा पीतावगाहितेत्यादौ पीतेत्यंशे गंगापदस्य तदवयवे लक्षणा । दर्शनादिनाऽत्युत्कृष्टधर्मजनकतावच्छेदकजातेः प्रवाहमात्रवृत्तेरेव गंगापदशक्यत्वात् । गंगाजलवत्यपि नात्र गंगेति प्रतीतेः । गंगायां जलमिति तु गवि सास्ना वृक्षे शाखेतिवद्बोद्धव्यम् । तक्षेति । इदं जातिविशेषावच्छिन्ने रूढम् । अत्र वदंति । सारोपायां चंद्रो मुखमित्यादौ न लक्षणा । फलाभावात् । नामार्थयोरभेदस्य वाक्यविधयैव प्रतीत्युपपत्तेः । प्रसिद्धत्वादिनोपस्थितसादृश्येन पूर्वोक्तरीत्याऽप्रामाण्यज्ञानानास्कंदितानाहार्यभेदबुद्ध्युपपत्तेः । बाधबुद्धिप्रतिबुद्ध्यतावच्छेदककोटौ अनाहार्यत्वस्येव शाब्दान्यत्वस्यापि निवेशाद्वा न दोषः । योग्यताज्ञानं च न शाब्दे कारणं अपि तु प्रामाण्यग्रहे एवेति न दोषः । भेदकधर्मोपस्थितिकालिकाभेदप्रतीतौ रूपकं अन्यथाऽतिशयोक्तिरिति व्यवस्थासंभवेन मुखं चंद्र इत्यादौ अतिशयोक्तिरेव स्यादिति निरस्तम् । न चैवं सारोपलक्षणा किं नास्त्येव । अस्ति वाहीकोऽपरो गौरित्यादौ । तत्र ह्यपरादिपदैः प्रसिद्धगोभेदप्रतिपादनेन विरोधान्न वाच्ययोरभेदप्रतीतिः । किं तु तत्सदृशे लक्षणैव । लक्षणायाश्च न शक्याभेदबुद्धिः फलम् । किं तु सादृश्यातिशयबुद्धिः । एवं च सकलतत्कार्यकारित्वं फलति । एवमपूर्वो गौरिति वाहीकाभिप्रायेण प्रयुक्तेऽपि बोद्धव्यम् । तत्रापि न प्रसिद्धगवाभेदो लक्षणाफलम् । अपूर्वपदेन तिरस्कारात् । वाहीकत्वाद्यप्रतीतिकृतश्चाधिकचमत्कारः । न चैवमुपमाया अपि रूपकत्वापत्तिः । यत्र सादृश्यप्रतीतिकृतश्चमत्कारस्तत्रोपमा, यत्र त्वभेदप्रतीतिकृतः सादृश्यातिशयप्रतीतिकृतश्च तत्र रूपकमिति स्वीकारात् । इदमेवाभिप्रेत्य गौर्वाहीक इत्यादौ अभेदरूपकातिशयोक्ती, वाहीकोऽयमपरो गौरित्यादौ च ताद्रूप्यरूपकातिशयोक्ती इति कुवलयानंदकृतः । यत्तु रूपके लक्षणायां राजनारायणं लक्ष्मीस्त्वामालिंगति निर्भरमित्यादौ विशेषणसमासायत्तं रूपकमुपमितसमासायत्तोपमा वेति संदेहे यद्यत्रोपमा स्यात् तर्हि नारायणसदृशो राजेत्याद्यर्थे नारायणसदृशे लक्ष्मीकर्तृकालिंगनसंसर्गबाध इति रूपकमेवेत्यालंकारिकोक्तं विरुध्येत । रूपकेऽपि साधारणधर्मादिप्रकारेण लक्षणायां तद्दोषतादवस्थ्यादिति । तत्र रूपके साधारणधर्मादिप्रकारेण लक्षणायामपि लक्ष्यार्थे व्यंजनया वाच्यार्थभेदप्रतीतेस्तद्द्वारोपमेयेऽपि तत्प्रतीतिश्चादोषात् । न चैवमुपमितसमासेऽपि लक्षणायाः सत्त्वेन तत्फलतया तत्राप्यभेदप्रत्ययसत्त्वेनोपमायामपि न दोष इति वाच्यम् । तत्र निरूढलक्षणांऽगीकारेण प्रयोजनाभा-

प्रभाः–गङ्गायामित्यादौ तटे गङ्गात्वप्रतीत्यनन्तरमेव शैत्यादिप्रत्यय इत्येतत्कथनावसरे शङ्कापूर्वकमुक्तमित्यर्थः । अत्र च तदर्थवाचकपदस्यान्यत्र प्रयोगस्तद्धर्मप्रतिपत्त्यर्थ इत्युत्सर्ग एव बीजम् । **तत्प्रयोजनकत्वेनेति** । तदिन्द्रादि प्रयोजनं यस्य स्थूणादेरित्यर्थः । इन्द्रस्य च तत्र ध्येयतया पूज्यतया च प्रयोजनत्वम् । उपचारो लक्षणया सामानाधिकरण्येन

(सूत्र १८) व्यङ्ग्ये रहिता रूढौ सहिता तु प्रयोजने ।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ।

(सूत्र १९) तच्च गूढमगूढं वा,

तच्चेति व्यङ्ग्यम् । गूढं यथा—

It is devoid of a Suggested sense when it is based on Usage; but possessed of it (i.e. Suggested sense) when based on Purpose.

For the Purpose is apprehended only through the operation of Suggestion.

That (i. e. the Sense Suggested) again is Veiled or Not-Veiled.

TAT i. e. the Sense Suggested. Veiled as in the following instance:—

प्रदीपः-पुनरुक्तिप्रसङ्गात् । एवं च यथोक्तव्याख्यानेन षड्विधत्वे निर्व्यूढे । यत् 'षड्विधेति रूढिप्रयोजनोपादानलक्षणारोपाध्यव सानरूपैः षड्भिरुपाधिभिः कल्पिता विधाः प्रकारा यस्यामिति षड्विधा ' इति चण्डीदासव्याख्यानं तत् ' शुद्धैव सा द्विधा, सारोपाऽन्या तु ' इति एवतुशब्दयोरनालोचनविजृम्भितत्वादनादेयम् ।

एवमारोपादिकृतं प्रकारषट्कं प्रतिपाद्य व्यञ्जनकृतं प्रकारत्रयमाह—**व्यंग्येनेति** ।

लक्षणेत्यनुवर्तते । ननु प्रयोजनस्थले कथं व्यङ्ग्यसाहित्यनियम इति चेत् । प्रयोजनस्य व्यञ्जनामात्रगम्यत्वात् । तदिदमुक्तम्—प्रयोजनं हि व्यञ्जनाव्यापारगम्यमेव ' इति ।

उद्योतः-वात् । न च सदृशत्वेन रूपके लक्षणेति मते सादृश्यस्य शब्दोपात्तत्वादुपमापात्तिरिति वाच्यम् । तन्मते भेदकरंबितत्वाकरंबितत्वाभ्यां भेदादित्युक्तं प्राक् । अन्ये तूपमितसमासे।पमानसमासयोरपि सादृश्यमूलकतयोपमानतावच्छेदकधर्मस्योपमेये आरोपेणाभेदान्वयस्वीकारे बाधकाभावेन तत्रापि रूपकेऽक्षतिरेव । यदा तु प्रयोजनवशात्तत्रापि सदृशलाक्षणिकेन समासस्तदोपमाऽपीत्याहुः । स्पष्टं चेदमुपमानानीत्यत्र कैयटे । **षड्विधेति** । शुद्धा-गौणी-सारोपा-साध्यवसाना-उपादानलक्षणैः षड्भेदेत्यर्थः । न च गौण्यां लक्षणलक्षणात्वांगीकारेण सप्तविधत्वमुचितमिति वाच्यम् । अत्रोपादानलक्षणाभ्यामर्थांतरसंक्रमितात्यंततिरस्कृतवाच्यौ, सारोपासाध्यवसानाभ्यां रूपकप्रथमातिशयोक्ती, शुद्धाभ्यां च ताभ्यां हेत्वलंकारं निरूपयिष्यतीति षड्भेदकथनमेव सफलम् । गौण्या लक्षणायास्तु न क्वापि विशिष्य नियामकत्वमिति न तद्गणनमिति भावः । **एवं चेति** । पौनरुक्त्यप्रसंगेनेत्यर्थः । **अनालोचनेति** । एवतुशब्दाभ्यां गौण्या उपादानलक्षणरूपभेदद्वयाभावबोधनेन लक्षणामात्रस्य रूढिप्रयोजनवत्तद्भेदद्वयकथने तेन विरोधस्य स्पष्टत्वादिति भावः । **व्यंजनकृतमिति** । लक्षणायास्तत्फलकत्वादिति भावः । **तत्तदितरेति** । सहृदयासहृदयेत्यर्थः । **मुखमिति** । इदं लक्षणामूलध्वनेरुदाहरणम् । इन्दुवदनायास्तनौ शरीरे तरुणिम्न उद्गम आविर्भावो मोदते स्फीतो भवतीत्यर्थः ।

प्रभाः-प्रयोगः । षष्ठीसमासे हस्ताग्रमित्यापत्तेराह—**कर्मधारय इति** । तक्षेति जातिविशेषविशिष्टवाचकम् । तेन लक्षणोपपत्तिः । क्रमेण नमस्यत्वानातिक्रमणीयत्वकार्यसमर्थत्वकर्मावैगुण्यप्रयोजनानि ज्ञेयानि । अत्र चण्डीदासेन सारोपाध्यवसानयोरिवोपादानलक्षणयोरपि शुद्धगौणभेदेन चतुर्विधत्वात् षड्विधेत्यसंगतमित्यभिप्रेत्य षड्भिरुपाधिभिः कल्पिता विधाः प्रकारा यस्यामिति व्याख्यातं तद्दूषयति—**एवंतुशब्दयोरिति** । एवं चोपादानलक्षणभेदयोश्चातुर्विध्याभावान्न षडधिकभेदापत्तिरिति यथाश्रुतमेव साध्वित्यर्थः । रूढिप्रयोजनाभ्यां भेदाधिक्यं तु न दोषाय । तत्कृतभेदस्येहानुक्तेः । अग्र एव च वक्ष्यमाणत्वादियुक्तमेवेति । **व्यञ्जनकृतमिति** । व्यङ्ग्यराहित्येऽपि प्रतियोगिनिरूप्यतया व्यञ्जनप्रयुक्तत्वं

मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥ ९ ॥ (१)

The face wears a blooming smile; the glance has mastered the curve; the gait is bursting with amorous gestures; the thoughts have lost their poise; the chest carries the breasts that are budding; the buttocks have thrown off the yoke in the frame of the limbs (AṄSA). Oh! that outburst of youth is in exultation on the person of the lady of moon-like face! (9)

प्रदीपः–यत्तु--'ननु लक्ष्यप्रयोजनयोर्द्वयोरपि लक्षणयैव प्रतीतौ किमत्र व्यञ्जनयेत्यत आह–प्रयोजनं हीति।' इति तत्फक्किकावतारणं तदज्ञानविजृम्भितम् । अत्र व्यञ्जनस्थापनस्याप्रस्तुतत्वात्, तत्प्रकरणे च 'व्यञ्जनान्नापरा क्रिया' इति सूत्रेणैव प्रतिपादनात् । **तच्चेति** ।

तदिति व्यङ्ग्यम् । लक्षणाभेदप्रयोजक आरोपादिर्यथा भिद्यते तथा तत्प्रयोजकं व्यङ्ग्यमपीति चस्यार्थः । वाशब्दः समुच्चये । काव्यभावनापरिपक्वबुद्धिः सहृदयः । तन्मात्रवेद्यं गूढम् । तत्तदितरवेद्यमगूढम् । तत्र गूढं यथा--

मुखमिति। अत्र विकासः पुष्पधर्मः स्मितेऽनुपपन्न इति प्रसृतत्वं लक्षयता विकसितपदेन लोकोत्तररमणीयतातिशयो व्यज्येत स च गूढः । एवं वशितसमुच्छलितापास्तसंस्थामुकुलितोद्धुरमोदतेशब्दैरायतत्वोल्लासितत्वानेकविषयसंचारित्वोद्भिन्नत्वयोग्यत्वानियन्त्रितत्वानि लक्षयद्भिर्युक्तानुरागित्वसकलवशीकारित्वानुरागातिशयालिङ्गनयोग्यत्वरमणीयत्वस्पृहणीयत्वानि गूढानि व्यज्यन्ते ।

उद्योतः–उत्कृष्टवस्तुसंबंधात् स्वयमप्युत्कर्षं प्राप्त इत्यर्थः । प्रकृत्यैवेयमिन्दुवदना तत्राप्येवंविधनवयौवनाविजृभणामित्यतिकष्टमापतितं विदग्धयुवजनस्येत्येवं खेदे बतेति । अहो रमणीयतातिशय इति विस्मये च । अहो भाग्येन संपन्नं परमोत्सवाख्यातं युवजननयनानामिति हर्षे वा । 'बतामंत्रणसंतोषखेदानुक्रोशाविस्मय' इति नानार्थकोशात् । स्फीतताचिह्नं अनेकस्थानेऽनेकविधकार्यजननरूपं दर्शयति—मुखमिति । यतो मुखं विकसितं प्रसृतं स्मितं 'स्मितं स्यात्स्पंदिताधर' मित्युक्तलक्षणं हास्यविशेषरूपं यत्र तथाभूतम् । प्रेक्षितं वशितः स्वाधीनः कृतः वक्रिमा तिर्यग्गामित्वं येन तथा । गतिः गमनं समुच्छलिताः निरंतरमतिशयेन प्रादुर्भूता विभ्रमा यत्र तथाभूता । मतिर्बुद्धिः त्यक्तपरिमितविषयिका । उरः वक्षःस्थलम् । मुकुलितौ मुकुलाकारौ ईषदुन्नतौ स्तनौ यत्र । जघनं ऊरुमूलभागः । अंसबंधेनावयवानां दृढबंधेन उद्धुरं विलक्षणरतियोग्यम् । यद्वाऽसबंधो रतिबंधविशेषस्तत्र समर्थम् । तथा चासाधारणस्मिताद्युन्मेषः स्फुटमेव यौवनोद्गममवगमयतीति भावः । अत्र च विकासस्य पुष्पधर्मस्य स्मिते वशीकरणस्य चेतनधर्मस्य दृष्टौ ऊर्ध्वगतिविशेषरूपसमुच्छलनस्य मूर्तद्रव्यधर्मस्य विभ्रमे संस्थाया मर्यादायास्त्यागस्य चेतनधर्मस्य मतौ मुकुलितत्वस्य पुष्पधर्मस्य स्तनयोरुद्धुरत्वस्योत्कृष्टधुरावत्त्वरूपस्य चेतनधर्मस्य जघने मोदस्य हर्षस्य चेतनधर्मस्य यौवनोद्गमे बाधितत्वात् विकसितादिपदैरुपदर्शितपदार्थां लक्ष्यंते । तत्र विकासेनासंकुचितत्वसंबंधेन सातिशयत्वं लक्ष्यम् । सौरभादि व्यंग्यम् । वशीकरणेन स्वाधीनत्वं लक्ष्यते । अभिमतविषयप्रवृत्तिः संबंधः । युक्तानुरागित्वं

प्रभा–बोध्यम् । चशब्दवाशब्दयोरुभयोरानर्थक्यमतो व्याचष्टे–**लक्षणाभेदेति** । तथा च अप्यर्थश्चकार इत्यर्थः । अव्यवस्थितविकल्पायोगादाह–**वाशब्द इति** । **मुखमिति** । अंससंबन्धी बन्धः सुरतबन्धविशेषः । तत्र समर्थमित्यर्थः ।

अगूढं यथा—

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥ १० ॥ (रविगुप्त'ऽसुभाषित)

अत्रोपदिशतीति । अनायासेन शिक्षणं अभिधेयवत्स्फुटं प्रतीयते ।

Not-veiled as in the following:—

By association with affluence even dullards turn into judges of the manners of the polished ones. It is only the elation of youth that teaches graces to lovely women. (10)

Here UPADIŚATI illustrates not-veiled Suggestion.

प्रदीपः-यथा वा मम--

'चकोरीपाण्डित्यं मलिनयति दृग्भङ्गिमहिमा
हिमांशोरद्वैतं कवलयति वक्त्रं मृगदृशः ।
तमोवैदग्ध्यानि स्थगयति कचः किं च वचनं
कुहूकण्ठीकण्ठध्वनिमधुरिमाणं तिरयति ॥'

अत्र क्रियापदानामात्यन्तिकविच्छायत्वादिव्यङ्ग्यानि गूढानि । अगूढं यथा--**श्रीपरिचयादिति** ।

उद्योतः-व्यंग्यम् । समुच्छलनेन बाहुल्यं लक्ष्यते । प्रयोज्यप्रयोजकभावः संबंधः । बहुलं हि समुच्छलति । सकलमनोहारित्वं व्यंग्यम् । संस्थाया असनेनाधीरत्वं लक्ष्यते । हेतुहेतुमद्भावः संबंधः । पूर्वं मुग्धतया गुरुजनसन्निधौ प्रियतमेऽप्यंगीकृतमर्यादा मतिरासीत् । इदानीं तु मौग्ध्यत्यागान्न तथेत्यनुरागातिशयो व्यंग्यः । मुकुलितत्वेन काठिन्यं लक्ष्यते । निबिडावयवत्वं संबंधः । कठिनं हि तद्भवति । यद्वोद्भिन्नत्वं लक्ष्यम् । आलिंगनयोग्यत्वं व्यंग्यम् । उद्धुरत्वेन योग्यत्वं लक्ष्यते । भारसहनक्षमत्वं संबंधः । रमणीयत्वं व्यंग्यम् । मोदेनोत्कर्षो लक्ष्यते । जन्यजनकभावः संबंधः । स्पृहणीयत्वं व्यंग्यम् । अनियंत्रितत्वमुत्कर्ष एवेति । (पृथ्वी छन्दः ।) **लक्षयद्भिरिति** । वशीकरणद्रवद्रव्योच्छलननिर्मर्यादत्वकलिकायत्तत्वोत्कृष्टधुरावत्त्वरूपमुख्यार्थबाधादिति भावः । (**चकोरीति** । दृग्भंगिमहिमा दर्शनप्रकारमाहात्म्यम् । कवलयति ग्रसति । कुहूकंठी कोकिला । शिखरिणी छन्दः ।) **आत्यंतिकविच्छायत्वादीति** । आदिना वक्रप्रतियोगिकसादृश्यवत्त्वस्निग्धश्यामत्वश्रुतिकटुत्वानि । **श्रीपरिचयादिति** । जडा अनभिज्ञा अपि जनाः श्रीपरिचयात् । प्रथमसंबंधः परिचयः । तस्मादेव चतुरजनचरितानां ज्ञातारो भवंति । तत्रार्थांतरन्यासमाह-उपदिशतीति । कामिनीनां यौवनमदः स्वयमेव ललितानि उपदिशति । तथा च विदग्धजनचरितस्वरूपानाभिज्ञानामपि विनैवोपदेशं सकृत्संबंधात्तदवगमः । तत्किं वक्तव्यं तत्स्वरूपाभिज्ञानां तदभिलाषुकाणां उपदेशे तद्विज्ञानमित्य-

---

प्रभाः-शेषमुदाहरणचन्द्रिकायां द्रष्टव्यम् । **चकोरीति** । दृशो भङ्गयश्चालनदर्शनप्रकाराः तेषां महिमा हृद्यत्वादिरूपश्चकोरीणां पाण्डित्यं मनोहारितारूपं मलिनीकरोति विच्छायं करोति । तथा अद्वैतमद्वितीयतां कवलयति ग्रसति । कचः केशपाशस्तमोवैदग्ध्यानि अतिश्यामत्वादीनि स्थगयत्याच्छादयति । स्वसंनिधौ तेषामप्रतिभासात् । कुहूकण्ठी कोकिला । तिरयत्यन्तर्हितं करोतीत्यर्थः । **विच्छायत्वादीति** । आदिना ग्रसनलक्ष्याया निवृत्तेरात्यन्तिकत्वम्, स्थगनलक्ष्यस्याप्रतिभासस्यात्यान्तिकत्वम्, तथा तिरोधानलक्ष्यस्य तस्यात्यन्तिकत्वं च संगृह्यते । **श्रीपरिचयादिति** ।

(सूत्र २०) तदेषा कथिता त्रिधा ॥ ८ ॥

अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति ।

(सूत्र २१) तद्भूर्लाक्षणिकः,

शब्द इति संबध्यते । तद्भूस्तदाश्रयः ।

(सूत्र २२) तत्र व्यापारो व्यञ्जनात्मकः

Thus Indication has been stated to be of three kinds (by this principle of division).

(The three kinds are:) Indication (1) having no Suggested sense; (2) having a Suggested sense that is veiled; (3) and having a Suggested sense that is not-veiled.

Indicative (word) is what forms the basis thereof (i. e. of Indication).

LAKṢAṆIKAH is to be construed with ŚABDAH (understood from Sūtra 5). TADBHŪH i. e. the basis thereof.

The operation therein (i. e. in an Indicative word yielding a Suggested sense) is in the nature of Suggestion.

प्रदीपः–अत्रोपदेशकत्वं शब्दविशेषप्रयोक्तृत्वं मदेऽनुपपन्नमित्याविष्कारं लक्षयता उपदिशतिपदेनानायासेन शिक्षादानमभिव्यज्यते । तच्च सहृदयासहृदययोरप्यभिधेयवत्प्रकाशते । **तदेषेति ।**

तत्तस्मात्त्रिधा–अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति । एवं लक्षणां निरूप्य तया लाक्षणिकं लक्षयति–**तद्भूरिति ।**

'स्याद्वाचको लाक्षणिकः' इतिसूत्रस्थः शब्द इत्यनुषज्यते । तद्भुस्तस्या लक्षणाया आश्रयः ।

अथ व्यञ्जकशब्दलक्षणाय व्यञ्जना निरूपणीया । सा च द्वेधा–शब्दनिष्ठा अर्थनिष्ठा च । तत्रान्त्या शब्दलक्षणेऽनुपयुक्तेत्यग्रे विवेचनीया ।

आद्या तु द्वेधा–अभिधामूला लक्षणामूला च । तत्र यद्यप्यभिधायाः प्राथम्यादुपजीव्यत्वाच्च तन्मूला प्रथमं निरूपयितुमुचिता, तथापि सुप्रसिद्धत्वाल्लक्षणायाः प्रकृतत्वाच्च तन्मूलामेव प्रथमं निरूपयति–**तत्रेति ।**

उद्योतः–त्रेति भावः । ज्ञानानुकूलशब्दप्रयोगरूपोपदेशकर्तृत्वस्य चेतनधर्मस्याचेतने यौवनमदे बाधात् सामान्यविशेषभावसंबंधेनाविष्कारमात्रं लक्ष्यम् । अनायासेन ललितादिज्ञानं व्यंग्यम् । इदं च विदग्धाविदग्धवेद्यम् । ललितं 'सुकुमारतयांगानां विन्यासो ललितं भवेत्' इत्युक्तलक्षणलक्षितम् । 'अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम्' इत्युक्तलक्षणं वा । ललितानीत्यत्र बहुवचनमाद्यर्थकम् । तेन हेलाविव्वोकविलासादिहावसंग्रहः । तथा चामरेण 'स्त्रीणां विलासविव्वोकविभ्रमा ललितं तथा । हेला लीलेत्यमी हावाः क्रिया शृंगारभावजाः ॥' इत्यादिनैषु हावपदवाच्यत्वं प्रतिपादितम् । एतेन 'ललितानीति विभ्रमाणीत्यर्थः । विभ्रमा ललितं तथेत्यमरः' इति मंदोक्तमपास्तम् । कोशस्यान्यार्थतात्पर्यकत्वादित्याहुः । (गाथा छन्दः ।) लक्षणामूलागूढाख्यगुणीभूतव्यंग्यमिदम् । भवतीत्यर्था-
संगतिमाशंक्याह–**आश्रय इति** । अधिकरणक्किबंतस्य तत्सत्ताश्रय इत्यर्थः । **सुप्रसिद्धत्वादिति ।**

प्रभाः–परिचयोभिनवसंबन्धः । ललितं 'सुकुमारतयाङ्गानां विन्यासो ललितं भवेत्' इत्युक्तलक्षणहावविशेषः । **सुप्रसिद्धत्वादिति ।** लक्षणाप्रयोजननिर्वाहकतया सुबोधत्वादित्यर्थः । ननु गङ्गात्वरूपव्याप्यज्ञानात्पावनत्वादेरनुमितस्य तदे

(20)

व्यञ्जना.

कुत इत्याह—

(सूत्र २३) यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥ ९ ॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात् । न चात्र व्यञ्जनादृतेऽन्यो व्यापारः ।

तथाहि—

(सूत्र २४) नाभिधा समयाभावात्,

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः संकेतिताः ।

(सूत्र २५) हेत्वभावान्न लक्षणा ॥ १० ॥

Why so? The author replies:—

The process leading to the fruit, comprehended only through words (and not through Inference etc.,), to convey an apprehension of which (fruit) Indication is resorted to, is none else but Suggestion.

Where words are used, by way of Indication, in order to convey an idea in view (PRAYOJANA), the apprehension of it (i. e. the idea) is had not from anything else, but from the words alone. And herein the operation is none else but Suggestion.

It is not Expression for want of a convention (for the idea sought to be conveyed.)

For the attributes like sanctity which are apprehended in reference to the TATA etc., in instances like GAMGAYAM GHOSAH, the words like GAMGĀ are not admitted to have a (direct) convention.

Nor is it Indication for want of the circumstances leading thereto.

प्रदीपः—तत्र लाक्षणिकशब्दे । व्यापारो व्यङ्ग्यप्रकाशनानुकूलः । लक्षणादिनैव तत्प्रतीतौ किं तयेत्यत आह—**यस्येति** । यस्य पावनत्वादेः फलस्य प्रतीत्यर्थं लक्षणाश्रयशब्दप्रयोगस्तत्फलं तस्मादेव शब्दाद्गम्यते न तु प्रमाणान्तरात् । व्याप्तिस्मृत्यादेरनपेक्षणात् । न च तत्र शब्दस्य व्यञ्जनं विना अन्या क्रिया व्यापारः । तथा हि—**नाभिधेति** ।

पावनत्वादौ फले संकेतग्रहाभावात् । अभिधा हि संकेतग्रहसहायैवोपयुज्यते न तु स्वरूपसतीति वक्ष्यते । **हेत्वभावादिति** ।

मुख्यार्थबाधस्तद्योगो रूढिप्रयोजनान्यतरदिति त्रयं लक्षणाहेतुः । तदभावमेवोपपादयति—**लक्ष्यमिति** ।

उद्योतः—लक्षणाया व्यंग्यार्थफलकत्वादिति भावः । लाक्षणिकशब्दप्रतिपाद्यत्वं च लक्ष्यस्यार्थस्य लक्षणमपि अर्थत उक्तमेवेति बोध्यम् । **आधातुम्** । जनयितुम् । **समुपास्यते** । सत्यपि वाचकशब्दे तं विहायाद्रियते । **व्याप्तिस्मृत्यादेरिति** । आदिना संनिकर्षादि । **नाभिधा समयाभावादिति** । शक्तिरतिरिक्तः पदार्थस्तद्ग्राहकः संकेत इति न साध्याविशेषो हेतोरिति बोध्यम् । **संकेतग्रहसहायेति** । अभिधाग्राहकत्वमेव सहायत्वमिति बोध्यम् । तद्दशर्यन्नाह—**न स्वरूपसतीति** । ज्ञाप्यार्थ-

---

प्रभाः—समारोपोऽस्त्वित्यत आह—**व्याप्तीत्यादि** । आदिना संनिकर्षपरिग्रहः । ननु बोध्यार्थतात्पर्यविषयानुपपत्त्यात्मको

मुख्यार्थबाधादित्रयं हेतुः। तथा च

(सूत्र २६) लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः॥ २१॥

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, तद्वत् यदि तटेऽपि सबाधः स्यात् तदा प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः। नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबन्धः। नापि प्रयोजने लक्ष्ये किंचित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः।

Circumstances viz. the three including the incongruity of the Primary sense.

Neither is the sense Indicated the sense Primary; nor is there any incongruity about it; nor is it (i. e. the sense Indicated) connected with the fruit. (Further,) there is no purpose therein; nor is the word hampered in reaching the sense.

The word GAṀGĀ would *indicate* the Purpose, if it were incongruous even in the sense of TAṬA, just as it *indicates* TAṬA because it is incongruous in the sense of SROTAS (i. e. flow). TAṬA, again, is not the Primary sense of the word GAṀGĀ; nor is there any incongruity here (i. e. in the TAṬA being the site of GHOṢA). Further, the sense of the word GAṀGĀ viz. TAṬA is not associated with the attributes of sanctity etc. which are (assumed to be) indicated; nor can there be any (other) Purpose for the Purpose (of sanctity etc.) being indicated; nor is the word GAṀGĀ powerless to convey (to us) the Purpose as it would be powerless to convey (the sense of) TAṬA (in the absence of the three circumstances).

प्रदीपः–यथा गङ्गाशब्दस्य नीरं मुख्योऽर्थः, तत्र च बाधः, तीरे च तत्संबन्धः, तीरस्य च लक्षणयोपस्थापनम्, मुख्यशब्देन प्रतिपादयितुमशक्यस्य पावनात्वादेः प्रतीतिश्च प्रयोजनमिति गङ्गाशब्देन तटं लक्ष्यते। तद्वद्यदि तटमपि मुख्यं स्यात्तत्र च बाधो भवेत्, प्रयोजनस्य च गङ्गादिगतपावनत्वादिविशेषस्य तटेन संबन्धः स्यात्, लक्षणया प्रयोजनप्रातिपादनस्य च प्रयोजनान्तरं संभवेत्, तदा गङ्गाशब्दः प्रयोजनं लक्षयेत्। न चैतदेकमप्यत्रेत्यर्थः।

न केवलं मुख्यार्थबाधादीनामभावमात्रम्, किं तु तेषामपेक्षापि नेत्याह–**न च शब्द इति**।

मुख्यार्थबाधादित्रयमपेक्ष्य बोधकत्वं स्खलद्गतित्वम्। एवं 'नापि गङ्गास्तशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः' इत्यादिवृत्तौ 'बाधादिकमनपेक्ष्य' इति शेषो द्रष्टव्यः। 'समर्थः' इति पाठे तु 'बाधादित्रयमपेक्ष्यैव' इति शेषः।

उद्योतः–बाध एव तद्बीजं स्यादत आह—**नाप्यत्रेति**। काकेभ्यो दधीत्यादाविव तात्पर्यार्थबाधएव तद्बीजमत आह—**योग इति**। साक्षात्संबंध एव लक्षणाप्रयोजक इति भावः। परंपरासंबंधोऽस्त्येवेत्यत आह—**न प्रयोजनमिति**। **अनपेक्ष्येति** शेष इति। गंगाशब्दस्तटं यथा बाधादिकमनपेक्ष्य प्रतिपादयितुमसमर्थस्तथा प्रयोजनं नेत्यर्थः। गंगादिशब्दः प्रयोजनांशे तदपेक्षो नेत्यतः प्रयोजनं न

प्रभाः–हेतुरस्त्येवेत्यत उक्तं प्रयोजनस्य चेति कथंचित्परम्परासंबन्धसत्त्वादाह–**लक्षणयेति**। वैयात्यात् धाष्टर्यात्। **प्रकृतार्थेति**। सप्रयोजनलक्षणायाः प्रयोजनलक्षणाधीनत्वात्तत्परम्परायां विषयान्तरसंचारेण यत्र विच्छेदस्तत्र तत्पूर्व-

(सूत्र २७) एवमप्यनवस्था स्याद्या मूलक्षयकारिणी ।

एवमपीति प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत् । ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते, 'गङ्गायास्तटे घोषः' इत्यतोऽधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा । तत्किं व्यञ्जनेनेत्यत आह—

Even thus (i. e. if a second purpose be admitted), there will arise a *regressus ad infinitum* which will strike at the very root.

EVAMAPI i. e. If the Purpose were to be indicated, it would be so, with the help of another Purpose, which, in its turn, would have to be indicated with the help of a third and so on *ad infinitum*, which would bring about the non-apprehension of the matter on hand.

It might be urged:—"The TAṬA only as possessing the attributes of sanctity etc. is indicated. And the Purpose (underlying this Indication) consists in the apprehension of a sense in excess of what is obtained from GAṀGĀYĀS TAṬE GHOṢAH. What then is the use of Suggestion?" The author replies,

प्रदीपः—नन्वस्ति प्रयोजनेऽपि लक्ष्ये प्रयोजनान्तरमिति किं व्यञ्जनयेतिचेद्वैयात्याद्यदि ब्रूयात्तत्राह—**एवमपीति**।

मूलं प्रकृतार्थप्रतीतिः ।

ननु पावनत्वादिविशिष्टमेव तीरं लक्ष्यतामिति किं व्यञ्जनया । न चैवं प्रयोजनस्यापि लक्ष्यकोटौ प्रवेशाल्लक्षणाप्रयोजनं नास्तीति वाच्यम् । 'गङ्गातटे घोषः' इत्यतोऽधिकस्यार्थस्य प्रतीतेरेव प्रयोजनत्वादित्यत आह—**प्रयोजनेनेति**।

उद्योतः—लक्ष्यमिति भावः। **वैयात्यम्**। वैतंडिकता। **मूलक्षयेति** । प्रयोजनपरंपरायां लक्षणास्वीकारे यल्लक्षणाप्रयोजने विषयसंचारादिना लक्षणानिवृत्तिस्तस्याग्रिमलक्षणानिवृत्तौ मूलभूतलक्षणाप्रयोजनप्रतीतिरपि न स्यादिति भावः । एतेन बीजांकुरादिवदनवस्था न दूषणमित्यपास्तम् । 'मूलक्षतिकरीं त्वाहुरनवस्थां हि दूषण' मित्युक्तेः । **अधिकस्यार्थस्येति** । पावनत्वादिवैशिष्ट्यरूपस्येत्यर्थः। **प्रयोजनेनेति** । प्रयोजनीभूतज्ञानविषयेणेत्यर्थः । तथा सति लक्षणाजन्यज्ञानस्यैव फलज्ञानात्मकत्वात्तज्ज्ञानस्य लक्षणाजन्यज्ञानफलत्वं न स्यादित्याह—**ज्ञानस्येति** । **विषयाद्भेद एवेति** । एवं चोक्तसूत्रार्थस्य न तत्र फलत्वव्याघातकतेति भावः । मृद्घटोपादानमितीश्वरगतोपादानप्रत्यक्षफले

प्रभाः—लक्षणानिवृत्त्या मूलभूतलाक्षणिकार्थप्रतीतिक्षतिरित्यर्थः । **आद्य इति** । स्वजन्यस्वविषययोर्भेद इत्यर्थपर्यवसाने पावनत्वस्य स्वजन्यत्वाभावात्तज्ज्ञानमेव तथा तस्य च विषयाद्भेदोऽस्त्येवेति न पावनत्वविशिष्टलक्षणानुपपत्तिरित्यर्थः । एवं च मृद्घटोपादानमिति प्रत्यक्षजन्ये घटे तद्विषयभेदाभावाद्व्यभिचारोऽपि ज्ञेयः । **अन्त्य इति**। स्वजन्यप्रतीतिविषयस्य स्वविषयाद्भिन्नत्वनियम इत्यर्थः। एवं च लक्षणाजन्यज्ञानविषयत्वेन तत्फलस्य शैत्यपावनत्वादेर्लक्षणाविषयत्वं न युक्तमित्यर्थः । प्रकटता ज्ञानजन्या ज्ञाततापरनामधेया भट्टमते । संवित्तिरनुव्यवसायो न्यायमते । अज्ञानावरणभङ्गाख्याभिव्यक्तिर्वेदान्तिनये । **विरोध इति** । प्रकटतायाः फलत्वाभिधानविरोध इत्यर्थः । तदाह—**प्रकटतेति** । विशेषणज्ञानजन्यविशिष्टप्रतीतिविषये विशेषणे फले विशेषणज्ञानविषयत्वसत्त्वाद्व्यभिचारश्चेत्यपि बोध्यम् । ननु क्वचिज्जन्यं

(सूत्र २८) **प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ १२ ॥**

कुत इत्याह—

(सूत्र २९) **ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।**

प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा ।

It is unreasonable to admit that what is indicated is qualified by Purpose. Why so? The author replies:—

For, it is said that the Object of a Means of Knowledge (JNĀNA) is one thing and its Result another.

The Object of Direct Perception and such other Means of Knowledge is tha blue etc. The Result (thereof), on the other hand, is Manifestation, (according to some), while, (according to others), it is Apprehension.

प्रदीपः-कुत इत्याकाङ्क्षायामाह--**ज्ञानस्येति** ।

ननु विषयफलयोर्भेद इति सूत्रार्थः, स चायुक्तः । फलत्वं हि जन्यत्वं वा जन्यप्रतीतिविषयत्वं वा । आद्ये पावनत्वादौ तदभावः । तज्ज्ञाने च विषयाद्भेद एव । अन्त्ये 'प्रत्यक्षादेर्नीलादिर्विषयः । फलं तु प्रकटता संवित्तिर्वा' इति वृत्तिविरोधः । प्रकटताज्ञानस्य प्रत्यक्षजन्यत्वाभावात् । न च जन्यज्ञाप्यसाधारणमेकं साध्यत्वमस्तीति । अत्र ब्रूमः-- ज्ञानस्य जानकीभूतो विषयो यथा ज्ञानादन्यस्तथा फलमपि तस्य स्वतो भिन्नम् । कारणस्येव कार्यस्यापि भिन्नकालत्वनियमात् । शैत्यादौ तु क्वचित्फलपदमौपचारिकं दृश्यते । तथा च लक्ष्यज्ञानमेव यदि शैत्यज्ञानं तदा प्रयोजनं न स्यादित्यर्थः । ननु लक्ष्यप्रतीतेर्न शैत्यप्रतीतिः फलम्, किं तु शक्यसंवन्धरूपलक्षणायाः तथा च न किंचिद्दूषणमिति । अत्राहुः--

अन्वयानुपपत्त्या हि लक्षणा प्रसरन्ती यावदन्वयोपपादकं तावदेव विषयीकरोति न त्वनुपपादकमपीति कथं तटे पावनत्वमपि विषयीकुर्यात् । नन्वन्वयानुपपत्त्या कल्प्यमानापि साऽनुद्देश्यमपि शैत्यं विषयीकरोति । यथा तापोपशमायोपादीयमानं चन्दनं शैत्यमपि जनयतीति चेत्, न । चन्दनस्य संनिधिमात्रेण शैत्यजनकत्वम् । लक्षणायास्त्वनुपपत्तिप्रसारितयेति वैषम्यात् ।

उद्योतः-घटादौ तद्विषयभेदासत्त्वाद्व्यभिचरितश्च सूत्रार्थ इति बोध्यम् । **वृत्तिविरोध इति** । स्वजन्यप्रतीतिविषयरूपे फले स्वविषयाद्भेद इत्यत्र नियमे विशिष्टज्ञानविषये तज्जनकविशेषणज्ञानविषयभेदासत्त्वेन व्यभिचारश्चेत्यपि बोध्यम् । तत्र न्यायमते संवित्तिर्वेति अनुव्यवसायः । प्रकटतेति मीमांसकमते । चक्षुरादीनां ज्ञानद्वारा विषये प्राकट्यजनकत्वामिति तेषां सराणिः । **जनकीभूत इति** । विषयतासंबंधेन ज्ञानं प्रति तादात्म्येन विषयस्य हेतुत्वादिति भावः । स विषयो बौद्ध इति योगवृत्तावस्माभिरुपपादितम् । तदा सामानाधिकरण्येनैव हेतुत्वं बोध्यम् । **फलम्** । शैत्यादिप्रतीतिरूपम् । नन्विति शङ्का न सूत्रमते, किं तु शक्यसम्बन्धो लक्षणेति स्वव्याख्यातमते इति

प्रभाः-कांचित्तु ज्ञाप्यं फलपदेनोच्यत इति नानुपपत्तिरत आह-**न चेति** । उभयानुगतैकप्रवृत्तिनिमित्ताभावान्नोभयं फलपदार्थ इत्यर्थः । **यथेति** । सूत्रे हिशब्दः प्रसिद्ध्यर्थतया दृष्टान्तार्थक इति भावः । शैत्यादेः फलस्य ज्ञानभेदोऽस्त्येवेत्यत आह—**औपचारिकमिति** । तथा च तज्ज्ञानमेव फलमित्यर्थः । **तावदेवेति** । न च तात्पर्यविषयान्वयोपपादकतया लक्षणाविषयत्वं दुर्वारमिति वाच्यम् । यत्र पावनत्वादिप्रकारेण तटे घोषान्वयबोधो भवत्विति न तात्पर्यम्, किं तु तटे घोषान्वयबोधोत्तरं पावनत्वादिबुद्धिः स्यादित्येव तत्र लक्षणाजन्यबोधस्य पावनत्वादिविषयतया असंभवेन व्यञ्जनाया आवश्यकत्वात् । अनुपपत्त्या प्रसारिणी तच्छीला तत्तयेत्यर्थः । यथाश्रुते विषयफलयोर्भेद इत्यर्थः ।

(सूत्र ३०) विशिष्टे लक्षणा नैवम्

निगदेनैव व्याख्यातम् ।

(सूत्र ३१) विशेषाः स्युस्तु लक्षिते ॥ १३ ॥

Thus Indication is operative never with regard to such an indicated object as is qulified (by the Purpose).

This explains itself.

But the attributes may be assumed as existing in the object after it is indicated.

प्रदीपः–यत्तूक्तं यथाश्रुते चण्डीदासेन—' ज्ञानस्य विषयातिरिक्तं फलमात्रं विवक्षितम्, ज्ञेयगतं वा । आद्ये प्रकृतेऽप्यस्ति गोस्वामिगतप्रतीतिः । अन्त्ये प्रयोजनज्ञान एव व्यभिचारः । तेन हि गोस्वामिसंतोषमात्रं जन्यते न तु तद्गतं किंचिदिति । तस्माद्धेतुफलयोस्तटप्रतीतिफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्वमसमीचीनमेवेति व्यञ्जनासिद्धिरित्यत्र तात्पर्यम् ' इति । तदबोधविजृम्भितम् । न ह्यनेन सूत्रेण यथाश्रुतेनापि ज्ञानत्वस्य विषयान्यफलकत्वव्याप्यत्वं प्रतिपाद्यते, किं तु ज्ञानफलत्वस्य विषयान्यत्वव्याप्यत्वम् । तथा च शैत्यादेर्लक्षणाजन्यप्रतीतिविषयत्वे तत्प्रयोजनं न स्यादित्यर्थे दोषानवकाशः ।

वयं तु ब्रूमः—विशिष्टं लक्ष्यं तदा भवेद्यदि विशिष्टत्वं लक्ष्यतावच्छेदकं पूर्वप्रतीतं संभवेत् । न त्वेवम् । पावनत्वादिविशेषवैशिष्ट्यस्य तटे प्रमाणान्तरागोचरत्वात् तत्र तस्याभावात् । यदुक्तवान्—' योगःफलेन नो '

उद्योतः–बोध्यम् । लक्षणायास्त्वनुपपत्तिप्रसारिताया इति पाठः।**न तु तद्गतमिति** । स्वविषयगतमित्यर्थः। **दोषानवकाश इति** । त्वदुक्तविकल्पप्रयुक्तदोषानवकाश इत्यर्थः ननु यष्टीः प्रवेशयेत्यादिवत्तात्पर्यानुपपत्तिरेव तद्बीजमस्त्वित्यत आह—**वयं त्विति** । पावनत्वं न लक्ष्यम् । किं तु तटत्वादिवल्लक्ष्यतावच्छेदकं वाच्यम् । न चैतत्संभवतीत्याह—**यदि विशिष्टत्वमिति** । सामानाधिकरण्यसंबंधेन गंगागतपावनत्वादिविशिष्टतटत्वमित्यर्थः । **संभवेदिति** । बाधेन प्रत्यक्षाद्यसंभवात् तदवच्छिन्ने शक्यसंबंधाग्रहादिति भावः । भ्रमात्मकोऽपि शाब्दबोधो वक्तुमशक्यः । बाधनिश्चयसत्त्वात् । वैयंजनिके तु बोधे बाधज्ञानं न प्रतिबंधकमिति तत्त्वम् । **सैवान्वयानुपपत्तिरिति** । वाहीको न गौरिति बाधज्ञानस्य विरोधिव्याप्यदर्शनविधया गवाभिन्नजडो वाहीक इति बोधेऽपि प्रतिबंधकत्वादिति भावः । किं च वाहीकत्वविशिष्टे गवाभेदप्रतीतेः सर्वसिद्धायास्तावताऽपि लक्षणयोपपादयितुमशक्यत्वमिति व्यंजनैवावश्यमास्थेयेति बोध्यम् । केचित्तु लक्षणावृत्तेः फलं लक्ष्यार्थबोध एव । न तु पावनत्वादिप्रतीतिर्नापि लक्षणाज्ञानस्य । किं तु लक्षणया तीरबोधस्यैव तत्फलमिति मूलेऽपि न दोष इत्याहुः । **लक्षिते** । लक्षणया बोधिते । **अतिरिक्तव्यापारेति** । शक्तिलक्षणयोः प्रागेव

प्रभा–ःदोषानवकाश उक्तविकल्पप्रयुक्तदोषाप्रसङ्गः । **प्रमाणान्तरेति** । ननु भ्रमात्मकात्पावनत्वादिप्रकारेण तटे प्रवाहसंबन्धज्ञानात्तेन रूपेण तटोपस्थित्या तत्प्रकारेण भ्रमात्मकशाब्दबोध उपपद्यत इति चेत्, सत्यम् । तथापि यत्र पावनत्वाद्यग्रहात्तटत्वेनैव प्रवाहसंबन्धग्रहस्तत्र लक्षणया भ्रमात्मकतादृशशाब्दबोधासंभवादनुभवसिद्धतादृशबोधार्थं व्यञ्जनाङ्गीकारस्यावश्यकत्वात् । बाधनिश्चयकाले भ्रमायोगाच्च । व्यञ्जनाजन्यबोधे तु न बाधो विरोधीति न काचिदनुपपत्तिः । सैव लक्षणामूलैव । तथा च निष्फला लक्षणेति भावः । **विशेषा इति** । तीरादिव्यावृत्ताः केवलं गङ्गागता इत्यर्थः । लक्षित इत्यधिकरणसप्तम्यङ्गीकारे लक्षणाजन्यबोधविषयत्वभ्रमः स्यादतः सतीति । एवं च शक्तिलक्षणाद्यजन्यप्रतीतिजनकः पदादिगतो व्यापारो व्यञ्जनेति लक्षणं बोध्यम् । सदृशत्वेऽपि भेदग्रहेऽन्यत्राभिधाया अप्रसक्तेस्त-

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः। तच्च व्यञ्जनध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यम् । एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् । अभिधामूलं त्वाह—

(सूत्र ३२) अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥ १४ ॥

The attributes viz. sanctity etc. which are apprehended in the TAṬA etc. are so apprehended by a process different from Expression, Purport and Indication.

And that (process), styled VYAÑJANA, DHVANANA, DYOTANA, has necessarily to be admitted. Thus has been stated Suggestion based on Indication; (now) the author states the one based on Expression:—

When the Expresssive Power of a word of senses more than one comes to be restricted due to Conjunction and other circumstances, the process that produces the apprehension of the sense *not expressed* is Suggestion (AÑJANA).

प्रदीपः-इति । अथ पावनत्वादिसामान्यवैशिष्ट्यमेव लक्ष्यतावच्छेदकमस्तु तस्य प्रतीतत्वादिति चेत्, तर्हि पावनत्वादिविशेषो न प्रतीयेतेति । किं वहुना, गौर्वाहीक इत्यत्र गवाभिन्नजडस्य लक्ष्यत्वे सैवान्वयानुपपत्तिः ।

उपसंहरति--**विशिष्टे इति** । एवं उक्तयुक्त्या । तटादौ लक्षिते सति पावनत्वादयो विशेषाः प्रतीतिविषयाः स्युः । ते च प्रसिद्धातिरिक्तव्यापारगम्या एव । स च व्यापारो व्यञ्जनध्वननादिशब्दवाच्योऽवश्यमेषितव्यः कथमन्यथा विशेषप्रतीतिरिति । एवं लक्षणामूलव्यञ्जकत्वमुक्तम् । अभिधामूलं त्वाह—**अनेकेति** ।

अनेकार्थस्य शब्दस्य वाचकत्वे संयोगाद्यैर्नियन्त्रिते सति अवाच्यार्थधीहेतुर्व्यापारोऽञ्जनम् । व्यञ्जनमित्यर्थः ।

उद्योतः-निरस्तत्वात् तात्पर्यस्य च संसर्गबोधमात्रजनकत्वादिति भावः । एवं च लक्ष्ये तीरादौ व्यंजनयोपस्थिताः शैत्यादयो भेदेनान्वयबोधविषयाः । व्यंग्यस्य भेदेनापि अन्वयादिति बोध्यम् । लाक्षणिकस्यैव व्यंजकत्वामिति भ्रमनिरासायाह-**एवमिति** । **मूलम्** । तदन्वयव्यतिरेकानुविधायि । **अभिधामूलमिति** । अस्यां च व्यंग्यार्थविशिष्टोपस्थितिः शंकास्पदमपि नेति भावः । **अनेकाभिधानशक्तिरिति** । गृहीतानेकार्थप्रतिपत्तिजनकानेकशक्तिमानित्यर्थः । गृहीतद्वितीयाभिधाविषय एव व्यंजनास्फुरणात् तत्र द्वितीयाभिधाग्रहोऽपि नियामकः । मुख्यार्थाबाधाच्च न लक्षणेति भावः । **तदभेदभ्रमेति** । तद्बीजं च सादृश्यमेव । नन्वेवं श्लेषवदभिधात एव द्वितीयार्थग्रहः स्यादत उक्तं **वाचकत्वे इति** । अवाच्यार्थस्तदाभिधया प्रतिपादयितुमशक्यः । **एकतरमात्रेति** । सत्यपि संबंधग्रहे संयोगादिज्ञानस्य तज्जनितप्रथमार्थतात्पर्यग्रहस्य वा प्रतिबंधकत्वान्न द्वितीयार्थस्मरणमिति भावः । वस्तुतोऽनेकार्थे शक्तिज्ञानजन्यतदर्थस्मृतौ संयोगादिज्ञानजन्यतदर्थतात्पर्यनिश्चयस्य हेतुत्वात्कार-

---

प्रभाः-न्नियन्त्रणायोगादाह--**तदभेदेति** । **एकतरमात्रेति** । अनेकार्थशक्तिज्ञानजन्यतदर्थस्मृतौ संयोगादिज्ञानं हेतुरिति भावः । द्वितीयार्थस्मृतौ संयोगादिज्ञानम्, तज्जन्यप्रथमार्थतात्पर्यज्ञानं वा प्रतिबन्धकमिति तु युक्तम् । आद्यपक्षे संयोगादिनियामकाभावे आराद्देवदत्तोऽस्तीत्यादौ दूरसमीपरूपार्थद्वयसंदेहानुपपत्तेः । कारणाभावेनैकतरस्याप्यनुपस्थितेरपि । श्लेषे तु 'येन ध्वस्तमनोभवेन' इत्यादौ द्वयोरपि प्रकृतयोरविरोधाद्बोध इति द्रष्टव्यम् । अथैकार्थबोधनेन

‘ संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥’ (भर्तृहरि ’s वाक्यपदीय)

If the sense of a word remains undefined, Conjunction, Disjunction, Association, Antagonism, Purpose, Context, Characteristic, the Proximity of another word, Power, Propriety, Place, Time, Gender, Accent etc. are circumstances that are responsible for calling to our mind a specific sense.

प्रदीपः–अनेकार्थोऽनेकाभिधानशक्तिः । अर्थभेदेन शब्दभेद इति नये तु अर्थान्तराभिधानशक्तशब्देन सदृशास्तदभेदभ्रमविषयो वा । वाचकत्वमभिधा । अवाच्यार्थस्तदाऽभिधाव्यापाराविषयः । नियन्त्रणं नियमनमेकतरमात्रस्मरणानुकूलत्वम् । यदाहुः–‘ शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ’ इति । ‘ एतेन नियमनमेतास्मिन्नेवार्थे वक्तुस्तात्पर्यमिति तात्पर्यग्रहः ’ इत्यवोधप्रलापः । संयोगाद्यैरित्याद्यपदसंग्राह्यं विप्रयोगादि । यदुक्तमभियुक्तैः––**संयोग इति ।**

उद्योतः–णाभावमात्रेण द्वितीयार्थस्मरणाभावः । नियंत्रणं च द्वितीयार्थस्मारकासमवधानमेव । न च संयोगादिनाऽभिधावत् व्यंजनमपि नियंत्र्यताम् । संयोगादिकमतिक्रम्य बोधकत्वेनैव तत्सिद्धेः । अन्यथा सुगंधिमांसभोजनप्रकरणे सुरभि मांसं भुंक्ते इत्यभिधाने गोमांसानुपस्थितौ विदग्धस्य जुगुप्सानापत्तेः । **अनवच्छेदः** । अनिश्चयः । स्मृतिरत्र ज्ञानमात्रम् । अत एव शब्दार्थसंदेहपराकरणद्वारा नियतार्थावसायहेतुत्वाद्विशेषस्मृतिहेतवो निर्णयहेतव इति पुंजराजादिभिर्व्याख्यातम् । **एतेनेति** । विशेषस्मृतिहेतव इत्यभियुक्तवाक्यविरोधेनेत्यर्थः । प्रथमार्थं प्रत्याय्य पदानां विरामेऽपि प्रथमार्थप्रतीतेरेव व्यापारत्वमाश्रित्य द्वितीयार्थधीरुपपाद्या । शब्दस्य पर्यायपरिवृत्त्यसहत्वाच्च शाब्दत्वं व्यंजनाया बोध्यम् । वस्तुतोऽनवच्छेदो नाम संबंधिज्ञानाद्युगपत्स्मृतानेकार्थमध्ये कतमोऽर्थस्तात्पर्यविषय इति तात्पर्यसंदेह एव । तात्पर्यज्ञानं च शाब्दबोध एव हेतुः, न स्मृतौ । अन्यथा किंविषयं तात्पर्यं गृह्येत । अर्थानुपस्थितेः । विशेषस्मृतिपदेन प्रकृतार्थतात्पर्यनिश्चय एवोच्यते । स्मृतिविषयत्वाच्च तत्र स्मृतिपदं गौणं इति चिंत्यमेतत् । न च नानार्थपदात्मकसंबंधिज्ञानात् आपाततः स्मृतेष्वर्थेषु तात्पर्यसंदेहे तात्पर्यग्राहकसंयोगादिज्ञाने तत्सहकृतात् पुनरनुसंहितात् पदात् प्रकृतार्थस्मृतिः सैव शाब्दोपयोगिनीति तत्तात्पर्यमिति वाच्यम् । गौरवात् । मानाभावाच्च । वाचकत्वे नियंत्रिते इत्यस्यायमर्थः––शब्दस्य वाचकत्वे इतरवाच्यार्थविषयकशाब्दबोधजनकत्वे नियंत्रिते एकतरार्थमात्रविषयकतया संकुचिते सति अवाच्यार्थस्य तदा शक्त्या शाब्दबोधविषयतया बोधयितुमशक्यस्य शाब्दबोधकृद् व्यंजनमिति । एवं च तदाऽस्मिन् वाच्यत्वं व्यंग्यत्वं चेति द्विविधोऽपि व्यवहार इति यदभिधालक्षणप्रस्तावे तदाऽस्य वाच्यत्वव्यवहारवारणाय यत्नः सोऽपि व्यर्थ एवेत्यलम् ।

प्रभाः–विरामात्कथं तस्य पदस्य व्यञ्जकत्वमपीति चेत्, न प्रथमार्थप्रतीतेर्व्यापारत्वात् । अतएव ‘अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः’ इत्यनुपदमेव वक्ष्यति । स्वव्याख्याने वक्ष्यमाणहारिकारिकासंमतिमाह––**यदाहुरिति** । अनवच्छेदे अनेकत्वे एतद्विरोधेन व्याख्यांतरं दूषयति-**एतेनेति**। ननु यत्र प्रकृतापेक्षयाप्रकृतार्थे प्रसिद्धिबाहुल्यं तत्र प्रकरणमुल्लङ्घ्य प्रसिद्धार्थस्यैव प्रथमं स्मृतेः प्रकृतशाब्दबोधनियमायावश्यं तात्पर्यनिश्चयस्य हेतुत्वमङ्गीकार्यमित्येकतरमात्रस्मृतिकल्पनं तदितरार्थस्मृतिप्रतिबन्धकल्पनं च व्यर्थमेवेति तात्पर्यनिर्णायकत्वमेव युक्तमिति कथमबोधप्रलाप इति चेत्, न । नहि सर्वत्रेतरार्थस्मृत्यभावनियमं वदामः । किंतु यत्र प्रसिद्धिबाहुल्यादेरभावस्तत्रोत्सर्गतः संयुक्ताद्यर्थोपस्थितिरेवेति सहृदय-

इत्युक्तदिशा

सशङ्खचक्रो हरिः अशङ्खचक्रो हरिरित्यच्युते। रामलक्ष्मणाविति दाशरथौ। रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः । स्थाणुं भज भवच्छिदे इति हरे। सर्वं

In the way mentioned in these stanzas:—

The word HARI is restricted to (the sense of) ACHYUTA (i. e. Viṣhṇu) in ' Hari with the conch and disc ' and in " Hari without the conch and the disc. " The words RĀMA and LAKṢMAṆA in RĀMALKṢMAṆAU are each restricted to the sense of the respective son of DAŚARATHA; the words RĀMA and ARJUNA in " Their fate was like that of RĀMA and ARJUNA " are restricted to the sense of BHĀRGAVA (i. e. PARAŚURĀMA) are KĀRTAVĪRYA; the word STHĀṆU in " Pray STHĀṆU for the cessation of the worldly existence " is restricted to the

प्रदीपः—तत्र संयोगः प्रसिद्धार्थस्य गुणविशेषरूपः संबन्धः । तेनाभिधानियमनम् । यथा ' सशङ्खचक्रो हरिः ' इत्यत्र शङ्खादिसंयोगेनानेकार्थस्य हरिशब्दस्याच्युतेऽभिधा नियम्यते । अन्यहरिपदार्थे तत्संयोगाभावात् । विप्रयोगस्तादृशसंबन्धध्वंसः । तेन यथा–' अशङ्खचक्रो हरिः ' इत्युच्यते । ध्वंसस्य प्रतियोगिपूर्वकत्वात् । साहचर्यं सहचरता । तेन यथा–'रामलक्ष्मणौ' इति रामपदस्य लक्ष्मणसाहचर्येण दाशरथौ। विरोधः सहानवस्थानम्, वध्यघातकभावश्च। तेन यथा–'छायातपौ' इति च्छायापदस्यातपाभावे। विरोधिनोः कयोश्चित्तत्त्वोपमायां 'रामार्जुनगतिस्तयोः' इत्यत्र रामार्जुनपदयोभार्गवकार्तवीर्ययोः। अर्थः प्रयोजनम् । तेन यथा–'स्थाणुं भज भवच्छिदे' इत्यत्र भवच्छेदरूपप्रयोजनवशात्स्थाणुशब्दस्य

उद्योतः—**अभियुक्तैः** । भर्तृहरिभिः । **प्रसिद्धार्थस्येति** । तदर्थमात्रवृत्तितया प्रसिद्ध इत्यर्थः । अत इंद्रादिभिः कदाचिच्चक्रधारणेऽपि न दोष इत्याहुः । **तत्संयोगाभावादिति** । तत्संयोगप्रसिध्यभावात् । **ध्वंसः** । संबंधध्वंसः । किं च सर्वोऽप्यभावप्रतीतिः प्रतियोगिसमानदेशैव । प्रतियोगिज्ञानमारोपितमनारोपितं वेत्यन्यत् । **सहचरतेति** । यत्र क्वचिदेकस्मिन्नर्थे प्रसिद्धपरस्परसापेक्षत्वमित्यर्थः । वस्तुतस्तु सहचरता सादृश्यम् । सदृशयोरेव प्रायेण सहचरणदर्शनात् । शब्दयोरपि सदृशार्थयोः सहप्रयोग इत्युत्सर्गाच्च । स्पष्टं चेदं भाष्यकैयटहेलाराजीयादिषु । अत एव एतत्कारिकाव्याख्याने पंचम्यपाङ्परिभिरिति (पा. सू. २-३-१०) साहचर्ये उदाहृतं हेलाराजादिभिः । तत्र वर्जनार्थापसाहचर्यात्तदर्थस्यैव परेः कर्मप्रवचनीयस्य ग्रहणमिति चोक्तम् । महाभाष्यकारोऽप्येवमेवावादीत् । कांतावपि शक्तत्वाच्छायापदं नानार्थम् । **कयोश्चिदिति** । एतेन द्वयोरपि नानार्थत्वात्परस्पराश्रयग्रस्तामिदमुदाहरणमित्यपास्तम् । प्रकरणसहकारेण रामार्जुनपदयोर्द्वयोरपि परस्परविरोधिद्वये युगपदेव तात्पर्यग्रहात् । असंकीर्णोदाहरणं तु रामरावणावितीत्याहुः । **प्रयोजनम्** । अनन्यसाध्यमित्यर्थः । **हरे**

प्रभाः—साक्षिकम् । नहि साहचर्यज्ञस्य रामलक्ष्मणावित्यतो राघवातिरिक्तोपस्थितिः, न वा भोजनप्रकरणे सैन्धवशब्दश्रवणाल्लवणातिरिक्ताश्वोपस्थितिर्झटिति जायते। अपि तु राघवादेरेव तथेत्यनुभवबलात्संयोगादेरितरार्थोपस्थितिप्रतिबन्धकत्वमिति प्राचामाशयात् । स्मृतिशब्दस्य तात्पर्यनिश्चयपरत्वेऽतिक्लिष्टतापत्तेः । अप्पय्यदीक्षितास्तु–' नानार्थस्थलेऽपि न सर्वत्र व्यञ्जनोल्लासः । किं तु चमत्कारिणि विषय एव। तत्र च यत्कारणं श्रोतृगतप्रतिभाविशेषाद्यङ्गीकार्यं तस्य नियन्त्रितशक्त्युल्लासकत्वमेवास्त्विति न क्वापि शक्तिविषये व्यञ्जनाङ्गीकारो युक्तः । किं त्वप्रकृतार्थप्रतीतिमूलक उपमादावेव ' इत्याहुः । इति कृतं पल्लवितेन । संयोगादीन्व्याचक्षणस्तदुदाहरणान्याह—**तत्रेत्यादिना** । प्रसिद्धार्थस्य तदर्थमात्रवृत्तितया प्रसिद्धस्यार्थस्य। न तु वस्तुतः शक्यान्तरव्यावृत्तस्य । इन्द्रादावपि हरिपदार्थे

जानाति देव इति युष्मदर्थे । कुपितो मकरध्वज इति कामे । देवस्य पुरारातेरिति शंभौ ।

---

sense of HARA; the word DEVA in "The DEVA knows everything" is restricted to the sense of "You"; the word MAKARADHVAJA in "The angry MAKARADHVAJA" is restricted to the sense of Cupid; the word DEVA in "of PURĀRATI, the DEVA" is restricted to the sense of S'AMBHU: the word MADHU in "The cuckoo intoxicated with

---

प्रदीपः-भवे । प्रकरणं वक्तृश्रोतृबुद्धिस्थता । तेन यथा-'सर्वं जानाति देवः' इत्यत्र देवशब्दस्य राजनि । यत्तु 'युष्मदर्थे' इति व्याख्या तस्या अपि प्रकृते राजादावित्यर्थः । किंः वा संबोध्ये राजादावित्यर्थः । संबोध्यस्यैव युष्मदर्थत्वात् ।

लिङ्गं संयोगातिरिक्तसंबन्धेन परपक्षव्यावृत्तौ धर्मः । तेन यथा-'कुपितो मकरध्वजः' इत्यत्र मकराकारध्वजसमुद्राभ्यां व्यावृत्तेन समवायसंबन्धवता कोपेन मकरध्वजशब्दस्य कामे यत्तु 'लिङ्गं चिह्नम्' इति, तन्न । कोपस्य कामचिह्नत्वाभावात् । असाधारणधर्मस्य चिह्नत्वात् । सशङ्खचक्र इत्यत्रातिव्याप्तिप्रसङ्गाच्च ।

शब्दस्यान्यस्य संनिधिर्नियतार्थकशब्दान्तरसामानाधिकरण्यम् । अतो 'भवच्छिदे' इत्यादावप्रसङ्गः । न च 'सशङ्खचक्रो हरिः' इत्यत्रातिव्याप्तिः । शङ्खचक्रसामानाधिकरण्याभावात् । यद्वा हरौ शङ्खचक्रे इति संयोगोदाहरणे तात्पर्यम् । तेन यथा--देवस्य त्रिपुरारातेः' इत्यत्र त्रिपुरारातिशब्दसामानाधिकरण्याद्देवशब्दस्य शंभुरूपेऽमरे । अन्यस्य देवशब्दार्थस्य राज्ञस्त्रिपुरारातित्वाभावात् । यत्तु 'देवतान्तरस्यातथाभावाच्छंभौ शक्तिनियमनम्' इति, तन्न युक्तम् । देवतान्तरे देवशब्दस्य शक्तिभेदाभावादुदाहरणासामञ्जस्यापत्तेः ।

उद्योतः-**इति** । शिवे इत्यर्थः । देवपदस्य राजत्वेन वृंदारकत्वेन च शक्तेर्नानार्थत्वम् । 'राजा भट्टारको देव' इत्यादिकोशात् । अत्र राजसंबोध्यकदूतकथारूपं प्रकरणम् । **नियतार्थकेति** । नियतत्वं च नानार्थपदीयैकार्थमात्रसंसर्ग्यर्थवाचकत्वम् । अतो न सशंखचक्र इत्यादावतिव्याप्तिः । हरिपदार्थेन्द्रेणापि कदाचित् शंखचक्रधारणादित्याहुः । अतः । सामानाधिकरण्यविवक्षातः । **शंखचक्रेति** । तद्वाचकसामानाधिकरण्याभावादित्यर्थः । 'निषधं पश्य भूभृत' मित्यत्रापि अनेनैवाभिधानियमनं द्रष्टव्यम् । त्रिपुरारातिपदं पुरारातिपदं च शंभौ योगरूढम् । **मादनासामर्थ्यादिति** । कोकिलमादनसमर्थत्वेनाप्रसिद्धत्वादित्यर्थः । **सांमुख्ये इति** । असंमुखीनदयितावदनस्य वैरस्याधायकत्वेन त्राणजनकत्वौचित्याभावादिति भावः । **न तूपायादाविति** । 'मुखं निःसरणे वक्त्रे प्रोरंभापाययोरपी'ति कोशादुपायेऽपि मुखशब्दवृत्तेरिति भावः । परमेश्वरपदस्य विष्णुत्वेनापि शक्तेर्नानार्थत्वं बोध्यम् । अत्र वदंति--यद्यपि नानार्थपदसमभिव्याहृतपदांतरार्थस्य प्रसिद्धः संबंधः साहचर्यम्, स चैकजन्यत्वदांपत्यजन्यजनकभावस्वामिभृत्यभावस्वस्वामिभावादिवत् चक्रादिसंयोगादिरपि ग्रहीतु-

---

प्रभा:-तत्संभवात् । **तत्संयोगाभावादिति** । प्रसिद्धशङ्खादिसंयोगाभावादित्यर्थः । यद्वा शङ्खचक्रसंयोगस्य वस्तुतः शक्यान्तरव्यावृत्तत्वमेवाभिमतम् । प्रसिद्धेति तु शब्दस्यैव सतः प्रसिद्धिरभिधानियन्त्रणोपयोगितयोक्तेति बोध्यम् । **संबन्धध्वंस इति** । एवं चाशङ्खचक्र इत्यत्र शङ्खचक्रपदं तत्संयोगपरम्, नञ्पदं च नाशपरम् । नाशस्य प्रतियोग्यधिकरणनियतत्वाद्धरावभिधानियामकत्वसंभवात् । अत्यन्ताभावस्तु सिंहादिसाधारण इति नोपात्त इति ज्ञेयम् । अच्युत इत्यनन्तरमभिधा नियम्यत इत्यनुषज्यते । एवमग्रेऽपि । तत्त्वोपमायां विरोधित्वेनोपमायां विवक्षितायामित्यर्थः । तथाच विरोध्यर्थतात्पर्यग्रहात्तथात्वेन पूर्वावगतयोरेवोपस्थितिरित्यर्थः । एतेन, 'अव्यवस्थितार्थत्वात्परात्पराश्रयदुष्टत्वं विरोधज्ञानस्य' इति दूषणमलग्नकं वेदितव्यम् । **संयोगातिरिक्तेति** । एतच्च शङ्खचक्रव्यावृत्त्यर्थम् । न च तत्रार्थान्तरव्यावृत्तत्वाभावान्नातिव्याप्तिरिति वाच्यम् । कोपस्यापि समुद्रेऽपि सत्त्वेन प्रसिद्धयैव कामलिङ्गताया आश्रयणीयत्वेन शङ्खचक्रयोरपि तत्प्रसक्तेरित्याशयात् । चक्रशङ्खादेरर्थान्तरव्यावृत्तत्वपक्षे तु न कश्चिद्दोष इति । ननु

मधुना मत्तःकोकिल इति वसन्ते। पातु वो दयितामुखमिति सांमुख्ये। भात्यत्र परमेश्वर-

MADHU " is restricted to the sense of Spring; the word MUKHA in " May the DAYITĀMUKHA protect you ", is restricted to the sense of " agreeableness "; the word PARAMEŚVARA in " Here shines the PARAMEŚVARA ", is restricted to the sense of the " king ",

प्रदीपः-सामर्थ्यं कारणत्वम्। तेन यथा—'मधुना मत्तः कोकिलः' इति। अत्र मधुशब्दस्य वसन्ते। अन्यस्य मधुशब्दार्थस्य कोकिलमादनासामर्थ्यात्।

औचिती अर्हता। तया यथा—'पातु वो दयितामुखम्' इति। अत्रोत्कण्ठितमनोरथसाधनौचित्येन मुख-शब्दस्य सांमुख्ये। न तूपायादौ। यद्यप्यत्रापि सामर्थ्यं संभवत्येव तथापि मधुनेत्यत्र तृतीयमेव तद्बोधाभावेऽप्यौ-चितीमात्रज्ञानादेव शक्तिनियमनमसंकीर्णमिति।

उद्योतः—मुचित इति सशंखचक्र इत्यादेरपि साहचर्योदाहरणतैव युक्ता, तथापि यत्र शब्दोपात्तं प्रसिद्धं संबंधसामान्यं शक्तिनियामकं तत्संयोगस्य, यत्र तु द्वन्द्वादिगतः संबंध्येव केवलस्तथा तत्साहचर्यस्ये-त्याशयान्न दोषः। एवं च सगांडीवोऽर्जुन इति संयोगस्य, गांडीवार्जुनाविति गांडीवमर्जुन इति च साहचर्यस्योदाहरणं बोध्यम्। रामरावणावित्यपि साहचर्यस्योदाहरणम्। भ्रातृत्वादिसंबंधवद्विरोध-संबंधस्यापि लोकप्रसिद्धत्वात्। एवं 'स्थाणुं भज भवच्छिदे' इति प्रयोजनोदाहरणे यद्यपि लिंगा-दविशेषः। न च लिंगमनन्यसाधारणस्तद्धर्मः प्रयोजनं तु भजनादेः कार्यं न तु तद्गतो धर्म इति भेद इति वाच्यम्। भवच्छेदजनकभजनकर्मत्वस्य काष्ठावृत्तिभवधर्मत्वात्। तथापि उक्तस्य विशि-ष्टधर्मस्य शाब्दबोधोत्तरभाविमानसबोधविषयत्वेन प्रकृतशाब्दबोधाविषयत्वाल्लिंगतो वैलक्षण्यमिति। एवं च नानार्थपदशक्यांतरावृत्तिरेकशक्यगतः साक्षाच्छब्दवेद्यो धर्मो लिंगमिति बोध्यम्। एवं शब्दस्यान्यस्य संनिधिः नानार्थपदैकार्थमात्रसंसर्ग्यर्थांतरवाचकपदसमभिव्याहार एव। न तु सामा-नाधिकरण्यनिवेशः। अत एव 'करेण राजते नागः' इत्यत्र वैयधिकरण्येऽपि करपदस्य नागपद-मादाय नागपदस्य च करपदमादाय शुंडायां गजे च शक्तिनियमनम्। अत्रैकशब्दशक्तिनियमना-याऽपरशब्दशक्तिनियमनस्य नापेक्षा। किं तु करनागशब्दयोरर्थांतरग्रहणेऽन्वयानुपपत्त्या युगपदेव शक्तिनियमनमतो नान्योन्याश्रयः। किं च 'कुपितो मकरध्वज' इति लिंगोदाहरणेऽतिव्याप्तिः। सामानाधिकरण्यघटितस्य त्रिपुरारातेरिति प्रकाशोदाहृते त्रिपुरासुरवैरित्वस्य लिंगतया लिंगोदाहर-णत्वमेवोचितम्। यदि तु यत्रैव पदार्थः कोपादिः पदार्थान्तरेणानन्वित एव यः प्रकृतशक्यधर्मतां शक्यांतरव्यावृत्ततां च भजते तत्र लिंगत्वमित्युच्यते। तर्ह्यस्तु यथाकथंचिदुदाहरणसामंजस्यम्। सामानाधिकरण्यनिवेशस्त्वयुक्त एवेति बोध्यम्। एवं च कारणतापरपर्यायसामर्थ्यमपि मधुना मत्तः कोकिल इत्यादौ उदाहृतम्। तत्र लिंगत्वं यद्यपि वक्तुं शक्यं कोकिलमादनसामर्थ्यस्य वसंतासाधा-रणतया लिंगत्वात्तथापि शाब्दत्वाशाब्दत्वाभ्यामेकानेकपदार्थत्वाभ्यां वा विशेषो बोध्यः। वस्तुतः संयोगादीनामर्थांतरसाधारणत्वे नानार्थशब्दस्यार्थविशेषे शक्तेः संकोच एव न संभवति। नियामकस्यासंकुचितत्वात्। अथ प्रसिद्धत्वादिना तेषामसाधारणताबुद्धिस्तर्हि प्रायो लिंगभेदा

प्रभाः—शक्यान्तरव्यावृत्तप्रसिद्धचैव चिह्नत्वमस्त्वित्यत आह—**सशङ्खेति**। तथा च तद्वारणाय संयोगातिरिक्तेति स्वोक्त-मेव सम्यगिति भावः। **अत इति**। सामानाधिकरण्योक्तेरित्यर्थः। **शङ्खचक्रेति**। शङ्खचक्रशब्दो हि नियतार्थकः। तेन तु भिन्नार्थत्वान्न सामानाधिकरण्यमित्यर्थः। एवमपि सशङ्खचक्रशब्दसामानाधिकरण्यमस्त्येवेत्यत आह—**यद्वेति**।

इति राजधानीरूपाद्देशाद्राजनि। चित्रभानुर्विभातीति दिने रवौ, रात्रौ वह्नौ। मित्रं भातीति सुहृदि, मित्रो भातीति रवौ। इंद्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरोऽर्थविशेषप्रतीतिकृत्।

owing to the place viz. the capital; the word CHITRABHĀNU in " There shines the CHITRABHĀNU " is restricted to the sense of ' the sun, ' in reference to day-time, while in reference to night-time, it is restricted to the sense of " Fire "; the word " MITRA " in " MITRAM BHATI " is restricted to the sense of " a friend "; while in MITRO BHATI it is restricted to the sense of " the sun ", Only in the Veda, in instances like INDRAŚATRU, and not in poetry does Accent occasion a specific comprehension (of sense).

प्रदीपः–देशेन यथा–‘ भात्यत्र परमेश्वरः ’ इति। अत्रात्रेति राजधानीरूपाद्देशात्परमेश्वरपदस्य राजनि।

कालेन यथा–‘ चित्रभानुर्विभाति ’ इति। अत्र चित्रभानुपदस्य दिवा दिवाकरे, रजन्यामाशुशुक्षणौ। व्यक्तिर्लिङ्गं पुंस्त्वादि। तया यथा–‘ मित्रं भाति ’ इति। अत्र नपुंसकरूपाल्लिङ्गान्मित्रपदस्य सुहृदि। ‘ मित्रो भाति ’ इत्यत्र पुंल्लिङ्गात्सूर्ये।

स्वरस्तूदात्तादिर्वेदे बाहुल्येन। तेनार्थप्रतीतिर्दृश्यते। यथा–‘ इन्द्रशत्रुर्वर्धस्व ’ इति। अत्रेन्द्रशत्रुः इत्यस्यान्तोदात्तत्वे षष्ठीतत्पुरुषव्यक्त्याविन्द्रस्य शातनकर्मत्वं लभ्यते। पूर्वपदान्तोदात्तत्वे च इन्द्रः शातयिता यस्येति बहुव्रीहिलाभादिन्द्रस्य शातनकर्तृत्वं लभ्यते। काव्ये तु नैवं बाहुल्यम्। ननु ‘दृष्टे प्रसीद’ इत्यादौ स्मरेण संबोधनं प्रकाश्यते। तेन चार्थविशेषेऽभिधा नियम्यते न तु साक्षात्स्वरेणैव। काकुस्थले तु न नानार्थाभिधानियमनं किं त्वपदार्थस्यैव व्यञ्जनम्। यद्वा स्वरशब्देनोदात्तादित्रयं विवक्षितम्। अतः काव्ये स्वरस्याभिधानियामकत्वं नास्त्येवेति व्यर्थं बाहुल्येनेति विशेषणमिति। मैवम्। ‘ सुधाकरसुहृद्वक्रं दृष्टिः पङ्कजवैरिणी ’ इत्यादाविन्द्रशत्रुरिति न्यायेनाभिधानियमनस्य काव्येपि दुर्वारत्वात्।

उद्योतः–एवैते न तु सर्वथैव ततः स्वतंत्रा इति बोध्यम्। यदप्युक्तं संयोगाद्यैरभिधानियमने ‘सुरभि मांसं भुंक्ते’ इत्यादौ शालकादिप्रयुक्ते द्वितीयार्थबोधो व्यंजनयेति। तदसंगतम्। यतो नियंत्रणं नामापरार्थस्य प्रथमतः शाब्दबोधजननं तदनंतरमपरस्यापि शक्त्यैव। न च द्वयोर्बोधे तात्पर्यज्ञानस्य कुत्रोपयोगः। अत्रार्थेऽयं शब्दः प्रमाणं अयमर्थः प्रमाणवेद्य इति निर्णयद्वारा प्रवृत्तौ तदुपयोगो न तु बोधे इति गृहाण। अत एवास्मादर्थबोधद्वयं जायते वक्तुः परं क्व तात्पर्यमिति न विद्म इत्यनुभवः। एवं च द्वितीयार्थबोधाय व्यंजना नावश्यकी। यत्र तु द्वितीयार्थस्य नैव बोधस्तत्र तदीयशक्त्यंशेऽनुद्बुद्धसंस्कारत्वान्न दोषः। किं च व्यंजनावादिनाऽपि सर्वस्य द्वितीयार्थबोधवारणाय वक्तृबोद्धव्यादिवैशिष्ट्यप्रतिभादीनामवश्यं व्यंग्यप्रतिभाहेतुत्वमंगीकार्यम्। अस्माभिश्च तेषां द्वितीयार्थशक्त्युद्बोधकत्वमंगीकार्यमिति न दोषः। यदि तु योगरूढिस्थले रूढिज्ञाने योगापहारित्वस्य सर्वतंत्रसिद्धतया रूढ्यनधिकरणयोगार्थालिंगितार्थांतरस्य प्रतीतिर्विना व्यक्तिं दुरुपपादा। यथा “ अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम्। तिष्ठंति चपला यत्र स कालः समुपस्थितः ”

प्रभाः–तेन शब्दान्तरसंबन्धिना। **उपायादाविति**। तस्यापि मुखपदवाच्यत्वात्। ‘मुखं निःसारणे वक्त्रे प्रारम्भोपाययोरपि’ इति कोषात्। ननु सीतारामावित्यत्र दांपत्यसंबन्धस्य, रामदशरथावित्यत्र जन्यजनकभावस्य, रामहनूमन्तावित्यत्र स्वामिभृत्यभावस्य रामायोध्ये इत्यत्र स्वस्वामिभावस्य चाभिधानियामकत्वात्कथमुक्तानामेव तदुक्तमत आह–

आदिग्रहणात्

'एद्दहमेत्तत्थणिआ एद्दहमेत्तोहिं अच्छिवत्तेहिं।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअएहिं॥ ॥ (?)

इत्यादावभिनयादयः।

The word ĀDI in the Kārikā includes (among such circumstances) Gestures etc. as illustrated in

Only after days numbering *so few* her breasts have been reduced to only *this proportion*; she is to be marked out by her petal-like eyes only of *this size*; and her figure has been reduced *to this extent.*

प्रदीपः–स्वरादय इत्यादिग्रहणादभिनयापदेशौ गृह्येते। अन्ये चोक्तान्तर्भूताः। अभिनयश्च साक्षादिवार्थोकारादिप्रदर्शिका हस्तादिक्रिया। तया तथा–**एद्दहेति**।

अत्र विकसितमुकुलिताभिनयविशेषसाहित्येन स्तनस्य पीनत्वमुकुलितत्वाद्यर्थविशेषेऽभिधा नियम्यते। एवं शेषपादत्रयेऽपि।

अपदेशोऽभिमतनिर्देशः। तेन यथा—

'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्॥'

उद्योतः–इत्यादौ अशक्तानां द्रव्यमपहृत्य जलवाहकैः सह पुंश्चल्योऽभिरमंते इत्यर्थांतरं नैतैः शब्दैर्योगरूढ्या बोधयितुं शक्यते। मेघत्वविद्युत्वाद्यघटितस्यैव प्रतीतेः। अन्यथा चमत्कारो न स्यात्। अत एव न योगशक्त्याऽपि केवलरूढ्यर्थासंवलितार्थबोधकत्वस्य तस्या रूढिसमानाधिकरणाया असंगतेः पुंश्चलीत्वादेः सर्वथैव तदविषयत्वाच्चेति तत्र व्यंजनाऽऽवश्यकीत्युच्यते। तर्ह्यस्तु तत्र तथा। न तु सर्वत्र। 'भद्रात्मन' इत्यादेर्ध्वनित्वं तु उपमानोपमेयभावं व्यंग्यमादायैवेति वदंति। अर्थप्रतीतिरिति। बाहुलकात्करणे क्तिन्। प्रतीतिकृदिति वा पाठः। **षष्ठीतत्पुरुषेति**। इंद्रस्य शत्रुरिति शातयितेत्यर्थकः। **नैवमिति**। काव्ये उदात्तादिस्वरकृतार्थभेदे समासविषये श्लेषभंग एव स्यादिति भावः। लोके ऐकश्रुत्येनैव प्रायः प्रयोगाच्चेत्यपि बोध्यम्। **सुधाकरसुहृदिति**। अंतोदात्तत्वे षष्ठीसमासेनोपमा। अन्यथा बहुव्रीहौ प्रतीपमिति भावः। वस्तुत इदं चिंत्यमेव। अभियुक्तैः क्वापि तथाऽकथनात्। अत एव प्रकाशे इंद्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरोऽर्थविशेषप्रतीतिकृदित्येव बहुषु पुस्तकेषु पाठः। बाहुल्येनेति पाठेऽपि वेदे एव बाहुल्येन सोऽर्थप्रतीतिविशेषकृत् न तु लोके क्वचिदपीति व्याख्येयमिति दिक्। **एद्दहेति**। चिरप्रवासिनि नायके नायिकावस्थां बोधयंत्याः कस्याश्चिदुक्तिरियम्। 'एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्। एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः।' परिमाणे दहप्रत्ययः। अक्षिपत्राभ्यामित्युपलक्षणे तृतीया। दिवसैरिति करणे। (गाथा छन्दः।) **विशेषेऽभिधेति**। बुद्धिस्थतत्तदर्थशक्ततया नानार्थानामेतावन्मात्रादिशब्दानां शक्तिः स्तनादिगतपरिमाणविशेषरूपेऽर्थे नियम्यते इत्यर्थः। आभिनयोऽत्र स्तनप्रदर्शने मुकुलाकारः, अक्षिप्रदर्शने

प्रभाः–**अन्ये चेति**। उक्तसाहचर्य एवान्तर्भूता इत्यर्थः। साहचर्यं हि परस्परसंबन्धित्वम्। तत्सर्वत्राविशिष्टम्। न चैवं सशङ्खचक्र इत्यत्रापि तदापत्तिः। शङ्खचक्रसंयोगेनैव शब्दोपात्तेन तत्राभिधानियमनात्। धार्यधारकभावस्या-

इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनम् तत्र नाभिधा। नियमनात्तस्याः। न लक्षणा। मुख्यार्थबाधाद्यभावात्। अपि त्वञ्जनं व्यञ्जनमेव व्यापारः। यथा—

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य।

When thus, in certain cases, though the power of a word to express another sense is arrested by circumstances like Conjunction, the word still conveys another sense, it does so not by Expression, owing to the arrestment of the latter; nor is it by Indication, owing to the circumstances like the Incongruity of the Primary sense being absent; but the process is AÑJANA the same as VYAÑJANA (Suggestion).

For instance, Of whom—of benign soul (by Paronomasia, of the Bhadra species), possessing body that was invincible (by paronomasia, hard to mount upon), whose loftiness was established in a mighty race (by paronomasia, the height of whose spine was considerable), who had secured mastery (SAṂGRAHA) in (the science of) arrows, (by

प्रदीपः—अत्रापदेशेनेदं शब्दस्याभिधा वक्तरि नियम्यते।

इत्थं संयोगादिनार्थान्तराभिधायकत्वे निवारितेऽपि यदनेकार्थशब्देन क्वचिदर्थान्तरस्य प्रतिपादनं तत्र नाभिधा शब्दस्य व्यापारः। नियमनात्तस्याः। नापि लक्षणा। मुख्यार्थबाधादिविरहात्। किं त्वञ्जनं व्यञ्जनमेव व्यापारः। यथा—**भद्रेति**।

उद्योतः—पद्मपलाशाद्याकारः, अवस्थाप्रदर्शने उच्चताप्रदर्शकः, दिवसप्रदर्शनेऽङ्गुल्यग्रधारणादिः। **अभिमतानिर्देश इति**। स च हृदये हस्तनिक्षेपः। अर्थाकारप्रदर्शकत्वाभावान्नायमनियम। **इतः स दैत्य इति**। (कुमारसंभवे द्वितीयसर्गे पद्यमिदम्।) स्पष्टम्। अपदेशेन हि अत्र इतःशब्दद्वयस्यैकात्मपरता लभ्यते। **निवारितेऽपीति**। अर्थांतरं निवार्य प्रकृतार्थबोधनेऽपीत्यर्थः। **क्वचित्**। वक्तृवैशिष्ट्यादिसाहाय्यवतीत्यर्थः। **भद्रेति**। अत्र यच्छब्दः प्राकरणिकराजपरः। तत्पक्षे यस्य प्रकृतस्य राज्ञः करः पाणिर्निरंतरं दानार्थं गृहीतांबुसेकशोभनोऽभूत्। भद्रात्मनः। कल्याणरूपस्य। दुरिति। अनभिभवनीयं शरीरं यस्य। वंशः कुलं तत्रोन्नतिराधिक्यं यस्य। शिलीमुखाः नाराचाः। संग्रहोऽभ्यासदार्ढ्यम्। अनुपप्लुतेति। अबाधितज्ञानस्येत्यर्थः। अवारितगतेर्वा। अदुष्टहितकर्तुर्वा। परेति। शत्रुनिवारकस्य। गजपक्षे भद्रजातीयस्य अत्युच्चत्वात् दुःखाधिरोह्यशरीरस्य। विशाला वंशस्य पृष्ठदंडस्योन्नतिर्यस्य। कृतभ्रमरसंग्रहस्य। अनुद्धतधीरगमनस्य। परस्योत्कृष्टस्य वारणस्य गजस्य करः शुंडादंडः मदजलसेकसुभगोऽभूदिति। राजा वाच्यः। हस्ती प्रतीयमानः। (वसंततिलका छन्दः।) **अत्र प्रकरणेनेति**। न चात्र विदन्मानसेतिवत् एकशब्दोपस्थितार्थद्यस्यांतरंगत्वात्परस्परमभेदान्वयपूर्वकमेव वाक्यार्थबोध इति श्लिष्टरूपकमेवेदमिति वाच्यम्। भेदानवबोधात्। तथाहि, यत्र द्वयो-

प्रभाः—तथात्वेन विलम्बितत्वात्तत्र साहचर्यस्य सत्त्वेऽप्यनुपन्यासात्। तर्हि विरोधोऽपि साहचर्येणैव गतार्थ इति तस्य पृथक्कथनमयुक्तमिति चेत्, सत्यम्। गोबलीवर्दन्यायेन पृथक्कथनं तदिति ज्ञेयम्। एवमन्यत्राप्यूह्यम्। **नन्विति**। 'भक्तिप्रह्वविलोकनप्रणयिनी—' इत्यादिः। सभङ्गश्लेषः। शब्दश्लेषः। जतुकाष्ठन्यायेन शब्दयोः श्लेषसंश्लेषणात्।

यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥ १२ ॥ (?)

(सूत्र ३३) तद्युक्तो व्यञ्जकः शब्दः

तद्युक्तो व्यञ्जनयुक्तः ।

---

paronomasia, who had attracted a swarm of bees towards himself), whose course (of action or knowledge) remained unthwarted (by paronomasia, whose gait was unperturbed), who resisted the enemies (by paronomasia, the supreme elephant),--the hand (by paronomasia, the trunk) was always graceful owing to the moistening of the gift-water (by paronomasia, of the ichor-fluid). (12)

Suggestive Word is what possesses that (i. e. power of Suggestion).

TADYUKTAH i. e. possessed of suggestion.

प्रदीपः-अत्र प्रकरणेन भद्रात्मन इत्यादिपदानां राज्ञि तदन्वययोग्ये चार्थे अभिधानियंत्रणेऽपि गजस्य तदन्वययोग्यस्य चार्थस्य व्यंजनयैव प्रतीतिः ।

ननूपमानोपमेयभावकल्पनाच्छब्दश्लेषतो भेदेऽपि 'योसकृत्परगोत्राणां-इत्याद्यर्थश्लेषतः कुतोऽस्य भेदः । अर्थश्लेषे चोभयत्र शक्तिरेव न व्यञ्जनेति चेत्, उच्यते । यत्रोभयोरर्थयोस्तात्पर्यं स श्लेषः । यत्र त्वेकस्मिन्नेव तत्, सामग्रीमहिम्ना तु द्वितीयार्थप्रतीतिः, सा व्यञ्जनेति ।

एवं व्यञ्जनां निरूप्य तया शब्दं लक्षयति--**तद्युक्त इति** ।

उद्योतः-रर्थयोःपरस्परान्वयबोधं विना इतरान्वयानुपपात्तिर्विशेष्यमश्लिष्टं च तत्रैव श्लिष्टरूपकांगी-
कारात्।यथा विद्वन्मानसेत्यत्र । प्रकृते तु न तथा। किं च प्रकरणेन विशेष्यपदात् प्रकृतार्थस्य तत
एव विशेषणपदैरपि तदन्वययोग्यार्थस्यैवोपस्थितौ आकांक्षायाः सत्त्वेन वाक्यार्थबोधे प्रतिबंधका-
भावेन द्वितीयार्थोपस्थितिप्रतीक्षाया अयुक्तत्वात् । अत एव श्लिष्टपरंपरितमेव रूपकभेदेषु गणितं
न तु केवलं श्लिष्टमपि । यत्र तु न विशेष्ये श्लेषः नापि द्वितीयार्थोपस्थितिं विनाऽन्वयानुपपात्तिः,
तत्र प्रस्तुतान्वयबोधोत्तरं विशेषणश्लेषमात्रमाहात्म्येन अप्रस्तुतवृत्तांते उपस्थिते व्यंजनया तदभिन्न-
प्रस्तुतवृत्तांतारोपः प्रकृते तत्र समासोक्तिः । न चैषापि रीतिः प्रकृते । द्वयोः प्रस्तुतत्वाभावाच्च न
श्लेषालंकारः । अतिशयोक्तेस्तु श्लिष्टे उक्तिसंभव एव नेति भावः । **गजस्येति** । अस्य तात्पर्य-
विषयस्यापि तद्ग्राहकप्रकरणाद्यभावात् व्यंग्यबोधविषयत्वमेवेति बोध्यम् । **उपमानोपमेयभाव-
कल्पनादिति** । प्रकृते भद्रात्मन इत्यत्रोक्तविशेषणविशिष्टहस्तिप्रतीतौ द्वयोरर्थयोर्मिथोऽसंबद्धत्वे
वाक्यभेदापत्तेरुपमकृतास्वादानुभवाच्च तेन सह राज्ञ उपमाया अपि प्रतीतिरित्यर्थः । **शब्दश्लेषत
इति** । सर्वदो माधव इति सभंगश्लेषत इत्यर्थः । तत्र हि द्वयोरपि प्रकृतत्वान्नोपमाकल्पना । **अर्थ-
श्लेषत इति** । अभंगश्लेषोऽर्थश्लेष इति सर्वस्वकारादिमतेनेदम् । असकृत्परगोत्राणामित्यादौ देवेंद्र-

---

प्रभाः-तत्र द्वयोरपि प्राधान्यविवक्षणान्नोपमानोपमेयभावकल्पनम् । इह तु प्रकृतार्थे तात्पर्यावगतेस्तदसंबद्धार्थबोधनायो-
गादुपमानत्वेन तस्य प्रकृतार्थविशेषणत्वमित्युपमानोपमेयत्वकल्पनमिति भेदः । 'योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः ।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते ॥' इत्याद्यभङ्गश्लेषस्त्वेकवृन्तगतफलद्वयन्यायेनार्थश्लेषः । तत्रेन्द्रनृपयोरुपमानो-

अर्थेन अर्थेन युक्तः

(सूत्र ३४) यत्सोऽर्थान्तरयुक् तथा ।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥ २० ॥

तथेति व्यञ्जकः ।

इति श्रीकाव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः ।

Since it (i. e. the Word) is possessed of a second sense it is so (suggestive).

Even the sense is regarded as suggestive there (i. e. in Poetry) owing to its being auxiliary thereto (i. e. to the Word).

TATHĀ i. e. Suggestive.

Thus ends the Second Flash named the Determination of the Nature of Word and Sense.

प्रदीपः–अञ्जनमिति प्रस्तुतेऽप्यर्थगत्या तच्छब्देन व्यञ्जनं परामृश्यते । तेन व्यञ्जनयुक्तो व्यञ्जक इति संपद्यते । अन्यथाऽञ्जनयुक्तोऽञ्जक इति स्यात् । तदेतदुक्तं 'व्यञ्जनयुक्तः' ।

ननूक्तस्थलेष्वर्थस्याव्यञ्जकत्वे कथं शब्दार्थयुगलरूपस्य काव्यस्य ध्वनित्वं स्यादित्यत आह–**यत्स इति** ।

सइति शब्दः । तथेति व्यञ्जक इत्यर्थः ।

इति श्रीमहामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे काव्यशरीरभूतशब्दार्थविभागो द्वितीय उल्लासः ।

उद्योतः–राज्ञोरुपमाप्रतीतिरपि सर्वसिद्धेति ततोऽस्य भेदाभावात् । तत्र शक्तावत्रापि सैव स्यादिति भावः । **तात्पर्यमिति** । युगपत् तद्ग्राहकप्रकरणाद्यवतार इत्यर्थः । **स श्लेष इति** । स श्लेषविषय इत्यर्थः । **एकस्मिन्नेव तत्** । तात्पर्यग्राहकं प्रकरणादि । यत्र तु क्रमेणोभयतात्पर्यग्राहकप्रमाणावगमः तत्रावृत्तिरिति बोध्यम् । **सा व्यंजनेति** । सा तज्जन्येत्यर्थः । 'तद्युक्तं तद्युक्तो व्यञ्जनयुक्तः' इति पाठः । **अर्थांतरयुगिति** । स्वशक्यप्रकृतार्थबोधानंतरमेव व्यंग्यार्थबोधात् तस्य सहकारित्वमिति भावः । शब्दस्य परिवृत्त्यसहत्वाच्च शब्दमूलकत्वेन व्यपदेशः ।

इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते काव्यप्रदीपे द्वितीय उल्लासः ।

प्रभाः–पमेयभावकल्पनसाम्यात् । श्लेषे च व्यञ्जनानङ्गीकाराद्व्यञ्जनोदाहरणत्वमयुक्तमित्यर्थः । **यत्रोभयोरिति** । अन्यतरत्राभिधानियामकाभावात्, उभयत्र तत्सद्भावाद्वा यत्रोभयतात्पर्यं स श्लेषस्य विषयः, न व्यञ्जनायाः । यत्र त्वभिधानियामकमेकत्रार्थे तत्रापरार्थप्रतीतिर्व्यञ्जनयैवेति तत्राभिधामूलध्वनेर्विषय इत्यर्थः ॥

इति श्रीमत्तत्सदुपाध्यरामचन्द्रभट्टसूरिवरात्मजतत्सद्वैद्यनाथभट्टविरचितायां, काव्यप्रदीपटीकायां प्रभाख्यायां काव्यशरीरभूतशब्दार्थविभागो नाम द्वितीय उल्लासः ॥

तृतीय उल्लासः ।

(21)

आर्थीव्यञ्जना.

(सूत्र ३९) अर्थाः प्रोक्ताः पुरा तेषाम् ।

अर्था वाच्यलक्ष्यव्यङ्ग्याः । तेषां वाचकलाक्षणिकव्यञ्जकानाम् ।

(सूत्र ३६) अर्थव्यञ्जकतोच्यते ।

कीदृशीत्याह—

(सूत्र ३७) वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः ॥ २१ ॥

Of them (i. e. of words) the senses have been already mentioned.

ARTHAH viz. Expressed, Indicated and Suggested. TEṢĀM i. e. of Expressive, Indicative and Suggestive Words.

(Now) is being stated the Suggestiveness of Sense. What is its character ? the author states it as follows:—

The operation of the Sense (Expressed, Indicated or Suggested) which is responsible for (awakening) a consciousness, on the part of those endowed with poetic taste, of a different sense, owing to the peculiar nature of the person addressing, the person addressed, the stress, the sen-

---

प्रदीपः–एवं शब्दे निरूपित उपोद्घातेन शब्दव्यञ्जनायां निरूपितायां प्रसङ्गेनार्थव्यञ्जना निरूपणीया । तत्रैतदा-
शङ्क्येत––शब्दे निरूपितेऽवसरोऽयमर्थनिरूपणस्य । किं चार्थे धर्मिणि निरूपिते तद्धर्मो व्यञ्जनाऽपि सुनिरूपा
भवति । तत्कुतस्तदनादृत्य व्यञ्जनानिरूपणमिति । तदेनां शङ्कामपनिनीषन्नुक्तं स्मारयति । **अर्थाः** । अर्था वाच्यलक्ष्य-
व्यङ्ग्याः । अर्थस्य संनिकृष्टतरत्वेऽपि तेषामित्यनेन योग्यतया वाचकादयः शब्दाः परामृश्यन्ते ।
शिष्यावधानाय प्रतिजानीते––**अर्थ०** । ननु सर्वेषामित्यादिना पूर्वमर्थानां व्यञ्जकता प्रोक्तैव । तदन्या कीदृशी
सेत्याकाङ्क्षायामाह–**वक्तृ०** ।

उद्योतः–प्रकृतघटकत्वं प्रकृतज्ञापकत्वं वोपोद्घातः । प्रकृते च व्यञ्जकशब्दघटकत्वं तस्यास्त-ज्ज्ञापकत्वं च तन्निरूपणस्येति बोध्यम् । स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः । **तदन्येति** । पूर्वान्वयि । तदन्या शब्दव्यञ्जकताऽन्याऽर्थव्यञ्जकता प्रोक्तैव सा कीदृशीत्यन्वयः । कीदृशी । किंस्वरूपा । अस्यास्तु किमित्यर्थः । वक्ता । कविस्तन्नि-नियन्त्रितार्थधीजनकत्वं शब्दव्यञ्जनायाः स्वरूपम् । अस्यास्तु किमित्यर्थः । **अन्यसंनिधिः** । बद्धश्च । **ध्वनेर्विकार** इति । उच्चारयितुः शोकाद्यनुमापको जातिविशेष इत्यर्थः । वैशिष्ट्यादिति पञ्चम्यर्थः सह-अन्यो वक्तृबोद्धव्यभिन्नः । देशो विजनादिः । कालो वसन्तादिः । तत्रापि वक्त्रादेरन्ततः प्रस्तावाभिन-कारित्वरूपं हेतुत्वम् । तच्च तदभावे व्यञ्जानानुदयाद्बोध्यम् ।

प्रभाः–**उपोद्घातेनेति** । प्रकृतस्य व्यञ्जकशब्दनिरूपणस्य सिद्ध्यर्थतयेत्यर्थः । तं अर्थम् । **कीदृशीति** । तथा च वक्त्रादिवैशिष्ट्यहेतुकत्वप्रकारेणार्थव्यञ्जकतोच्यत इति । प्रतिज्ञार्थ इत्यर्थः । **अतीति** । 'अतिपृथुलं जलकुम्भं

प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ॥
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥ २२ ॥

बोद्धव्यः प्रतिपाद्यः । काकुर्ध्वनेर्विकारः । प्रस्तावः प्रकरणम् । अर्थस्य वाच्यलक्ष्यव्यङ्ग्यात्मनः । क्रमेणोदाहरणानि—

अइपिहुलं जलकुम्भं घेत्तूण समागदह्मि सहि तुरिअम् ।
समसेअसलिलणीसासणीसहा वीसमामि खणम् ॥१३॥ (गाथासप्तशती)

अत्र चौर्य्यरतगोपनं गम्यते ।

---

tence, the Expressed sense, the presence of a third (ANYA) party, the matter on hand, the place, the time and other circumstances, is but Suggestion.

BODDHAVYAH i. e. the person addressed. KĀKU is a modification of the voice. PRASTĀVA is the matter on hand. ARTHASYA i. e. of Sense Expressed, Indicated and Suggested.

The instances follow in order:—

Carrying a very big water-jar have I come back, O friend, in hurry. Helpless (NIS-SAHĀ) with the flow of perspiration and gasps due to fatigue, let me take rest for a moment ! (13)

Here is suggested the concealment of a surreptitious dalliance.

प्रदीपः–वोद्धव्यः प्रतिपादनीयो जनः । अन्तर्भावितण्यर्थत्वात् । अतो न वाच्येनाभेदः । काकुः शोकभीत्यादिभिर्ध्वनिविकारः । वाक्यवाच्याभ्यां सहितोऽन्यसंनिधिर्वाक्यवाच्यान्यसंनिधिः । अतो न द्वंद्व एकवद्भावे नपुंसकत्वप्रसङ्गः । प्रस्तावः प्रकरणम् । वैशिष्ट्यं वैलक्षण्यम् । तच्च वक्त्रादिषु प्रत्येकमभिसंबध्यते । अन्योऽर्थो वाच्यलक्ष्यव्यतिरिक्तः । व्यक्तिर्व्यञ्जना । करणव्युत्पत्तेः । अर्थस्य त्रिविधस्यापि । न तु कस्यचिदेव । प्रतिभाजुषामित्यनेन नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा । या वासनेत्युच्यते । तस्यां सत्यामेव वक्तृवैशिष्ट्यादिसत्त्वेऽपि व्यङ्ग्यप्रतीतिरिति प्रतिपादितम् । अत एव वैयाकरणादीनां न तथा रसप्रतीतिः । तथा चोक्तम्—

सवासनानां नाट्यादौ रसस्यानुभवो भवेत् ।
निर्वासनास्तु रङ्गान्तर्वेश्मकुड्याश्मसंनिभाः ॥ इति ॥

उद्योतः–यादेश्च वैशिष्ट्येनान्यार्थधीहेतुत्वसत्त्वात् । एवकारेण लक्षणादीनां निरासः । संकेताद्यभावादिति बोध्यम् । एवं च वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वमस्याः स्वरूपमिति बोध्यम् । अर्थस्येत्यनेन शब्दव्यञ्जनानिरासः । जलाहरणवर्त्मनि नदीगहन उपनायकोपभुक्ताया धर्मजलनिःश्वासाद्युपभोगचिह्नेनोपभोगं संभावयन्तीं सखीं संबोध्य काचिदाह अइ इति ।

अतिविपुलं जलकुम्भं गृहीत्वा समागताऽस्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ॥

प्रभाः-गृहीत्वा समागतास्मि सखि त्वरितम् । श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ॥' श्रमाद्यौ [स्वेद] सलिलनिःश्वासौ ताभ्यां निःसहा निर्बला । **ओण्णिद्दमिति** । 'औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् । मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवति ॥' 'भागो रूपार्धके प्रोक्तो भागधेयैकदेशयोः' इति विश्वः ।

ओण्णिद्दं दोब्बल्लं चिन्ता अलसत्तणं सणीससिअम् ।
मह मन्दभाइणीए केरं सहि तुहवि अहह परिहवइ ॥ १४ ॥ (?)

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्याऽऽवासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥ १५ ॥ (वेणीसंहार १-११)

Sleeplessness, feebleness, (and) an anxious languor with sighs is, alas, pestering you too, oh friend, on account of me of poor luck ! (14)

Here is suggested enjoyment, on the part of the go-between, with her (i. e. of the NAYIKA) lover.

Having witnessed, in the royal assembly, the PAÑCHALA princess reduced to that plight,-the long sojourn in the forest, of us clad in bark-garments, in the company of huntsmen,-and our stay under the roof of VIRAT *camouflaged* with unseemly occupations,-the venerable (brother) bears malice (KHEDA) against me who am down-cast, *not* against the KURUS as yet ! (15)

प्रदीपः-यथाक्रममुदाहरणानि—**अइपिहु०**। अत्र वक्त्री कामिनी । तस्या दुःशीलत्वरूपवैशिष्ट्यं विजानतां चौर्यरतगोपनं व्यक्तीभवति। **ओण्णिद्दं०**। अत्र दूती प्रतिपाद्या। तस्या अन्यदाऽपि दृष्टदुष्टचेष्टया वैशिष्ट्येन तस्याः कामुकोपभोगो व्यज्यते । अत्रान्यदीयमुन्निद्रतादिकमन्यत्र बाधितमिति तत्सदृशमुन्निद्रतादिकं लक्ष्यत इति केचित् । तदबोधात् । सख्यास्तदीयोन्निद्रतान्वयस्यावाक्यार्थत्वात् । **तथाभूतां०** । खेदो मात्सर्यम् । अत्र खेदं मयि भजति नाद्यापि

उद्योतः-पिहुलमिति पाठे पृथुलमित्यर्थः । सखीत्यप्रतार्यताध्वननम् । जलकुम्भं जलपूर्णकुम्भम् । तेन दुर्वहत्वम् । गृहीत्वा समागता । तदपि त्वरितं न शनैः । तेन मध्ये विश्रमाद्यभावः । अस्मि अहमतिशयितसुकुमारतनुः । आभ्यां खेदातिशययोग्यताध्वननम् । श्रमजन्यस्वेदसलिलनिःश्वासाभ्यां निःसहा निर्बला चलितुमक्षमेति यावत् । सलिलत्वोक्त्या स्वेदबाहुल्यम् । अत्रेदृशजलकुम्भवहनजन्य एवायं श्रमो नान्यथा शङ्क्षा इति भावः । चौर्यरतगोपनामिति । अत्र वाच्यघटितवाक्यार्थस्य चौर्येण कृतं रतं गोपयतीति सामाजिकान्प्रति व्यङ्ग्यमिति भावः । शब्दपरिवृत्तिसहत्वादर्थस्यैवेयं वृत्तिरिति बोध्यम् । **औन्निद्र्यमिति** । कृतकामुकसंभोगां दूतीं प्रत्युपभोगचिह्नैस्तं ज्ञातवत्या नायिकाया इयमुक्तिः ।

औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवति ॥

तु हेति द्वितीयान्तम् । तत्रापि तथाऽनुशासनात् । अन्ये तु शेषषष्ठ्यन्तमाहुः । तदा छाया तवेति । हे सखि निःश्वाससहितं गतनिद्रत्वादि कर्तृ अल्पभागधेयाया मम कृते मदर्थं त्वामपि

सख्यास्तदीयेति । सख्या नायिकासंबन्ध्यौन्निद्रसंभवन्वस्य वाक्यप्रतिपाद्यत्वाभावादित्यर्थः । अत्र हि नायिकागतौन्निद्र्यादेः सखीत्वेन तां प्रत्यपि दुःखदत्वं वाक्यार्थ इति भावः । **नन्विति** । यद्यपि गुणीभूतव्यङ्ग्यत्वेऽपि

प्रभाः-सख्यास्तदीयेति । सख्या नायिकासंबन्ध्यौन्निद्रसंभवन्वस्य वाक्यप्रतिपाद्यत्वाभावादित्यर्थः । अत्र हि नायिकागतौन्निद्र्यादेः सखीत्वेन तां प्रत्यपि दुःखदत्वं वाक्यार्थ इति भावः । **नन्विति** । यद्यपि गुणीभूतव्यङ्ग्यत्वेऽपि काकुवैशिष्ट्योदाहरणतया न क्षतिस्तथापि सुहृद्भावेन वस्तुस्थितिकथनायैतच्छङ्कोत्थापनं बोध्यम् । **शोभनत्वेति** ।

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते। न च वाच्य-सिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्। प्रश्नमात्रेणापि काकोर्विश्रान्तेः।

Here the sense "Malice as against me is not proper; but it would be proper were it to be entertained against the Kurus", is suggested by Stress. It should not be suspected that the stress, in the instance, is subservient to the establishment of the Expressed sense, and that, consequently, the poetry (in the stanza) belongs to the GUṆĪBHŪTA-VYAṀGYA type; for, the fulfilment (of the Expressed sense) is secured even with the bare query suggested by (lit. of) the stress.

प्रदीपः-कुरुष्विति काकोर्वैशिष्ट्यान्मयि न योग्यं कुरुषु पुनर्योग्यं मात्सर्यमिति व्यज्यते। नन्वत्रोक्तेन काकुव्यङ्ग्येन वाच्यस्य सिद्धिः शोभनत्वनिष्पत्तिः क्रियते। तया चापराङ्गतया व्यङ्ग्यं गुणीभूतम्। अतो न ध्वन्यङ्गं काकुरिति चेत्। उक्तव्यङ्ग्यस्य क्रोधप्रकर्षपर्यवसन्नतया वाच्यस्यैव तदङ्गत्वात्। तदेतदुक्तम्--'न च वाच्यसिद्ध्यङ्गमत्र काकुरिति'

उद्योतः-परिभवति पीडयतीत्यन्वयः। विरहोत्कण्ठितां मां तावत्परिभवत्येव मत्कार्यार्थं गमनागमनादिना कामुकप्रसादने नत्यादिव्यापारेण त्वामपीत्यर्थः। अत एव स्वस्य मन्दभाग्यत्वोक्तिः। अन्यकृते नान्यस्य दुःखं किंतु समदुःखसुखत्वं सख्या एवेत्यतः सखीति। भागो रूपार्धको प्रोक्तो भागधेयैक-शब्दयोः। इति विश्वः। **चेष्टया वैशिष्ट्येनेति**। चेष्टारूपेण वैशिष्ट्येन ज्ञातेनेत्यर्थः। **व्यज्यत** इति। तस्याः कामुकोपभोक्तृत्वमेषा प्रकाशयतीति सामाजिकान्प्रति व्यज्यत इत्यर्थः। **अन्यदीयमिति**। ममेति पदमौन्निद्र्यादावन्वेतीति तदाशयः। **तदीयोन्निद्रतान्वयस्येति**। तच्च दर्शितरीत्या स्पष्टमेव। **तथेति**। वेणीसंवरणे कुरुनिग्रहानुद्यमेन युधिष्ठिरमुपालभमानं भीमं प्रति सहदेवस्य आर्य कदाचित् खिद्यते गुरुरित्युपालम्भनिषेधपरे वाक्योत्तरे गुरुः किं खेदमपि जानातीत्युपक्रम्य भीमसेनोक्तिः। खिन्न इत्यस्येत्थमित्यादिः। गुरुः साक्षादनभियोज्यो युधिष्ठिरः। इत्थममुना प्रकारेण खिन्ने म्लाने मयि खिद्यतेऽनेनेति खेदं मात्सर्यमप्रियत्वेन ज्ञानं भजति। कुरुषु कुर्वपत्येषु। अस्य सामान्यश-ब्दस्यापि विशेषसंनिधानाद्विशेषान्तरपरता। तेन दुर्योधनादिलाभः। अद्यापि एवं दुरवस्थायामपि। यद्वाऽज्ञातवासनिस्तारात्प्रत्यपकारक्षमकालेऽपि न भजतीति सोपहासः काक्वा वाक्यार्थः। तथाभूतां स्त्रीधर्मिणीं दुःशासनाकृष्टवसनकचपाशां विशिष्य भवत्संनिधावप्यकथनयिदुरवस्थाम्। नृपा एव सदः सभा तस्याम्। पाञ्चालस्य तनयाम्। न तु यस्य कस्यचित्। तेन जन्मप्रभृत्यतः पूर्वमपरिभू-तत्वम्। अस्मत्संबन्धेनैव तथात्वमिति भावः। तादृशीं दृष्ट्वेति भजनक्रियया खिन्नत्वक्रियया च समानकर्तृकम्। उषितं स्थितमिति च भावे क्तप्रत्ययसिद्धं द्वितीयान्तं दृष्ट्वेत्यस्य कर्म। तथा वल्कलधरैरस्माभिर्वने व्याधैः सार्धं न तु वानप्रस्थादिऋषिभिर्यत्सुचिरमुषितं तद्दृष्ट्वा विराटस्य राज्ञ आवासे गृहेऽनुचितस्य सूदादिकर्मण आरम्भेण निभृतं गुप्तं यथा स्यात्तथा स्थितं च दृष्ट्वेत्यर्थः। केचित्तु दृष्ट्वेत्येतदुषितमित्यनेन समानकर्तृकम्। संनिधानात्। तेन पञ्चानामपि तद्दर्शनं लभ्यत इत्याहुः।

प्रभाः-व्यङ्ग्यार्थोपस्कृतो हि वाच्यार्थः क्रोधप्रकर्षपर्यवसायीति शोभन इत्यर्थः। ध्वन्यङ्गं ध्वनित्वप्रयोजिका। स्फुटत्वाद्-वृत्तावनुक्तं हेतुं स्वयं दर्शयति। **उक्तेति**। क्रोधप्रकर्षकतया रसान्तराङ्गत्वेन व्यङ्ग्यमेव प्रधानम्, वाच्यं तु तदङ्गमिति वैपरीत्यान्न गुणीभूतमित्यर्थः। वृत्तौ शङ्कातन्निरासौ सिद्धवदेकेनैव ग्रन्थेन कृताविति दर्शयितुमाह--**तदेतदिति**। अपराङ्गत्वाभिप्रायं वाच्यसिद्ध्यङ्गमिति पदमिति शङ्कोपन्यासे दर्शितमिति न विरोधः। प्रश्नमात्रेणेतिग्रन्थं विधान्तरेण

तइआ मह गण्डत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो ।
एह्णिं सच्चेअ अहं ते अ कबोला णसा दिट्ठी ॥ १६ ॥ (?)

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्, चलितायां तु तस्यामन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं त इति व्यज्यते ।

Then you did not direct elsewhere your glance that was riveted on me. Now, though I am the same, and the cheeks are the same, the glance does not continue to be the same. (16)

Here it is suggested, " Since your glance, when you looked at my friend as reflected in my cheeks, was altogether different from what it has come to be-now that she has left-ah! you have been slyly loving her."

प्रदीपः- गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्' इति । तथाऽपि काक्वाक्षिप्तव्यङ्ग्यरूपगुणीभूतव्यङ्ग्यप्रभेदता कथमपनेयेति चेन्न । अत्र नेति प्रश्नकाक्काऽपि वाक्यार्थप्रतीतिपर्यवसानात् । यां काकुं विना वाक्यार्थबोधे एव नोपपद्यते तथैवाऽऽक्षिप्तस्य गुणीभावात् । यथा ' मथ्नामि कौरवशतं समरे न कोपात् ' इत्यादौ भीमसेनादौ तादृशे वक्तरि । तदेतदुक्तम्— ' प्रश्नमात्रेणापि काकोर्विश्रान्तेः ' इति ।

उद्योतः-काकोर्वैशिष्ट्यादिति । संपूर्णचतुर्थपादव्यापित्वरूपकाकुवैशिष्ट्यस्य ज्ञानादित्यर्थः । इति व्यज्यत इति । इति ज्ञापनं व्यज्यत इत्यर्थः । एतेन कथं व्यङ्ग्यार्थबोधः सामाजिकानामाधुनिकानाम् । न तेषां भीमसेनोक्तिमशृण्वानानां तदीयकाकुज्ञानमित्यपास्तम् । भीमसेनपठितानुपूर्व्यनुकरणे तज्ज्ञानसंभवात् । सामाजिकानां युधिष्ठिरे भीमसेनज्ञापनरूपव्यङ्ग्यप्रतीतिश्च मयि खेदभजनं, कुरुषु तदभजनं चानुचितमिति ज्ञानादिति भीमाभिसंधिरूपभीमस्य काकुमज्ञात्वा न भवतीति काकोर्व्यञ्जकत्वं बोध्यम् । एतेन पाञ्चालीपरिभववनवासादिना भीमादेः खिन्नतारूपस्यार्थस्य भीमे कुरुषु च खेदभजनस्यानौचित्यौचित्यव्यञ्जनेन काकोरपेक्षा । तां विनाऽपि महतां खेदज्ञाने दीनविषयकत्वग्रहेऽनौचित्यप्रतीतेरनुभवसिद्धत्वात्तत्र तथात्वस्यानौचित्याद्यविनाभावादिति परास्तम् । तदविनाभूतत्वेऽपि ज्ञापनाविनाभूतत्वविरहात् न हि यदनुचितं तज्ज्ञाप्यत इति नियम इति दिक् । **उक्तकाकुव्यङ्ग्येनेति** । काकुव्यङ्ग्यज्ञापनाविषयानौचित्यातिशयेनेत्यर्थः । **वाच्येस्येति** । भ्रातरि खेदभजनरूपस्य कुरुषु तदभजनरूपस्य चेत्यर्थः । **शोभनत्वेति** । अनौचित्यरूपव्यङ्ग्यार्थोपस्कृतवाच्यार्थस्यैव भीमक्रोधप्रकर्षकत्वादित्यभिमानः । **उक्तव्यङ्ग्यस्येति** । तस्यैवेत्यर्थः। अनौचित्यकारिणि क्रोधप्रकर्षस्याऽऽनुभविकत्वेन तत्सूचकत्वाद्वाच्यातिशायीदं व्यङ्ग्यमिति ध्वनित्वमेवेति भावः । **नेति प्रश्नकाक्काऽपीति** । तन्मात्रनिष्ठया प्रश्नव्याञ्जिकया काक्काऽपीत्यर्थः । अनौचित्यादिव्यञ्जककाकुस्तु खेदं खिन्ने मयि भजाति नाद्यापि कुरुष्विति समुदायनिष्ठेति भावः । कुरुनिग्रहानुद्यमेन युधिष्ठिरमुपालभमानं भीमं प्रति सहदेवीयस्याऽऽर्य कदाचित्खिद्यते गुरुरित्युपालम्भनिषेधपरवाक्यस्योत्तरभूताया वत्स गुरुः खेदमपि जानातीत्युपक्रम्य भीमसेनीयाया अस्या उक्तेर्मयि खेदं भजति नाद्यापि कुरुष्विति प्रश्नमात्रेणाप्युपपत्तेरित्याशयः । **यां काकुमिति** । न तथा विशिष्टकाकुरिति न तदाक्षिप्तस्य गुणीभाव इति भावः ।

प्रभाः–गुणीभूतव्यङ्ग्यत्वाशङ्कानिवारकत्वेन व्याख्यातुमाह--**तथापीति** । नञ्मात्रगतया प्रश्नव्यञ्जिकया काक्वापि वाक्यापर्यवसानं वाक्यार्थोपपत्तौ खिन्न इत्यादिसमस्तगतकाक्वा व्यङ्ग्यस्यानौचित्यस्य न काक्वाक्षिप्तत्वम् । यां विना वाक्यापर्यवसानं ... **किमर्थेति**। किमित्यस्यार्थः प्रश्न एवार्थो तादृशकाकुव्यङ्ग्यस्यैव तथात्वादिति समाधानग्रन्थार्थमाह-**अत्रेत्यादिना**।

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।

Here is the region adjoining the Narmadā, which excels with the beauty of the rows of tha sappy plantain trees, and in which shoot forth, amidst the exuberance of the arbours, the amours of young women. More-

प्रदीपः-अन्ये तु—'कुरुषु न भजतीति नञ्काकुः किमर्था । ततः प्रश्नरूपः किमर्थ एव हठाक्षिप्त इति तस्यैव गुणीभावो न्याय्यः । न तु क्रमेणापि काका व्यङ्गचो गुणीभूतो भवति । अत एव गुणीभूतविभागे काकाक्षिप्तमिति हठार्थगर्भाक्षिप्तपदप्रयोगः' इति तात्पर्यमाहुः ।

तइआ० । वाक्यमनेकं पदम् । तेनात्र तदेदानीं पदात्मकवाक्यवैशिष्ट्यान्मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यादृशी । चलितायां तु तस्यामन्यादृशीत्यहो प्रच्छन्नकामुकत्वं तवेति व्यज्यते । **उद्देशो०**। अत्र नर्मदोद्देशरूपस्य तद्विशेषणीभूतवातकुञ्जादिरूपस्य च वाच्यस्य यथोक्तविशेषणस्य वैशिष्ट्यात्सुरतार्थं प्रविशेति व्यज्यते ।

उद्योतः-**अन्ये त्विति** । सर्वथाऽपि नञ्मात्र एव काकुर्न विशिष्ट इत्येतदाशयः । नञ्काकैव सहदेवगुरोः सुभगं तदाशयाभिज्ञं भ्रातरं त्वां पृच्छामि गुरुर्दीने खिन्ने मयि खेदं भजति विरुद्धकारिषु कुरुषु नेत्येवं वाक्यार्थसिद्धौ तामेव प्रश्नव्यञ्जिकां काकुं सहकारिणीमासाद्य वाक्यार्थे मयि न योग्य इत्यादिरूपमनौचित्यं भीमक्रोधप्रकर्षकतया वाच्यादपि चमत्कारि व्यञ्जयतीति तद्धृदयम् । तदेवाऽऽह—**क्रमेणापीति** ।

तइआ इति । स्वनायिकाभयेन निकटवर्तिनीमन्यां प्रियतमां साक्षादपहाय स्वनायिकाकपोलगतं तत्प्रतिबिम्बं स्वनायिकामुखावलोकनमिषेण सादरं दृष्ट्वा तद्विगमे तादृशनिरीक्षणनिवृत्तं नायकं प्रति दृष्टिविकारेण ज्ञातरहस्याया इयमुक्तिः ।

तदा मम गण्डस्थलनिमग्नां दृष्टिं न नयस्यन्यत्र ।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः ॥

तदा यदा सा कामिनी मत्संनिधावासीदित्यर्थः । निमग्नामनिमेषतया तयाभूतामिव । न तु पतिताम् । णिमिअमिति पाठे निमितां निहितामित्यर्थः । इदानीं तस्या गमनकाले सैव तदवस्थैव । सा स्निग्धाऽनिमेषा । तथा च सखीसांनिध्यातिरिक्तसकलसत्त्वे तादृशदृष्टिविरहस्तदेदानींपदात्मकवाक्यगम्यः सखीसांनिध्याभावस्य स्वप्रयोजकत्वमवगमयतीति बोध्यम् ।

पदात्मकेति । पदसमूहमात्रस्यैवात्र वाक्यपदार्थत्वादिति भावः । मत्सखीमिति । मद्भयाद्बिम्बमपहायेत्यादिः । **अन्यादृशी** । निर्निमेषा स्निग्धा च । **अन्यादृशी** । उद्विग्ना विषण्णा च । इयत्कालं गोपनं कृतमित्याश्चर्येऽहो इति । **तवेति व्यज्यत इति** । तवेत्युपालम्भप्रकाशनं सामाजिकान्प्रति व्यङ्गचमित्यवधेयम् ।

उद्देश इति । नायिकां प्रति रत्यर्थिनः कामुकस्योक्तिरियं दूत्या वा । उद्दिश्यत इत्युद्देशस्तीरभूभागः । तथा च दूरादेतैर्व्यञ्जनैरुद्दिश्यते न त्वत्राऽऽगम्यत इति निर्जनत्वं गम्यते ।

प्रभाः-व्यङ्गचो यस्या इत्यर्थः । क्रमेण प्रश्नरूपव्यङ्गचद्वारा । एवं चैतन्मते वाच्यस्य सिद्धिः शाब्दबोधः, तदङ्गं काकुः, तद्व्यङ्गचमनौचित्यमित्यर्थः । तेन विना बाधाच्छाब्दबोधानुदयात् । काकाक्षिप्तरूपगुणीभूतभेदाशङ्काप्रश्नरूपव्यङ्गचस्य तथात्वेऽप्यनौचित्यरूपव्यङ्गचस्य प्राधान्यादाशङ्कानिरास इति ज्ञेयम् । **तइएति** । 'तदा मम गण्डस्थलनिमग्नां दृष्टिं न नयस्यन्यतः । इदानीं सैवाहं तावेव कपोलौ न सा दृष्टिः ॥' **उद्देश इति** । ऊर्ध्वदेश उच्चस्तीरभूप्रदेश

किं चैतस्मिन्सुरतसुहृदस्तन्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥ १७ ॥ (?)

अत्र रतार्थं प्रविशेति व्यङ्ग्यम्।

णोल्लेइ अणद्दमणा अत्ता मं घरभरम्मि सअलम्मि।

over, in this (region) blow, O slim lady those breezes friendly to dalliance, in front of which marches Cupid prone to fitful excitement. (17)

Here it is suggested: Get in for dalliance!

My mother-in-law with an unsoftened mind presses me to shoulder

प्रदीपः–णोल्लेइ०। अन्यसंनिधिः संनिहितोऽन्यः। तेनात्र प्रतिवेशिनीं प्रति प्रवर्तिते वाक्ये प्रच्छन्नपुरुषरूपस्यान्यस्य संनिधेर्वैशिष्ट्यात्संनिहितं प्रति संध्या संकेतसमय इति व्यज्यते। सुव्वइ०।

उद्योतः–ऊर्ध्वदेशत्वेनाधः संचरतां स्खलनभियाऽनवलोकनीयत्वं च व्यज्यते। सरसत्वेन शुष्कदलराहित्यात्कटुशब्दराहित्यम्। श्रेणीत्वेन वेष्टनम्। तथा च तत्पत्रावरणात्संचरतामनवलोकनीयता छाया च सूच्यते। तदीयशोभया स्थानान्तरादतिशयितशोभः कुञ्जोत्कर्षेण गुञ्जन्मधुकरकराम्बितः कुसुमसमृद्ध्यादिरूपेणाङ्कुरितोऽसन्नेवोत्पादितो रमणीविभ्रमः, चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मत इत्युक्तलक्षणो यत्र स इत्यनेन यासामपि न स्मरोद्भेदस्तासामप्यसौ वहतीति भवत्याः कामवैमुख्ये दुरुत्तरं व्यसनं स्यादिति भावः। यत्तु विभ्रमो विलास इति व्याख्यानं तदज्ञानविलसितम्। तयोर्भेदात्।

विलासोऽङ्गे विशेषो यः प्रियाप्तावासनादिषु।

विभ्रमस्तूक्त एव। अत एवामरोऽपि—

स्त्रीणां विलासविब्वोकविभ्रमा ललितं तथा।

इत्यादिना हावलक्षणे भेदेन तावुपनिबद्धवान्। नर्म ददातीति नर्मदा न नदीमात्रम्। न केवलमेतावदेववैमुख्ये बाधकं किं त्वन्यदप्यस्तीत्याह–किंचेति। एतस्मिन्प्रदेशे ते मानिनीमानभञ्जनेऽतिनिपुणत्वेन प्रसिद्धाः। यद्वा ते तव सुरतस्य सुहृद इत्यर्थः। सुरतसुहृत्त्वं रतिश्रमजन्यस्वेदहरणेन पुनः पुनः प्रवर्तनया। वाताः। वान्तीति वाता इति व्युत्पन्नेनानेनैव गमनशालित्वे लब्धे पुनर्वान्तीति मन्दत्वप्रत्यायनाय। नर्मदाकुञ्जोत्कर्षसंबन्धाच्छैत्यसौगन्ध्ये उक्ते एव। तन्वीति कन्दर्पवेदनावत्त्वं श्रमापनायकसत्त्वादत्रैव रतौचित्यं च। आक्षिप्ततच्छब्दार्थमाह। येषां वातानामग्रे मनोभूः कामः कलितो धृतोऽकाण्डेऽनवसरे निमित्ताभावेऽपि कोपो येन तादृशः सरति। वायुसंबन्धतुल्यकालं कामिनीजनस्य कामपीडोदयेन कामस्याग्रेसरत्वमुत्प्रेक्षितम्। अनेनैवंविधसंभेदे सुरतवैमुख्यादतिकुपितो मकरध्वजः किं वा विधास्यतीति न ज्ञायत इति ध्वन्यते मनोभूत्वेन सचेतसां दुष्परिहरत्वम्। यथोक्तविशेषणस्येति। बहुव्रीहिः। सुरतार्थं प्रेति। सुरतार्थं प्रविशेति यन्नायिकायाः प्रेरणं तत्सामाजिकान्प्रति व्यज्यत इत्यर्थः।

णोल्लेइ इति। गुरुजनसांनिध्येन विशिष्य वक्तुमशक्नुवती काचित्तटस्थतयेव संनिहितं नायकं प्रति संकेतकालसूचनाय प्रतिवेशिनीं संबोध्य श्वश्रूपालम्भमाह।

प्रभाः–इत्यर्थः। वातविशेषणं सुरतसुहृत्त्वम्। कुञ्जविशेषणं गुञ्जन्मधुकरत्वरूप उत्कर्षः। णोल्लेइति। 'नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले। क्षणमात्रं यदि संध्यायां भवति न वा भवति विश्रामः॥' 'अणण्णमणा' इति पाठे

55-2531

खणमेत्तं जइ संझाइ होइ ण व होइ वीसामो ॥ १८ ॥

अत्र संध्या संकेतकाल इति तटस्थं प्रति कयाचिद् द्योत्यते ।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण ।

एमेअ किंत्ति चिट्ठसि ता सहि सज्जेसु करणिज्जम् ॥ १९ ॥ (?)

---

the full burden of house-hold duties. If at all there be a moment's respite, it is in the evening. Otherwise there is none at all. (18)

Here some lady is suggesting to a party not participating (in the conversation) that evening should be the time of appointment.

It is reported that your beloved will meet you to-day within but a PRAHARA (i. e. three hours). Why then do you tarry like that? Get ready, O friend, what needs to be prepared. (19)

प्रदीपः—अत्र प्रकरणस्य प्रस्तावस्याभिसारसंबंधित्वरूपवैशिष्ट्यादुपपतिं प्रत्यभिसर्तुं न योग्यमिति व्यज्यते। **अन्यत्र०।**

उद्योतः— नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।
क्षणमात्रं यदि संध्यायां भवति न वा भवति विश्रमः ॥

अणण्णमणा इति पाठे त्वनन्यमना इति । नुदति प्रेरयति । अनार्द्रमकरुणम् । तेन श्रमादिव्याजालम्बनेनापि नावकाश इति ध्वन्यते । गृहभरो गृहकार्यनिर्वाहः । सकल इत्यनेन सार्वकालिका व्यग्रता । यदि क्षणमात्रं विश्रमो भवति तर्हि संध्यायां तत्रैवावसरप्राप्तेरथवा न भवत्येवेति योजना । श्वश्रूरित्यनेनानतिक्रमणीयाज्ञता। **वैशिष्ट्यात्** । तद्विषयकज्ञानादित्यर्थः । **व्यज्यत इति** । संनिहितं प्रति यत्संकेतसमयबोधनं तत्सामाजिकेषु व्यज्यत इत्यर्थः । एवमग्रेऽपि बोध्यम् ।

उपपतिं प्रत्यभिसर्तुं प्रस्थितां नायिकां प्रति तत्पत्यागमनवार्तां श्रुतवत्यास्तत्सख्या जनान्तरसंनिधानेऽभिसारनिवारणोक्तिः । **सुव्वेति** ।

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम् ॥

समागमिष्यतीति श्रूयत इत्यन्वयः । अद्यैव न तु कालान्तरे । श्रूयते नतु यदा कदाचिच्छ्रुतम् । तत्रापि प्रहरमात्रेण न तु विलम्बेन । सम्यक्पूर्णकामः, बहुतरलब्धधनः । अनेनाऽऽगमनोत्तरं झटिति पुनरगमनम् । प्रिय इति विरोधिलक्षणया । एवमेव । तदीयभोजनाद्युपयोगिव्यापाररराहित्येन । करणीयं रन्धनादिकम् । सज्जय साधय । अत्र विदितरहस्यया सख्या कृतस्य प्रियागमनप्रस्तावस्याभिसारप्रकरणकृतत्वरूपाद्वैशिष्ट्याच्ततो निवारणव्यञ्जकत्वमित्याहुः । अन्ये त्वत्र मते श्रूयत इत्यस्य वर्तमानापदेशस्य न तथा स्वरसः । शैध्यताया अवश्यनिवर्तनाय कालाल्पत्वप्रतिपादनार्थं भूतनिर्देशस्यैव युक्तत्वात् । तस्मात्प्रियागमनश्रवणतोऽभिसारान्निवृत्तां प्रत्यवश्यमभिसरणीयमिति व्यञ्जयन्त्या दूत्या इयमुक्तिः । एवं श्रूयते प्रहरमात्रेणाऽऽगमिष्यतीति । तदधुनैवैवमेवाभिसारोद्योगरहितमेव किमिति तिष्ठसि अत एवाद्येत्युक्तमित्याहुः । अपरे त्वद्य तव प्रियो रात्रौ प्रहर-

---

प्रभाः—त्वनन्यमना इत्यर्थः । अनार्द्रं निष्ठुरम् । **सुव्वइति** । 'श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण । एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम् ॥' एवमेव निर्व्यापारा । करणीयं रन्धनादि । सज्जय साधय ॥

अत्रोपपातिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते ।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥ २० ॥ (१)

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाऽभिसार्यतामित्याश्वस्तां प्रति कयाचिन्निवेद्यते ।

गुरुअणपरवस पिअ किं भणामि तुह मन्दभाइणी अहकम् ।

In this instance, a woman who is about to proceed to her paramour is being dissuaded by another who is suggesting (in the Stanza) that it is not proper to do so.

You collect filowers elsewhere, O friends, while I (ASMI i. e. AHAM) am doing the same here; for, I am not in a position to stir out a long way off; be pleased, to you are folded these hands! (20)

Here a certain woman suggests to another who happens to be her *confidante*: "This spot is secluded; so just direct hither the lover in disguise".

My dear, who are utterly at the mercy (PARAVAS'A) of the elderly persons, what shall I say unto you? My wretched self commands but poor

प्रदीपः–अत्र देशस्यातिविविक्ततादिरूपवैशिष्ट्याद्वक्तृवैशिष्ट्यादिसहितात्सख्या प्रच्छन्नकामुको युष्माभिः प्रहेय इति प्रियसखीः प्रति व्यज्यते ।

गुरुअण० । अत्राद्यपदप्रतिपाद्यमधुसमयवैशिष्ट्याद्वक्तुरवस्थाविशेषसहितादिदानीं यदि व्रजसि तदाऽहं तावन्न

उद्योतः–मात्रेणाऽऽगमिष्यति संकेतस्थानं तदेवमेवाभिसारोपयोगिव्यापाररराहित्येन । किमिति तिष्ठासि ततः शीघ्रमभिसारणासामग्रीं रचयेति बोद्धृवैशिष्ट्योदाहरणमेवेदमित्याहुः । एतन्मतद्वयेऽपि प्रकाशो विरुध्येत । **अत्र प्रकरणस्येति** । विदितरहस्यया सख्याऽभिसारोपयोगिवेषविन्यासादिप्रकरणे प्रियागमनकथनेनाभिसरणनिषेधं करोतीति प्रकरणं जानतां सामाजिकानां व्यङ्ग्यमित्यर्थः ।

अन्यत्रेति । नायकसंनिधानादागतां प्रियतरसखीं दृष्ट्वा सखीः प्रत्युक्तिरियम् । भो सख्यः, अपरिहार्यप्रणयाः, अन्यत्रेतो दूरं कुसुमावचायं हस्तेनाऽऽदानम् । हस्तादाने चेरस्तेये (पा. सू. ३।३।४०) इति घञ् । यावद्धस्तप्राप्यकुसुमलाभस्तावद्दूरं गच्छतेति । सर्वथा निकटेऽसंचरणं तासां ध्वन्यते । यूयमिति बहुत्वादन्यत्र गमनेऽपि ससहायतया भयाद्यभावः । अत एवाहमित्येकवचनम् । अत्र श्रूयमाणमानवशब्दे कुञ्जादिमिति च । एतेन भयाद्यभावो विजनता च । अस्मीत्यहमर्थकम् । करोमीत्यत्रापि कुसुमावचायमिति कर्म त्वमप्यस्माभिः सहैवाऽऽगच्छेति नियोगवारणार्थमनागमने हेतुमाह–नाहमिति । सर्वाभ्य एकोऽञ्जलिरसामर्थ्यात् । **विविक्तादि** । विजनतादि । **प्रच्छन्नकामुक** इति । सख्यादिवेषधारीत्यर्थः । **प्रियसखीरिति** । आश्वस्तां प्रियसखीमिति युक्तः पाठः ।

प्रवासं गन्तुमिच्छन्तं नायकं प्रति नायिकाऽऽह–**गुरुअणेति** ।

प्रभाः–**प्रकरणस्येति** प्रस्तावपदार्थकथनम् । **अभिसारसंबन्धित्वेति** । अभिसरणप्रस्तावे हि प्रियागमनमभिसरणनिषेधसूचकमित्यर्थः । **अन्यत्रेति** । कुसुमानामवचायं हस्तेनादानम् । 'हस्तादाने चेरस्तेये' इति घञ् ।

अज्ज पवासं वच्चसि वच्च सअं जेव्व सुणसि करणिज्जम् ॥ २१ ॥ (?)

अत्राद्य मधुसमये यदि व्रजसि तदाऽहं तावन्न भवामि तव तु न जानामि गतिमिति व्यज्यते । आदिग्रहणाच्चेष्टादेः । तत्र चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।

fortune. You are going on travel to-day. Do go. You yourself will hear what course I am about to pursue! (21)

Here is suggested; "If you go away to-day, when it is spring-time, then, as for myself, I shall be no more; I do not know however what is to be your lot!" The insertion of the word ĀDI (in the SŪTRA) includes the suggestiveness of Gestures and other circumstances. Of them, (the suggestiveness) of Gestures is illustrated in the following:—

When I was close by the threshold, she whose splendour lies in her superb beauty (SAUNDARYA-SĀRA), stretching out her laps brought them close together; the silken garment on the head she pulled over her

प्रदीपः—जीवामि, तव तु न जानामि गतिमिति प्रियं प्रत्यनुरक्तया व्यज्यते ।

